पुराणस्य तन्त्रागम सिद्धान्तः

PURANASYA TANTRAGAM SIDDHANTAH

डॉ. शत्रुघ्न नाथ तिवारी

ग्रन्थस्य सन्दर्भे

श्रीमतां डा. शत्रुध्न नाथ तिवारी महोदयेन विरचिता: "पुराणस्य तन्त्रागम सिद्धान्त:" एक-मौलिक कृति: अस्ति। डा० तिवारी महोदय: कुशल शिक्षक: सहकुशल प्रशासक: अस्ति। अस्य कृति: पंञ्चमाध्याये विभक्तवान् । प्रथमऽध्याये पुराण लक्षणम्, पुराणानां विषया: एवं तन्त्रागम सिद्धान्त सम्बन्ध:, पुराणेषु शिवपुराणस्य स्थानम्, शिव पुराणगता विषया: पुराणै: सह तन्त्रागम सिद्धान्तस्य सम्बन्ध: विस्तारपूर्वक उल्लिखत् । द्वितीयाध्याये शिवपुराणे विद्येश्वसंहिताइति खण्ड विषये विचार:, रूद्र संहिता विषये विचार:, शतरुद्र संहिता विषये विंचार:, कोटिरुद्रसंहिता विषये विचार:, उमासंहिता विषयेविचार:, कैलाश संहिता विषये विचार:, वायवीय संहिता विषये विचार: इत्यादि वर्णन कृतवान् । तृतीये अध्याये तन्त्रशब्द निरूक्ति:, आगम शब्द विचार:, तन्त्रागमे शाक्त शैषदर्शनानां निष्पत्ति:, तन्त्रागम सिद्धान्तानुराधने शिव स्वरूप विमर्श:, तन्त्रागम तत्त्वानां विवेचनम् इत्यादि विषय: विस्तारपूर्वक प्रस्तुतिकरणं कृतवान्। पुस्तकस्य चतुर्थ अध्याये शिवलिङ्गविषयकविचारा:, प्रणवविषयक विचारा:, द्वादश ज्यातिर्लिङ्ग विषयकविचारा:, गणेशस्य प्रथम पूजयत्वे हेतु:, शिवस्य सगुण-निर्गुण भेदादि वर्णयन्ति। पंचमाध्याये महाकालतत्त्वस्य विवेचनम्, युगयुगेषु शिवस्य योगावतार:, नम: शिवाय इति मन्त्रस्य महात्म्यम्, षडर्ध्य वर्णनम्, शिवपुराणस्येह लोक परलोक, साधन क्षमता इत्यादि विस्तारेण व्याख्या कृतवान्।

मूल्य रु. : 500/-

पुराणस्य तन्त्रागम सिद्धान्तः

(शिवपुराणस्य विशेष सन्दर्भेः)

PURANSYA TANTRAGAM SĪDDHANTAH

डा० शत्रुघ्न नाथ तिवारी

एम०ए०, पी-एच०डी०

उपाचार्य- बैजनाथ पाण्डेय आर्य संस्कृत महाविद्यालय

सीवानस्थः

आदित्य बुक सेन्टर

वाराणसी उ० प्र०

प्रकाशकः
सूर्य नारायण मिश्र
आदित्य बुक सेन्टर
बी. 1/82 गोयनका गली,
अस्सी, वाराणसी - 5
फो0 : 9335607246

प्रथम संस्करण : 2007

© लेखक

ISBN : 81-903635-1-4

मूल्य : रू 500/-

मुद्रक
श्रीमाता कम्प्यूसिस प्रा० लि०
बी. ७/१९३, केदारघाट, वाराणसी
(०५४२) २२७५२७२, २२७५२७४

कम्प्यूटर अक्षर संरचना :
वीज़ बिजनेस सेन्टर
सी. 21/91, महामण्डल नगर,
लहुराबीर, वाराणसी
फोन : 9336913165

सम्पर्ण

पूज्य पिता श्री जयशंकर नाथ तिवारी
एवं स्वर्गीया माता गुजेश्वरी देवी के
चरण-कमलों में सादर समर्पित

शत्रुघ्न तिवारी

शुभाशंसनम्

संस्कृत साहित्यस्य स्वनामधन्य विदुषा डॉ० शत्रुघ्ननाथतिवारी महाभागेन प्रणीत: "पुराणस्य तन्त्रागमसिद्धान्त" इति ग्रन्थ: प्रकाशित: सन् संस्कृतसाहित्यागारं वर्धयिपयतीति ज्ञात्वा अमन्दमानन्दमनुभवति मे मन:। संस्कृतसाहित्ये वर्तमानानां तत्त्वानां प्रचारे-प्रसारे च निरन्तर संलग्नानां डॉ० तिवारीमहाभागानामेष प्रयास: गवेषकानां मार्गदर्शनं विधास्यति संस्कृतज्ञानां ज्ञानसम्वर्द्धनञ्च करिष्यतीति मे विश्वास:।

संस्कृतसाहित्ये भारतीये समाजे चापौरुषेयवेदानां महत्त्वं सर्वविदितं वर्तते। वेदा: निस्पयेन भारतीय धर्मस्याधारभूता: प्रकल्पिता:। परञ्च तेषां ज्ञानं सामान्य जनानां कृते दुष्करमिति मत्वा मनीषिभि: पुराणसाहित्यस्य रचना कृता यत्र वेदप्रतिपादित धर्मदर्शना-दीनामेव वर्णनं सर्वजनसंवेद्यभाषया कृतमवलोक्यते। पुराणसाहित्ये वेद-वेदाङ्गानां सर्वविध-वर्णनमवलोक्यते। पुराणेषु शिवपुराणं प्राधान्यं भजति यमतन्त्रागमर्या: पुराणदृष्ट्या समीक्षणं प्रकृतग्रन्थस्य प्रधानभूत: विवेच्यविषय: वर्तते।

ग्रन्थरचनायां कृतभूरिपरिश्रमस्य डॉ० तिवारी महोदयस्य सारस्वतश्रमोऽयं सर्वथा सार्थको भवतु ग्रन्थोऽयं सामान्य जानानां विदुषाञ्च दृष्टि समानरूपेण प्रतिष्ठां तमतामिति मदीया शुभाशंसेति शम् ।

विदुषामाश्रव:-

श्रीपति त्रिपाठी

प्राचार्योऽध्यक्ष: संकायाध्यक्षस्य
स्नातकोत्तरधर्मशास्त्रपुराणविभाग:
कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालय:
दरभंगा ।

शुभाशंसनम्

आयुष्मता डॉ० शत्रुघ्ननाथ तिवारीणा विरचित: 'महापुराण दृष्टया तन्त्रागमसिद्धान्त समीक्षणम्' इत्याख्यो ग्रन्थ आद्योपान्तो मया सम्यगवलोकित:। शिवपुराणे हि सप्तसंहिता: शिवशक्तिमाहात्म्य ज्ञापका: समुल्लसन्ति। पुराणेषु महापुराण गणनायां शैवा: शिवमहापुराणं परिगण्यन्ते, वैष्यावाश्च शिवमहापुराण स्थाने श्रीमद्भागवतमहापुराणं मन्यन्ते। अष्टादश-पुराणेषु शिवपुराणे सर्वे हि लोक-परलोक साधका विषयो: पुराण लक्षणै: सह उपपादिता दरीदृश्यन्ते। 'पुरानवं भवती'ति पुराणमिति व्युत्पत्या सर्वे हि शिव महापुराणगता विषया नवनवोन्मेषसहिता: शिवशक्त्यो: साम्राज्यं प्रापणाम सर्वथा समा।

इतिहासपुराणाभ्यां वेदं समुपवृंह्येदिति सिद्धान्तानुरोधेन वेदेषु सूमरुपेणनिर्दिष्टा विषया: पुराणेषु पल्लविता: पुष्पिताश्च दरीदृश्यन्ते। एतदर्थं ऋग्वेदीय पुरुषसूक्तं शिवमहापुराणे पुरुषरुपेण शिवरुपेण वा चित्रितं विद्यते। 'ज्ञानमिच्छे म्महेश्वरात्' ज्ञानकोमस्तु गिरिशमि'त्या-दिस्मृत्युक्तेवचनैर्भगवाञ्च्छिव: चराचरस्य ज्ञानकारणं श्रूयते। स हिं शिवया अभेद सम्बन्धेन युतो निखिलं ज्ञाता ज्ञातं जगद्रचयति, पालयति संहरति च। स एव स्वतेजसा विष्णुमुपपाद्य प्रयोजककारणत्वेन सन् प्रयुज्यकारणेन विष्णुना सर्वं सम्भावयति। भगवन्तं विष्णुं सर्वशक्ति सर्वसाधनक्षमं विधाय तदद्वारा सर्व सम्पद्यतामेति। किञ्च विष्णुना कदाचिदसमर्थे साक्षात्साहाय्यं-विधाय तं प्रभावयति । एवं सृष्टि स्थिति पालन सम्बन्धे शिवे: सर्वं संगततां भावयति ।

(जयादेश) आगमतन्त्रशास्त्रानुरोधेन चिदानन्दरूपो भगवाँच्छिव: अरुपी सन् प्रकाशमयो विमर्शमय्या शक्त्या सम्बलित अनुग्रहानुगत अर्थरुपेण विश्वस्मिन् प्रतिफलति चिच्छक्ति: शब्दवर्णादिरुपिणी मातृका अर्थरुपेणशिवेन सम्बद्धा सती सर्वम शिवतां 'सत्यं शिवं सुन्दरं' भावेन संगमयति। अयमेव सिद्धान्त: शब्दार्थरूप: परिणामरूपश्च शास्त्रेमहाकवि कालिदासादि-वाक्येषु वागर्थमय: समुपर्जृभते। शाब्दिकेषु अक्षरं शब्दतत्वमयमेव पाणिनि पतञ्जलि भर्तृहरि-सिद्धान्तेषु स्वतंत्र:कर्ता 'एक: शब्द: सम्यग्ज्ञात: सुष्ठुप्रयुक्त: शास्त्रान्वित: कामधुग्' भवति। अस्यैव भावस्य निखिल पक्षास्तत्तच्छास्त्रेषु स्वर्गलोकेच रुपायिता:। शब्दश्रुतिरेव श्रुति-स्मृति-पुराणेषु विवृता सतां विदुषां विद्याकान्तारचरणाय पाथेयरूपा।

अत: महापुराणे सर्वे एते भावास्तत्त्वज्ञाय कल्याणाय चित्रकर्षणाय च साधका: जायन्ते ।

श्री तिवारिणा प्रायशः सर्वे एते पक्षाः क्वचित् समासतः क्वचित् च व्यासतो विवर्तिता दरी दृश्यन्ते। महापुराण दृष्टया तन्मागम् सिद्धान्त समीक्षणम् इति ग्रन्थः प्रकाशतामागत्य तमत्या विवुधाः नूनं विदुषां तत्वबोमुत्सूनान्य मोदायालं भविष्यन्ति। डॉ० शत्रुघ्ननाथतिवारीण रचना यम् फलतामियादिति शुभासंशम् शिवाय स्यादितिशम् ।

डॉ० राजनाथ त्रिपाठी
सहायक छात्र कल्याण संकायाध्यक्ष
सम्पूर्णानन्द संस्कृत विश्वविद्यालय
वाराणसी-२२१००२

विषय-सूची

विषया		पृष्ठ संख्या
	शुभाशंसनम्	iv - vi
	प्राक्कथन	ix - xxii
प्रथमाध्याये:	पुराणलक्षणम्	1 - 25
	पुराणानां विषया: एवं तन्त्रगमसिद्धान्त सम्बन्ध:	
	पुराणेषु शिवपुराणस्य स्थानम्	
	शिवपुराणगता विषया:	
	पुराणै:सह तन्त्रागमसिद्धान्तस्य सम्बन्ध:।	
द्वितीयाध्याये:	शिवपुराणेविद्येश्वरसंहिताइति खण्ड विषये विचार:	26 - 79
	रूद्र संहिताविषये विचार:	
	शतरूद्रसंहिताविषये विचार:	
	कोटिरूद्रसंहिता विषये विचार:	
	उमासंहिता विषये विचार:	
	कैलाससंहिता विषये विचार:	
	वायवीयसंहिता विषये विचार:।	
तृतीय अध्याय	तन्त्रशब्द निरुक्ति:	80 - 105
	आगमशब्द विचार:	
	तन्त्रागमे शाक्तशैवदर्शनानां निष्पत्ति:	
	तन्त्रागमसिद्धान्तानुराधेन शिवस्वरूपविमर्श:	
	तन्त्रागमतत्त्वानां विवेचनम्।	

विषया		पृष्ठ संख्या
चतुर्थ अध्याय	शिवलिङ्गविषायकविचारा: प्रणवविषयकविचारा: द्वादशज्योतिर्लिङ्गविषयकविचारा: गणेशस्य प्रथमपूजयत्वे हेतु: शिवस्य सगुण-निर्गुण भेदा:	106 - 141
पंचम अध्याय	महाकालतत्त्वस्य विवेचनम् युगयुगेषु शिवस्य योगावतार: नम:शिवाय इति मन्त्रस्य माहात्म्यम् षडर्ध्य वर्णनम् शिवपुराणस्येह लोकपरलोक साधनक्षमता।	142 - 195
उपसंहारः		196 - 197

प्राक्कथनम्

भारतीया संस्कृतिर्हि वेदस्मृतिपुराणानामाश्रयेणाद्य यावत् प्रचलति। अनेकशाखाविभक्तेषु चतुर्षु वेदेषु, ब्राह्मणेषु आरण्यकेषु, उपनिषट्सु च विश्वकल्याणकारिणीषु परमोदारमन्वादिवहुसंख्याकासु स्मृतिषु, ब्रह्माद्यष्टादशभेदभिन्नेषु पुराणेषु तस्याः संस्कृतेः स्वरूपं सर्वश्रेष्ठमेकमेवोपलभ्यते। यद्यपि बहुषु कृतादि युगपरम्परासु व्यतीतासु भारतीयावारविवाराणां नैकविधत्वामिवाभाति, तथापि न किमपि तादृशं यत् सर्वथा वेदादि प्रोक्ताचारविचारान् विसंवदेत्। वेदवाङ्मयेषु यद् भारतीयाचाराविचाराणां स्वरूपं संक्षेपतः उपलभ्यते, तत् स्मृतिषु विस्तृतं पुराणेषु च ततोऽपि कथोपकथनेतिहासद्वारा तिविस्तृतमुपलभ्यते, परन्तु सर्वत्र पुष्पमालायां सूत्रमिव वैदिकं मूलस्रोतः स्वरूपं सर्वत्रानुस्यूतमेव। अद्य यावद् भारतीया यत्र कुत्रापि भारते ततोऽपि सुदूरमीफ्रका देशेषु गता अपि धार्मिकं कार्यमनुतिष्ठन्तः सर्वत्रादौ श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थमित्यादि संकल्पयत्न्येव। पुराणैरेव भारतीयानां सर्वदेशीयजनेभ्यो विशिष्टं भिन्नत्वं धार्मिकत्वमीश्वर दैव-वेदपुनर्जन्मप्रभृतिषु दृष्टश्रद्धत्वम् कृपा हिंसादिस्वभावत्वं च सुरक्षितं विद्यते। यान्याधुकानां नूतनानीव विज्ञानानि, तानि क्वचित् संक्षेपतः, क्वचिच्च विस्तरतः पुराणेषुपलभ्यन्ते। प्रत्युताचननीयाधुनिकविज्ञानवेतृणां बुद्धे सर्वथागोचरविषयः। यथा कया क्रमबद्धपद्धत्या सृष्टेः प्रादुर्भावः कथं कदा प्राणतत्त्वस्य चैतन्यस्य च पाञ्चभौतिकं शरीरं धृत्वा जगतिसञ्चारः इन्द्रियाणां मनसो बुद्धेश्च कदा क्रमेण वा समुत्पत्तिः ? इन्द्रिय मनोबुद्ध्यादितत्त्वानि कैर्द्रव्यविशेषैर्मिलितानि ? मरणानन्तरमुत्पतेः पूर्वं वा जीवस्य कीदृशीस्थितिः कुत्र वा वासः ? इत्यादयो वह्वो विषयाःपुराणेषु क्रमेणोपबद्ध उपलभ्यन्ते। तत्र प्रथमतः एकदेशिकशरीरी जीव उत्पद्यते, इति सिद्धान्त आधुनिक वैज्ञानिकानाम्, भारतीयप्राचीनपौराणिका अपि स्वपद्धत्या क्रमबद्धरूपेण जीवस्य शरीरधारणप्रकारमिन्द्रियाणां क्रमशः समुत्पत्तिं तद्भेदात् प्राणिषूच्चावच भेदांश्चोपवर्णयन्ति यथा हि श्री व्यासेन श्रीमद्भागवते[१]—

वीर्ये हिरण्मयं देवो मायया व्यसृजत् त्रिधा ।
अन्तःशरीर आकाशात् पुरुषस्य विचेष्टतः ।।
ओजःसहो बलं जज्ञे ततः प्राणो महानसुः ।
प्राणेन क्षिपता क्षुतृऽन्तरा जायते प्रभो ।।
पिपासतो जक्षतश्च प्राङ्मुखं निरभिद्यत ।
मुखतस्तालु विभिन्नं जिह्वा तत्रोपजायते ।।

विवखोर्मुखतो भूम्नो वन्हिर्वाग्व्याहृतं तयोः ।
जले वै तस्य सुचिरं निरोधः समजायत ।।
नासिके निरभिवेतां दोधूयति नभस्वति ।।
यदात्मनि निरालोकमात्मानं च दिदृक्षतः ।
विभिन्ने ध्यक्षिणी तस्य ज्योतिश्चसुर्गुणग्रहः ।। इति

अनेन महता प्रघट्टनेन प्राणतत्त्वे शरीरस्थे जाते तत्तद् पेक्षयेन्द्रियाणां क्रमशश्चोत्पत्तिर्जायते इति ज्ञायते। यद्यप्याधुनिकाः पाश्चात्याः भारतीया अपि केचन क्रममिमं न विश्वसन्ति, पौराणिकान् सर्वानपि बुद्धेरगोचरान् विषयान् काल्पनिकानीति मत्वोपहसन्ति तथापि तत्तेषां कथनं सुविचारकेभ्यो न सर्वथा रोचते। तत्र विषयेऽभिन्नयन्ति यस्य तत्वस्य ज्ञानार्थ यादृश उपायो पेक्षते तादृशेनैवोपायेन तस्य तत्त्वस्य ज्ञानं भवतीति पौराणिकस्य बुद्धेरगोचरस्य तत्त्वजातस्य साक्षाद् ज्ञानार्थ निर्मला तपसा दोषरहिता सात्विकी बुद्धिरपेक्ष्यत इति नैकवारं तत्र-तत्र पुराणादिषु वर्णितमतस्तत्तत्त्वज्ञानार्थं तादृशस्यैव वर्णितस्योपायस्य स्वीकार अपेक्ष्यते। तादृशानि सकलज्ञानसंग्राहकाणि पुराणान्यतिप्राचीनानि प्रत्युत वेदवत्परम्परया प्राप्तानीति वेदेष्वपि क्वचित् पुराणशब्दस्य प्रचलितार्थस्योपलब्धतया वक्तुं शक्यते। अतएव पुराणकथास्यव्यक्तिविशेषाणां पुरूरवोर्वशीतामथमीप्रभृतीनामुल्लेखः ऋग्वेदे प्युपलभ्यते। वेदानां समीचीनार्थकरणं पुराणं विना शन्यप्राणमेव, प्रत्युत वैदिकार्थस्य हानिकरणमेव। अतः सम्यमुक्तं महाभारतस्यादिपर्वणि[२]—

इतिहासपुराणाभ्यां वेदं समुपवृंहयेत् ।
विमेत्यल्पश्रुताद् वेदो मामयं प्रहरेदिति ।।[३] इति

पुराणानामाश्रयेणैव मनुष्यजीवनस्य प्राथमिक्यवस्था, उन्नतिप्रकारे विद्यमाना विशिष्टाप्रकाराः, भिन्न-भिन्न जातीनां परस्परमेलनष्ट्थग्भावः नीतितत्त्वानां, धर्मतत्त्वानां, भिन्नभिन्न देवोपासना तत्त्वानां निरूपणम्, जीवस्येतिकर्त्तव्यता, समाजस्य क्रमणिका सः परमेश्वरस्य सर्वत्रैकरूपेण स्थितिः सुखस्य मूलं साधनमित्यादो वहवो विषयाः पुराणद्वारेव मनुजाः सरलतया सुखेन च ज्ञातुं शक्नुवन्ति। प्रत्युत पुराणैरस्पृतहं किमपि तत्त्वं विचारजातं च नास्तीति कथने नात्युक्तिदोषस्पर्शनभीतिः।

भारतीयार्यसंस्कृतेः सम्यक् परिशीलनार्थं वेदानां तन्मूलकस्मृतितन्त्राणां च समीक्षणमावश्यकं तथा वेदोपबृंहकाणामितिहासपुराणानां परिज्ञानम्। साम्प्रतं वैदिकशैल्या कर्मोपास्तिसंवित्तरीणायुच्छिन्नतया गाधाचरसंसारार्णवमुत्तरीयतुमशक्नुवतायुद्धाराय च श्रुतिस्मृत्यप्रतिकूलम् आपाससाध्यप्रचुरवस्त्वनपक्षपौराणिकवर्त्येव परमं श्रेयस्करम्। पुराणमहोदधावगा-

हननिपुणतायै विचाराणां प्रामाणिकतायै च वेदानां मनुशीलनं नितान्तमावश्यकम्। अतएव निखिलशास्त्रपारावारपारदृश्वभिः वेद वाङ्मय-गुणगौरवाकृष्टहृदयैः सहृदयैः प्रेखावद्भिरनिवार्यतया वेदानामध्ययने वलं दत्तमस्ति- "ब्राह्मणेन निपकारणं षडङ्गोवेदो ध्येयो ज्ञेयश्च" इति।

भारतीयसंस्कृतेर्मूलाधारः सन्ति वेदाः, यतो हि वेदानामक्षुण्णा विचारधारा एव भारतीयसंस्कृतिद्वारा नित्यं निरन्तरं प्रवाहिता भवति। वेदानां व्यापकप्रभावादेवानेकैराक्रमणैः सद्भिरपि अद्यत्वेऽपि भारतीया संस्कृतिः अवाधगत्या पूर्ववत् प्रचलति। अतएव प्राचीनेषु वाङ्मयेषु वेदानां महत्वे विविधैःप्रकारैःगीतमस्ति। वेदानामनुशीलनेन प्राणिनो लौकिकं पारलौकिकं चाभ्युदयं सम्पादयन्तः स्वं स्वं जीवनं समुन्नति शीलनं विधातुं शक्नुवन्ति। मानवजीवने ये ये विभिन्नाः प्रसङ्गाः उपतिष्ठन्ते, तेषां तेषां मार्गप्रदर्शनस्य क्षमता वैदिक-विचारधाराया एकं वैशिष्ट्यं विद्यते।

मानवजीवनस्य कर्तव्यविषये वैदिकविचारधाराया दृष्टयो न सन्ति एकाङ्गिन्यः, अपितु ताः सन्ति सार्वभौमाः। परम्पराप्राप्त भारतीयदृष्ट्या वेदाःसन्ति, भ्रमप्रमादविप्रलिप्सा-कणापाटवादिपुन्दोषशङ्काकलङ्कपङ्करहितत्वेन अपौरूषेण अनादयो नित्याश्च। अतएव "वेदो खिलं धर्ममूलम्" इति मनूत्तय्यनुसारं वेदमूलको धर्मोऽपि सनातनः, अपरिवर्तनशीलश्चास्ति। अतो धर्माचरणस्य मूलमाधारो वेद एवाभिमतो अस्ति। वेदमूलकत्वादेव मनूक्ते रपि प्रामाण्य-मङ्गीक्रियते उक्तञ्च[४]—

यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः ।
स सर्वो भिहितो वेदे सर्वज्ञानमयो हि सः ।। इति

इति तत्सम्बन्धे कस्यापि क्रमिकविकासस्य हासस्य विचारस्य च कृते नास्ति किमपि स्थानम्, किन्तु वैज्ञानिकदृष्ट्यनुसारमितरमानवीयविचारधारावद्वैदिकविचारधाराऽपि सन्ति।

प्राचीनकाले वैदिकविचारधाराया भव्यभावना मानवजीवनस्य कर्त्तव्यविषयेषु आसीदति-व्यापिका। अत्र नास्ति कश्चन सन्देहलेशो यदुत्तरकालिकाभिः विभिन्नधाराभिरपि भारतीयसंस्कृतेः समये-समये महानुपकारो जातः। अथापि मानवीयजीवननिमित्तं लौकिकाभ्युदयोपयोगिशिक्षा दर्शदृष्ट्या वैदिकविचारधाराया व्यापकं क्षेत्रं न केवलं भारतीयानामेव कृतो गौरवस्यास्ति विषयः, प्रत्युत विदेशीयानामपि कृते गर्वस्यास्ति वस्तु। वैदिकविचारधाराया व्यापकं क्षेत्रं समस्ताया जातेः, सार्वभौमस्य सार्वकालिकस्य आदर्शमयस्य सन्देशस्य चोपस्थापकमस्ति।

वैदिकविचारधाराया मानवीयः पक्षो विश्वशान्तेः विश्वबन्धुत्वस्य चोदात्तया भावनया संवलितो वर्तते। वैदिकमन्त्रेषु स्थले-स्थले मानवमात्रस्य कृते परस्परं सौहार्दस्य साहाय्यस्य मित्रतायाश्च भावनानामुदात्त उपदेशो विद्यते। यथा- "पुमान् पुभांसं परिमातु विश्वतः"[५] अर्थात्

एकेनपुंसा द्वितीयस्य पुंसः संरक्षणं मानवमात्रस्यास्ति पुनीतं कर्त्तव्यम्। "मित्रस्याहं चक्षुषा सर्वाणिभूतानि समीहसे"[६] इति अर्थादहं न केवलं मानवमात्रम्, अपितु समस्तान् प्राणिनो मित्र दृष्ट्या पश्येयम्। एवमथर्ववेदेऽपि-"कृण्मो ब्रह्म वो गृहे संज्ञायां पुरुषेभ्य:"[७] इति अर्थात्-भो जना:। सर्वे वयं मिलित्वा एवं प्रार्थनां कुर्यामो येन मनुष्येषु सुमतेः सद्भावनायाश्च विस्तारः स्यात्। इत्थं मानवमात्रं प्रति कल्याणभावनायाः सद्भावनायाः सौहार्दस्य च समुद्बोधका अनेकेन मन्त्रा वेदवाङ्मये समुपलभ्यन्ते।

एवमुत्कृष्टभानवीयपक्षेण सहैव वैदिकी विचारधारा उदात्तानामादर्शानां रक्षयै वीरोचितैः संघर्षैः युद्धस्यावश्यकता भिश्नापरिचितानास्ति। "सत्यं वै देवा अनृतं मनुष्याः "इति सिद्धान्तानुसारं देवाः वास्तविकताया अनुगामिनो भवन्ति, मनुष्याश्च स्वभावतस्तत्प्रतिकूल-मप्याचरन्तीति मनुष्याणां व्यवहारः प्रायः आदर्शवादतो दूरे तिष्ठति। एवम्बिधायां परिस्थि-तौ विश्वशान्तेः विश्ववन्धुत्त्वस्य च मार्गे गन्तुमीहमानैः महापुरुषैः स्वकीयोत्कृष्टानामादर्शानां रक्षायै आत्मनोरक्षायै च विरोधिभिः सह संघर्षस्य तेषां दमनस्य, बाधकैः शत्रुभि:साकं युद्धस्थ चावलम्बनं नितरामपेक्षितं जायत इति तथ्यो ऽभिप्रायो वैदिकविचारधारया अप्रच्छन्नो नास्ति। अतो वैदिकमन्त्रेषु स्पष्टतया प्रतिपादितमस्ति यत्तया नूनमवधेयं यत् तव वास्तविक-समुन्नते वधिका शत्रवः त्वयिविजयं प्राप्तुं न शक्नुयुः "मा त्वा परिपञ्चिनो विदन्"[८] इति यो हि निष्कारणमस्मान्द्वेष्टि, अतः ते वयमपि स्वद्वेष्यं मन्यामहे, तं वयं सर्वदा विश्वकल्याण-कारिणीभ्यो शक्तिभ्यः समर्पयामः।

राजनीतिकस्यादर्शस्य सम्बन्धेऽपि वैदिकविचारधाराया व्यापिका दृष्टिरस्ति। वैदिक-विचारधारायाः सर्वतो वैशिष्ट्यं तद्व्यापक दृष्टौ निहितमस्ति। तस्या उद्देश्यमिदमेवास्ति यन्मानवः चतुर्णामपि पुरुषार्थानां धर्मार्थकाममोक्षाणामभ्युदयस्य निःश्रेयसस्य च प्राप्तिं नूनं कुर्यादिति। इत्थं वैदिकविचारधाराया व्यापिका दृष्टिः सर्वोन्नतस्य राष्ट्रस्य कृते एकं सुन्दरं निदर्शनं वर्तते।

एवं विधानां सर्वाननहितकारिणामुत्कृष्टविचाराणां भावनया ओतप्रोत वेदानामुपवृंहणा-र्थमितिहासस्य पुराणस्य च निर्माण जातमस्ति। तत्र मनोमुग्धकारिणो ज्ञानस्य विज्ञानस्य च पर्याप्ता चर्चा कृता स्ति। महिर्षिणा व्यासेनालौकिकया तपस्यया परमात्मनो नुकम्पया वेदानां यथार्थमर्थमवगत्य तत्प्रचार प्रसारयोरावश्यकतामनुभूय पुराणेतिहासयोः प्रणयनं कृतम्। वेदेषु ये विषया गूढ़तया सूक्ष्मरूपेण निर्दिष्टाः सन्ति तेषामेव पुराणेतिहासयोः प्रपञ्चः कृतो स्ति। अतएव इतिहासपुराण द्वारा वेदानामुपव्रहणस्य सङ्केतः कृतो वर्तते। यथा—

इतिहासपुराणाभ्यां वेदं समुपवृंहयेत् ।
विभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति ।।[९] इति

पुराणेन साकमितिहासस्यापि घनिष्टतमः सम्बन्धः प्राचीन ग्रन्थेषु द्वयोर्नाम सम्मिलितरूपेण सहैवोपलभ्यते यथा छान्दोग्योपनिषदि'' इतिहासपुराणं पञ्चमं वेदानां वेदम्''[१०] वात्स्यायनेन न्यायभाष्ये विषयभेदेन साहित्यस्य त्रयोभेदाः कृताः सन्ति-यज्ञोलोकचरितं व्यवहारव्यवस्थापनञ्च। तत्र यज्ञो मन्त्र ब्रह्मणात्मकस्य वेदस्यास्ति विषयः, लोकचरितमितिहासपुराणस्य विषयः तथा व्यवहारव्यवस्थापनं धर्मशास्त्रस्यास्ति विषयः। ततः स्कन्दपुराणेन लोकप्रसिद्ध्या तद् भिन्नत्वेनाङ्गीकृतम् यथा—''इतिहासपुराणानि भिद्यन्ते लोकवात्''[११] इति। अतएव शुक्रनीतौ तयोर्लक्षणं भिन्नं-भिन्नं कृतम् यथा—

प्राग्वृत्तकथनं चैव राज्यकृत्यभिषादितः ।
यस्मिन् स इतिहासः स्यात् पुरावृत्तं स एव हि।।[१२] इति
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं यस्मिन् पुराण तद्धि कीर्तितम् ।।[१३] इति

निरुक्तेऽपि—

पुराभवं पुराणम्। इति ह आस इतिहासः।। इति

अत्र पुराणशब्दस्य तात्पर्यमस्ति यत् पुराणं सदपि नवीन मस्ति। अर्थात् यत् शास्त्रं पुरातनघ्रनानां वर्णनं विदधानं सदपि वर्तमानां भविष्यन्तीं च घटनां वर्णयति तदस्ति पुराणम्, यच्च शास्त्रं केवलं प्राचीनानां मेव घटनानां वर्णनं करोति सो स्ति इतिहासः।

एवमनेकस्थलेषु इतिहासपुराणशब्दौ सहैव पृथक् वा प्रयुक्तौ स्तः। अतएव विद्वद्भिः एकं द्वितीयस्यः पूरकमङ्गीकृतमस्ति। एवमितिहासपुराणशब्दौ कदाचन भिन्नभिन्नरर्थयोः प्रयुक्तौ स्तः कदाचिदेकस्मिन्नर्थे प्रयुक्तौ स्तः। अतएव अमरकोषे मरसिंहेन यल्लक्षणमितिहासस्य कृतं तदेव लक्षणं लीलकण्ठेन महाभारतटीकायां पुराणस्य कृतम्। यथा—

इतिहास पुरावृत्तम्[१४] इति पुराणे पुरावृत्तम्

एवं पुराणे इतिहासशब्दस्य इतिहासे पुराणशब्दस्यापि प्रयोगे दृश्यते यथा—

''अत्राप्युदाहरन्तीममितिहासं पुरातनम्''।[१५]

व्यासेनापि-द्वैपायनेन यत् प्रोक्तं पुराणं परमर्षिणा।[१६]

यांज्ञवल्क्यानुसारं तु इतिहासपेक्षया पुराणस्य क्षेत्रं विस्तृतं विद्यते। तेन याज्ञवल्क्यस्मृतो चतुर्दशविद्यानां गणनाप्रसङ्गे केवलं पुराणस्यैव गणना कृता स्ति नेतिहासस्यापि,

किन्तु तत्र विद्भिः पुराणमितिहासस्योपलक्षकं भत्वा पुराणेतिहासस्यान्तर्भावं विधाय तस्यापि विद्यात्वमङ्गीकृतम्।

ब्रह्मवैवर्तपुराणीयश्रीकृष्णजन्मकूवण्डानुसारं महाभारतमितिहासः, वाल्मीकिरामायणञ्च काव्यमुच्यते परन्तु काव्यमीमांसायां राजशेखरेण इतिहासस्य द्वौ भेदौ कृतौ यथा— परिक्रिया, पुराकल्पश्च। तदनुसारमेकनायिका कथा परिक्रिया तथा अनेक नायिका कथा पुराकल्पः प्रोच्यते। यथा "परिक्रिया पुराकल्प इतिहास गतिर्द्विधा। स्यादेकनायिका पूर्वा द्वितीया बहुनायिका"[१७] इति तथायानेक नायक कथविशिष्टत्वेन महाभारतस्य एकनायक-कथासनाथत्वेन रामायणस्य च ग्रहणादितिहासपदेनोभयोरपि ग्रहणादुभयमजीतीहासत्वेन गृह्यते विद्वत्समाजे।"

कौटिल्येन तु स्वकीये अर्थशास्त्रे पुराणानां गणनां इतिहासाभ्यन्तरे कृता अस्ति। तस्य दृष्टौ इतिहासस्य क्षत्रं पुराणापेक्षयातिविस्तृतमस्ति। तेन "पुराणम्, इति वृत्तम्, आख्यानम्, उदाहरणम् धर्मशास्त्रञ्चेतिहासान्तर्गतं स्वीकृतमस्ति पुराणमितिवृत्तमाख्यायिको दाहरणं धर्मशास्त्रं चेतिहासः।"[१८]

यथा पुराणं मुख्यतया सर्गादीनां पञ्चानां विषयाणां वर्णनेन सह धर्म-दान-व्रत-तीर्थ-भक्ति-अवतारादीनामपि पर्याप्तमात्रया वर्णनं करोति, तथैतेतिहासोऽपि संस्कृतसाहित्ये न केवलं प्राचीनानां घटनानामेव वर्णनं विद्यते, प्रत्युत विभिन्नव्यावहारिक विषयाणामपि शिक्षां प्रदाय मानव हृदयस्य मोहान्धकारमपि विरस्यति, यस्य सङ्केतो महाभारते उपलभ्यते यथा—

इतिहासप्रदीपेन मोहवारणधातिना ।
लोकगर्भगृहं कृत्स्नं यथावत् संप्रकाशितम् ।।[१९] इति

अतएव महर्षिणा व्यासेन तत्र प्रतिज्ञातं यद् धर्मार्थ काममोक्षाणां विषयेत्र वर्णितमस्ति, तदन्यत्र वोपलभ्यते यदिहास्ति वर्णितं तदेवान्यत्र वर्णितमुपलभ्यते। यथा—

धर्मेचार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्तितदन्यत्र यन्नेहास्ति न तत् क्वचित् ।।[२०] इति

अतएव महाभारतसमालोचकानामपि सुनिश्चितमस्ति यत् "यन्न भारते तन्न भारते"[२१] अतो हि महाभारतं संस्कृतसाहित्यस्य सर्वाङ्गपूर्णः सर्वमानयश्च एकोऽद्भुतः इतिहासग्रन्थो स्तीति निर्विवादम्।

वेदविभाजन-महाभारतनिर्माणानन्तरं भगवता वेदव्यासेनाष्टादशपुराणानि प्रणीतानि। तत्र प्रथमं ब्रह्मपुराणम्। २. पद्मपुराणम् ३. विष्णुपुराणम्, ४. शिवपुराणम् ५. श्रीमद्भागवतम्

६. नारदीयपुराणम् ७. मार्कण्डेयपुराणम् ८. अग्निपुराणम् ९. भविष्यपुराणम् १०. ब्रह्मवैवर्तपुराणम् ११. लिङ्गपुराणम् १२ वाराहपुराणम् १३. स्कन्दपुराणम् १४. वामनपुराणम् १५. कूर्मपुराणम् १६. मत्स्यपुराणम् १७. गरुडपुराणम् १८. ब्रह्मपुराणम्।

वैदिकरहस्यमयानानामनुशीलननिमित्तं पुराणसाहित्यं नितान्त मुपादेयमस्तीति वेदेषु सूक्ष्मरूपेण वर्णितानां विषयाणामवगतये आख्यानोपाख्यानगाथाकल्पशद्यादिभिः पुराणानां प्रणयनं जातम्। इत्थं गूढ़तया निर्दिष्टानां वेदविषयाणां भाष्यरूपेण विस्तारार्थ सरलतमभाषाया माध्यमेन भगवान् व्यासदेवो अष्टादश पुराणानि विरचयाञ्चकार। यथा—

विस्ताराय च वेदानां स्वयं नारायण प्रभुः ।
व्यासरूपेण कृतवान् पुराणानि महीतले ।।[२२] इति

आनन्दकन्दः सच्चिदानन्दो व्रजेन्द्रनन्दनन्दनो गोपगोपीजनवल्लभो राधाविलासरसिको लीलापुरुषोत्तमः पूर्णषो शकलावतारो भगवान् श्रीकृष्णचन्द्रोदिव्यं चक्षुःप्रयच्छन् अनन्यसखायं भक्तप्रवरमर्जुनं यद् विश्वअपमदर्शयत् तदेव भगवता वेदव्यासेन पुराणात्मना आवालवृद्धं स्त्री-पुरुषाणां कृते सुलभमकारि। यतो हि पुराणेषु भगवतो विराट्रूपं वर्णयता तेन विश्वस्य सर्वे विषया उपस्थापिताः सन्ति। विश्वस्मिन् नेतादृक् किन्वित् तत्त्वमवशिष्टं यत् किल महर्षिव्यासप्रणीतेषु पुराणेषु नोट्टङ्कितं स्यात्। अनया विशेषतया विवेकिनो विद्वांसः कथयन्ति यद्-व्यासोच्छिष्टं जगत्सर्वम्। यथा परमकारूणिकेन महर्षिणा पतञ्जलिना प्रणीतस्य योगशास्त्रस्य अयं सिद्धान्तो अस्ति यत् समाधिका निरूद्धासु चित्तवृत्तिसु स्वयमेव सर्वद्रष्टा परमात्मा साधकस्य अन्तःकरणे प्रकाशते। यथा—"योगश्चित्तवृत्तिनिरोधः"[२३] इति तथैव पुराणानुसामानन्यथा भक्त्या भक्तस्य हृदये परमेश्वरपदोपलब्धिः स्वाभाविकी।

पुराणेषु सर्वाभीष्टफलप्रयायकाणानां देवानां देवीनां च लीलामय्यो गाथागीताः सन्ति। तपः पूतान्तःकरणानामृषीणां मुनीनाञ्चाख्यानोपाख्यानानि प्रोक्तानि, प्रख्यातकीर्त्तीनां प्रजापालकानां धार्मिकाणामुदारात्मनां पुण्यश्लोकानां नृपतीनां समुज्जलानि जीवनचरितानि च वर्णितानि सन्ति। एवं तत्र इतिहासः काव्यं कला राजनीतिः अध्यात्मकानं व्यवहारज्ञानं सर्वविधा विद्याश्च वर्णिता वर्तन्ते। पुराणेभ्यः सामान्यवर्गमारभ्य परमोच्यतमान् यावत् सर्वेषां जनानां यथाधिकारं लाभो भवितुमर्हति। पुराणेषु वर्णितं तत्त्वज्ञानं ज्ञातिशयं सुगमञ्चास्ते, प्रसादगुणश्च सर्वत्र परिपूर्णो विद्यते। अनेकशः पठितेष्वपि पुराणग्रन्थेषु पाठकानां पुनः पुनः पुराणपाठे भिअधिः वर्द्धते एव, न तेषां चिते कदाचिदपि तत्राअभिर्जायते।

पुराणानां सर्वाधिकं वैलक्षण्यं भक्तिरसास्वादनमेव विद्यते। येनाशु प्रसीदति भगवान्नारायणः। यथा—देवासुरैर्यश्यमानात् समुदाद् विभिन्नानि रत्नानि निर्गतानि तथैव पुराण-

सागरमन्थनाद् हालाहलं गरलम्, सुरा अमरकारकमगृतमपि निःससुमर्हति, ततःसुधासुधांशु अपि निर्गन्तुमर्हतः।

पुराणे गर्भविज्ञानरहस्यम् :

सृष्टिप्रपञ्चे स्त्रीपुरुषयोः पारस्परिकसम्बन्धिनो दुर्निवारः। परमपुरुषस्य परमात्मनः त्रिगुणात्मिकायाः प्रकृतेर्महामायायाः पारस्परिक युगत्रयोगे दाम्पत्यभावो विद्यते। ब्रह्मविष्णुमहेशा अपि स्वस्वशक्त्या सहैव स्वं स्वं कार्यमनुतिष्ठान्ते। तदीया शक्तिः ब्राह्मी, वैष्णवी, रौद्री माया शक्तिर्वा भण्यते। जीवधारायां तदेव शक्तिद्वयं प्रधानपुरुषात्मकं त्रिगुणं नियतकार्यकलापं कुरुते। स्त्रीपुरुषयोः सम्मेलनादेव देवमानवयोः पिण्डः प्रपूयते। देवयोनौ ब्रह्मविष्णुमहेशानारभ्य वसुरुद्रादित्यादि महेन्द्रादिकं यावत् न के अपि देवा शक्तिमन्तरेण स्वकीयं कार्यं कर्तुं प्रभवन्ति, न वा तत्पदीयोगिनो भवन्ति। तथैव मनुष्ययोनावपि मानवः सस्त्रीकः एव सर्वविधात् प्रवृत्तिधर्माननुष्ठातुमुपयुनक्ति।

अपि च पुरुषेण स्त्रीः, स्त्रिया च पुरुषः कार्यक्षमत्वं भजते, स्वधर्मपालनेनाभ्युदयति श्रेयसमार्गमपि सुगमयति। स्त्रियं विना पुरुषस्य पुरुषमृते स्त्रियो वा रक्षणमशक्यं स्यात्।

यथा सृष्टौ द्वयोः प्रयोजनं तथा सृष्टिरक्षणो स्थितावपि नितान्तमुभावश्यकौ। स्त्री खलु प्रवृत्तिधर्मपालनेन पुरुषस्याभ्युदयं विधाय निःश्रेयसं साधयति। तस्मात् स्त्रीसाहाय्यं सर्वत्रैनो-पेक्षितम्। सृष्टिकार्यं भारस्तु स्त्रीपुरुषसम्मेलनेनैव संवहति। अतएवोक्तम्—

"आब्रह्म कीटान्ममिदं निबद्धं स्त्रीपुंप्रयोणजगत्समस्तम्" सृष्टेश्चत्वारो भेदाःभवन्ति। तत्र प्रथमो भेदो यदा द्वितीय निर्गुणब्रह्मदशातो जायमानसगुणभावसम्बलितब्रह्मणो ब्रह्माण्ड-गोलक मुत्पद्यते तदासौ हिरण्यगर्भसृष्टिर्निगद्यते। द्वितीयो भेदो यदापिण्डसृष्टि प्रारभ्यते यत्कारणं पितामहो ब्रह्मा वर्तते, सा ब्राह्मी सृष्टि रुच्यते।

तृतीयोभेदो यदा—दक्षप्रजापतिसङ्कल्पन्नानावैचित्र्यमयी सृष्टिरूपजायते, एषा मानसी-सृष्टिर्मन्यते। इत्थं हि स्त्रीपुरुषसम्बन्याज्जायमाना सृष्टिमैथुनी सृष्टिरभिधीयते। अयमेव चतुर्थो भेदः। तथा च पूर्वजानां मानसादि सृष्टिसम्भवे अपि मनोबलशक्तिहासाद दक्षप्राचेतसानन्तरं केवलं मैथुनी सृष्टिरेव साम्प्रतं प्रचलति। तत्रैव च व्यस्तमस्ति समस्तं जगत्। तथाहि—

सङ्कल्यादादर्शनात् स्पर्शात् पूर्वेषां सृष्टिरुच्यते ।
दक्षात् प्राचेतसादूर्ध्व सृष्टि मैथुनसम्भवा ।।[२४] इति

स्त्रीपुरुषयो संयोगात् प्राणाकर्षविकर्षणसमन्वयेन स्वतएव पीठोत्पत्तिर्जायते उपासना-पीठानि तु विविधानि भवन्ति, यत्र पूजानुष्ठानादिकं विधीयते। दम्पत्तिसम्बन्धेन यत् पीठमुत्यचते तद्विसह्यपीठमुच्यते। तदनन्तरं च रजोवीर्यमिश्रुणेन स्त्रीगर्भे जनिष्यमाणस्य जीवस्य कृते

स्थूलशरीरात्मकगृहनिर्माणकर्तारम्भो जायते। यस्य जीवस्य कृते गृहरूपं तत् स्थूलशरीरं निर्मातुमारभ्यते, तस्य तेन दृढ़सम्बन्धेऽपि सुदृढ़ायते। अतएव जीव:तेन तेन स्थूलशरीरेणात्यन्तं परिताप्यते।

अत्र जीव: पापी वा स्यात्, पुण्यात्मा वा भवेत् देवांशजन्यो वा स्यात्, ऋष्यंवंशोत्पन्नो वा भवेत्, स्त्री वा स्यात्, पुरुषो वा भवेत्, अस्यादेव कालादारभ्य तस्मिन् स्वगृहमूले निवद्धदृष्टिर्जायते। अयम्प्रभृतय: पितृगणाश्च तत्र निर्माणे सहायका भवन्ति। यदा च तद्गृहं निवासयोग्यं जायते तदा ते तं जीवं तत्र प्रवेशयन्ति। तत: शनै: शनै: पुष्टिं प्राप्नुवन् विविधान् क्लेशो ज्ञानुभवन्। समये प्रसूतिवायुवत्त्वाद् "मानुरुददशद्वहि:निर्याति। एतदेव मातृगर्भ द्वारा मर्त्यलोके जन्मगृहणतो जीवस्य दार्शनिकं रहस्यम्।

वेद पुराणयोः पार्थक्यम् :

यद्यपि पुराणेषु वेदविहितानामेव विक्याणां विशदीकरणस्य विद्यमानत्वाद् वेदपुराणयोरैक्यमस्ति, तथापि उभयो: महदन्तरं विद्यते। वेदाद्द्विजसमुदायेषु प्रतिष्ठिता अशिक्षितासु जनतासु च अपरिमिता: सन्ति, पुर पुराणानि सर्वेषु नरेषु सर्वाषु च नारीषु विचरन्ति, सर्वेषां मनांसि अनुरज्जयन्ति सर्वपरिचयानी च सन्ति। पुराणानां कृपया एव वेदा विश्वर्तिनां सर्वविधानां नराणां नारीणां च जीवनं सन्नियम्य चरमलक्ष्ये परमतत्वे विशुद्धप्रम्णिो निर्मलानन्दस्य मार्गे उत्कृष्णकल्याणं प्रवर्तयिनुमधिकारं प्राप्तवन्त:। वेदेभ्य: पुराणानामिदं वैशिष्ट्यं विद्यते, यत्र वेदै: "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह "इत्युक्त्वा नेति नेति" च कृत्वा य: परमेश्वरो बुद्धीन्द्रियादिभिरगम्यो निर्दिष्ट:, तत्र पुराणै: तं परमात्मानं सर्वसाधारणानां बुद्धीन्द्रियादेर्विजयं वर्णयित्वा सर्वसमक्षमुपस्थाप्यते स:। वेदानां "सत्यं ज्ञानमनन्तब्रह्म पुराणेषु भक्तानां कृते न केवल माराध्यदेवस्य प्रेममयीमूर्तिरूपेण औदार्यसौन्दर्यमाधुर्यादीनां विलयंरूपेण चोपस्थितं भवति, किन्तु दीनबन्धु दीनानाथ करुणावरुणालय पतितपावनाशरणशरणानाथनाथादिरूपेणापि समये समये उपतिष्ठते। वेदेषु अब्राह्मरूपेण वर्णितं ब्रह्मपुराणेषु अनेकेषु रूपेषु आविर्भूय जीव मात्रस्य चासुषप्रत्यक्षगोचरीभवति। यथा—

अपाण्यिादो जननो गृहीता पश्यत्यचक्षुः स श्रृणो त्यकर्णः ।
सवेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरमुं प्ररूपं महान्तम् ।।[२५]

यत्र वेदानां डिडिमघोषां अस्ति, यद् ब्रह्मनामरूपाभ्यां परं विद्यते तत्र पुराणानि तं सर्वनाम्निं सर्वरूपिणं सर्वभावमपञ्च वदन्ति। वेदस्यैव ब्रह्मपुराणेषु असंख्यैरूपभावै: विभिन्नरूपेणात्मानं प्रकटयति। तदेव ब्रह्मा, विष्णु: शिव: शक्ति: गणेश: सूर्यादिश्चास्ति, तदेव राम: कृष्णो वामनो नृसिंह: मत्स्यो वाराहो बौद्धश्चास्ति तदेवेन्द्र आदित्यो यमो, वरूण:

कुवेरो भिन्नास्ति। यत्र वेदेषु ब्रह्म एकमेवास्ति तत्र पुराणेषु सर्वसम्प्रदायसिद्धान्तां विविधानां देवानां देवीनोन्योपासनां स्वीकृत्य सर्वेषां माहात्म्यं गौरवं च गीतमस्ति। एकमेव परमात्मानं विभिन्नसम्प्रदायानुसारं विभिन्ननामरूपभावैः वर्णयद्भिः पुराणैः सर्वे सम्प्रदाया एकत्वसूत्रे निबद्धाः सर्वाणि धर्ममतसाधनप्रणालीवैशिष्ट्यादीनि चाक्षुण्णानिस्थापयस्तिस्तैः तेषामान्तरिका भेदाश्च सुरक्षिताः स्थापिताः सन्ति।

पुराणेः सर्वानीतं ब्रह्म जडजगतो मानवसमाजमध्ये आनीय भगवता सह मनुष्याणां सर्वविधं व्यवधानं दूरीकृत्य मनुष्येषु देवत्वाववोधो भगवत्सत्तानुभूतिश्चोद्भाविता। पुराणानाज्जगत् न केवलं जडजगदेवास्ति, किन्तु तत् सच्चिदानन्दघनस्य भगवतो लीलाभूमिरस्ति। भगवान् विशुद्धेन सत्त्वमयेनालौकिकेन देहेनाविर्भूय अस्मिन् देवश्लाघ्ये भवभीतिभुज्जनार्थ-समुद्भवाभिर्भगवती भागीरथी कालिन्दी, सरयू-नर्मदादिभिः नदीभिः परमपवित्रे त्रव्ये भारतभूभागे भ्रमन् सर्वत्र विशुद्धसत्त्वस्याविच्छिन्नां धारां पवाहयति। पुराणानि सर्वश्रेणीमनुष्यान् भगवत आविर्भावं लीलां च दर्शयन्ति। पुराणद्वारा भारतवर्षस्यांसंख्यानां नगर-ग्राम-नदी-वन-पर्वत-सरोवर-सागरादीनां ज्ञानं भवति। पुराणेषु सर्वेषां कृते नैकमेव किमपि तीर्थं निश्चितमस्ति, किन्तु भारतस्य सर्वेषु प्रान्तेषु पवित्राणि तीर्थानि सन्ति, सर्वत्र च भगवतो लीला भवत्। एवम्पुराणानि समस्तां भारतभूमिः चिन्मयस्य भगवतो लीलाधामरूपेणोपस्थापयन्ति। पुराणानां कृपया एकैकस्य भारतवर्षवासिनः कृते सर्वा भारतभूमिः सत्त्वाकर्यास्नेहमयी, दयामयी, वात्सल्यमयी, आनन्दमयी जननीव पूज्या समादरणीया रक्षणीया चास्ति। अनया दृष्ट्या भारतभूमेः दर्शनस्य सेनायाश्च शिक्षादानं पुराणानामेव कर्त्तव्यमस्ति।

आध्यात्मिकसाधनाय बहूनि स्तोत्र कवच सहस्त्रनामादीनि पुराणेषु पलभ्यते। यत्र वेदेषु प्रकृतेर्निरूपणं विद्यते तत्र पुराणेषु अधिष्ठात्रीदेवीरूपेण प्रकृतेर्विशदीकरणं कृतमस्ति। अस्मिन्नेवाधारे महर्षिभिः स्मृतिग्रन्थेषु व्यवहारभागेषु प्राशस्त्य गीतमस्ति। तथा च वेदवेदाङ्ग-पुराणस्मृत्या दयो धर्मशास्त्राणि कथ्यन्ते। एतेषां श्रवणेन मननेन विदिध्यासनेन च प्राणिमात्रस्य अवश्यं कल्याणं भवति।

नामकरणम् :

भारतीयहिन्दुपरम्परायां "यथा नाम तथा गुण" इत्याधारेण बहुशः विचार्य कस्यापि नामकरणं क्रियते, येन तद्व्यक्तेः गुणावगुणविशेषतादीनामाभासः सहसा जायते। धर्मशास्त्रानुसरि नामकरणमेकं षोडशसंस्कारेशु अन्यतमः संस्कारो मन्यते। अतः हिन्दुसमाजे कस्यापि नामकरणं महत्या सावधानतया क्रियते। न केवलं मानवा एव प्रत्युत प्रायः सर्वे ग्रन्थलेखका कवयो अपि अस्याः प्रथाया सम्यक् पालनं कुर्वन्ति। रामायण-महाभारत-पुराण, रघुवंश,

कुमारसंभव, अभिज्ञानशाकुन्तल, शिवराजविजय-प्रतापविजय-पारिजातहरण-रूक्मिणीहरण उषापरिणयादिभिर्नामभिः तेषां काव्यनाटकादीनां प्रतिपाद्यविषयाः स्पष्टरूपेण ज्ञायन्ते।

न ध्येतावदेव लेखकास्तु स्वग्रन्थानां नायक-प्रतिनायक-तत्पात्राणामपि ईदृक् नाम कुर्वन्ति, येन तच्चारित्रिकविशेषता स्पष्टतया प्रतीयते। वाल्मीकिरामायणनायकस्य भगवतः श्रीरामचन्द्रस्य नामश्रवणमात्रेण तत् कालमर्थः प्रतीयते यत् "रमन्ते योगिनोयस्मिन् स रामः" इति व्युत्पत्यनुसारं रामो मर्यादापालकतया सर्वप्रियो भूत्वा सर्वप्राणिनां हृदयेषु रमणशीलो अस्ति, तथा रावयति सर्वं लोकमिति रावण इति विवरणानुसारं दुर्दान्तत्वात् स स्वकर्मणा सर्वं प्राणिनं रोदयत्येव।

एवं महाभारतनायकस्य धर्मराजस्य युधिष्ठिरस्य नाम्नायमर्थो व्यक्तीभवति यद् युधि-स्थिरः युधिष्ठिर इत्यनुसारं स सदा युद्धे स्थिर आसीत् तदा विविधेषु संकटेष्वपि न विचलतिस्म। तथा प्रतिनायकः दुर्योधनो दुःखेन युध्यते इति दुर्योधन इत्यनुसारं स दुराग्रही दुष्टशिरोमणिर्द्वेषी अन्यायी, युद्धप्रियपश्चासीत् तथैव दुःशासनः दुःखेन शास्यते इत्यनुसारं दुर्दान्तः निजदुष्टतया विख्यातः कौरवसभायां सत्या द्रोपद्या नग्नीकरणे आत्मगौरवमनुभवति स्म। तत्रैव भीमो अपि शत्रूणां कृते भयङ्करत्वात् स्वगदया दुष्टस्य दुःशासनस्य वक्षःस्थलं विदार्य तद्रुधिरं पातुं लालायित आसीत्, तथा न्यायिनो दुर्योधनस्योरूभङ्ग कृत्वा तद्रुधिरेण द्रौपदीकेश संयमनाय सदोद्यत आसीत्। अतः पुराणानां नामापि अन्वयार्थकं सार्थकञ्चास्ती-त्यस्य विवेचनमग्रे क्रियते।

पुराणशब्द व्युत्पत्तिरर्थश्च :

पुरति अग्रे गंच्छतीति पुरा। तुदादिगणपठितात् पुर्, आगमने इति धातोः औणादिके काप्रत्यये कृते पुरा शब्दे निष्पद्यते, यो व्ययोमन्यते। कोशानुसारं स च त्रिषु अर्थेषु प्रयुज्यते- प्रबन्धे, अतीतकाले संकटे च। तथाहि—"स्यात् प्रबन्धे पुरातीते संकटागमिके तथा "इति[२६] पुरापूर्वकात् देवादिकादण् प्राणने इति धातोः यथाद्यार्थ कृते पुराणशब्दं निष्पद्यते। अच् प्रत्ययान्तत्वाद् धनञ्जयः पुंसि इत्यनुसारं पुराणशब्दस्य पुल्लिङ्गे प्रयोगः सम्भवित्तुमर्हति, किन्तु पुराणं पञ्चलक्षणम्। पुराणं षोडशपणे पुराणं प्रसत्नशास्त्रयोः"[२७] इति "पुराणंग्रन्थ-भेदेन च क्लीवे त्रिषु "पुरातने" इत्याद्यनुसारं पुराण शब्दस्य नपुंसकलिङ्गे प्रयोगो भवति।

२. पुराभवः पुराणमितिविग्रहे "पुरा" अव्ययात् "सायं चिरंप्राह्णेप्रगे व्ययेभ्यष्टयुद्युलौ तुट् च"[२८] इति सूत्रात् टयूप्रत्ययानन्तरं ट् कारस्येत्संज्ञायां लोपे च कृते "युवोरनाको"[२९] इत्यनेन चोरनादेशे णत्वे पूर्वकालैकसर्वजरत् पुराणं नव केवला समानाधिकरणेन"[३०]

अथवा पुराणप्रात्तेषु ब्राह्मणकल्पेषु''[३१] इत्यादि पाणिनिसूत्रेषु पुराणशब्दस्य निर्देशात् निपातेन तुष्टे भावे पुराणशब्दः सिद्धयति।

३. पुरा पुरतनमनीति जीवयति बोधयति ''इति पुराणं ग्रन्थ विशेषःपुरा पूर्वकात् आदादिकात् अण् प्राणने इति धातोरचि णत्वे च कृते पुराणशब्दो निष्पद्यते।''[३२]

४. पुरा अतीतानर्था न णति कथयति इति व्युत्पत्तौ पुरा उपपदात् भौवादिकात् अण् शब्दे इति धातोः पचादित्वात् अचि प्रत्यये सति पुराणशब्दः सिद्धयति।

५. पुरा पूर्वाकणीज् प्रापणे इति धातोः औड़ादिके प्रत्यये टिलोपे णत्वे च कृते पुराण-शब्दो निष्पद्यते। अर्थात् पुरा + नी + ड + इमे त्रयोज्वथवाः मिलित्वा पुराणशब्दरूपेण परिणता भवन्ति।

६. महर्षिणा यास्काचार्येणापि स्वकीये निरुक्तग्रन्थे पुराणशब्दस्य निर्वचनं कुर्वता प्रोक्त-मस्ति यत् ''पुराणं कस्मात्'' ? पुरा नवं भवति''[३३] इति अर्थात् पुराणं कस्मादुच्यते ? अतो यद् कदापि पूर्वं नवस्यात्। निरुक्ते यास्काचार्यस्यैवं प्रकारणे निर्वचनेन पुराणे नवीवनताया भावो नास्ति, किन्तु पुराणशब्दस्यार्थः प्राचीनो अस्ति।

यद्यपि पुराणशब्दस्य पर्यायवाचिनः प्रत्न-प्रतन-पुरातन-चिरन्तनादयः शब्दाः सन्ति तथापि अत्र पुराशब्देन प्राचीनाख्यायिकादियुक्ता महर्षिव्यासद्वारा निर्मिता अष्टादशग्रन्थ एव ज्ञायन्ते। यदि पुराणं कश्चिद् नवीनं कथयति तर्हि स एव कथयितु मुद्यतो भविष्यति, यस्य पूर्वोक्तानां व्युत्पत्तिनां ज्ञानं नास्ति। विचारशीलास्तु व्युत्पत्तिमात्रत एव पुराणं प्राचीनतमं ग्रन्थविशेषं मन्यते। संस्कृतसाहित्यस्य सर्वे ग्रन्थकारा इममेवार्थं स्वीकुर्वन्ति तथा स्वयं पुराणान्यपि अस्यैवार्थस्य मान्यतां प्रददाति। तथाहि - ''पुरातनस्य कल्पस्य पुराणानि विदुर्बुधाः''[३४] इति वायुपुराणमपि प्राचीन कालतो द्यावधि जीवितं साहित्यमेव पुराणं मनुते—

यस्स्मात् पुरा हनक्तीदं पुराणं तेन कथ्यते ।
निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ।।[३५] इति

पद्मपुराणानुसारं प्राचीनां परम्परां व्यक्तीकर्तुं समर्थं शास्त्रमेन पुराणमुच्यते—

पुरा परम्परां व्यक्ति पुराणं तेन वे स्मृतम् ''इति ब्रह्माण्डपुराणे तु इतो भिन्नेव व्यत्पत्तिरूपलभ्यते-पुरा एतद्भूत् अर्थात् प्राचीनकाले ईदृगासीत्। अत एतत् पुराणमुच्यते—

यस्मात् पुरा ह्यमुच्येतत् पुराणं तेन तत् स्मृतम्''[३६] इति एवं विभिन्नेषु पुराणेषु कृतायां व्युत्पत्तौ ध्यानप्रदानेन प्रतीयते यत् पुराणस्य वर्ण्यविषयाः प्राचीन कालतः सम्बद्धाः सन्ति। अवि च पुराणशब्दश्रवणमात्रेणैव व्यासकृतानामष्टादशानां पुराणग्रन्थानां सहसा

स्मरणं जायते। प्राचीनानि सन्त्यपि पुराणानि रचनावैचित्र्य वस्तुवैचित्रत्याभ्यां सदा अभिनवानि प्रतीयन्ते। एवं सृष्टि-प्रलय-प्रसिद्धराजर्षि वंश-परम्परामनुवर्णन विशिष्टमानवानां पावनचरित्राणां च वर्णनं यस्मिन् ग्रन्थे विद्यते तत् पुराणमुच्यते।।[३७]

सन्दर्भ

१. श्रीमद्भागवते २ स्कन्दे १० अध्याये, श्लोक सं० १३-२१ पर्यन्तम्।
२. श्रीमहाभारते आदिपर्वणि श्लोक सं० २६७
३. मनुस्मृतौ २ अध्याये श्लोक सं० २७
४. ऋग्वेदे ६।७५।१४
५. यजुर्वेदे २६।१८
६. वही, ४।३४
७. महाभारते आदिपर्वे १।२६७
८. छान्दोग्योपनिषदि ७।१।२
९. स्कन्दपुराणे कुमारखण्डे ४०।१९८
१०. शुक्रनीतौ ४।९२
११. वही, ४।९३
१२. वही, अमरकोषे १।५
१३. मत्स्यपुराणे १७।६
१४. महाभारते १।१।१७
१५. काव्यमीमांसायाम् - २
१६. कौटिल्ये अर्थशास्त्रे ५।१४
१७. महाभारते १।१।८७
१८. वही, १।१।८७
१९. वही, १।६२।५३
२०. विष्णुपुराणे
२१. पातञ्जलयोगसूत्रे १।२
२२. मत्स्यपुराणे ५।२
२३. श्वे०उ० ३।१९
२४. ये०का० १५
२५. हेमचन्द्रकोषे पृ० १३, पं० ७

२६. नानार्थरत्नमालायां पृ० ६६ पं० ८ तमे
२७. अष्टाध्यायाम् ४।३।३२
२८. वही, ७।१।१
२९. वही, २।१।४
३०. वही ४।३।१०५
३१. निरुक्ते ३।९।३६
३२. मत्स्यपुराणे ५।३।७२
३३. वायुपुराणे १।२०३
३४. पद्मपुराणे १।२।५४
३५. ब्रह्माणपुराणे १।१।१७३

प्रथम अध्याय

सम्प्रति पुराणलक्षणं प्रस्तूयते

प्राय: सर्वे अपि भारतीया: पुराणशब्देन परिचिता एव सन्ति। प्रतिष्ठा इव वेदप्रतिष्ठा इव पुराणानामपि भारतवर्षे महती प्रतिष्ठा दृश्यते। तद्यथा पुराणं पञ्चमोवेद: इत्युक्तिरस्ति।

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।

बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति ।।[१] इति

इत्यनेन महाभारतगतेन श्लोकेन वेदपाठकानामपि पुराण पठन्ती मपि आवश्यकं ज्ञायते। भारतीयेषु प्रचलिता अनेके धार्मिका: सामाजिकाश्चोत्सवा: पुराणाधारेणैव। अद्यादि-प्रचलिता संल्लक्ष्यन्ते।

लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति नियमाल्लखणज्ञानस्यावश्यकत्वेन किं लक्षणकं पुराणमिति जिज्ञासायां तत्तत्पुराणेषु पुराणलक्षणवर्णनप्रसङ्गे प्रोक्तमस्तिमत् सृष्टि: प्रलय: प्रसिद्धराजवंशपरम्परा, मन्वन्तराणि देवर्षिराजवंशेषु समुत्पन्नानां विशिष्टव्यक्तीनां पावनचरित-वर्णनञ्चेति पञ्चविशया: प्रधानतया यस्मिन्ग्रन्थे विवेचिता: सन्ति तत् पुराणमुच्यते।

अपि च - पुराणं पुरातनमाख्यानमुच्यते। संस्कृते: पुराणशब्दश्चिरन्तनपर्याय:। पुराणेषु वर्तमाना, भूता, भाविनश्चार्था वर्ण्यन्ते। पुराणेषु पुराणलक्षणमित्थमुक्तम्—

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।

वंशानुचरितं चेति पुराणं पञ्चलक्षणम् ।।

अत्र सर्गो नाम सृष्टि:=जगदुत्पत्ति:। प्रतिसर्ग:=दृश्यमानस्य समस्तप्रपञ्चस्य प्रलय:, पुनश्च सृष्टि:। वंशोनाम=विश्वस्योपादानभूतानां तत्त्वानां देवर्षिमनुष्याणां चोत्पत्तिपरम्परा। मन्वन्तरं नाम=सृष्ट्यादीनां कालव्यवस्थापनम् वंशानुचरितं यथा=तत्तद्वंशभवाना मनुष्याणां, राजर्षीणां महर्षीणां च विषये यद्वक्तव्यम्, तथा च सूर्यसोमवंशयोर्विशिष्यवर्णनम् तद् विवरणोपस्थापनम् च इदं वस्तुपञ्चकं पुराणेष्वपेक्ष्यते।

वस्तु-तस्तु नैतान्येव वस्तूनिपुराणेषु वर्ण्यन्ते। इदं तु न्यूनतमं वर्णनीयम् पुराणे-ष्वितो धिकान्यपि तानि तानि वस्तूनि वर्ण्यन्ते। उदाहरणार्थं अग्निपुराणे सर्वाण्यपि ज्ञातव्य-वस्तूनि वर्णितानि येन तत् "भारतीय ज्ञानकोष:" इत्यभिधीयते।

विष्णुपुराणे-प्रथमाशस्य प्रथमेध्याये नित्यनियमनिवृतां मुनिवरं पराशरं प्रतिसर्वशास्त्र-तत्त्वसस्य मैत्रेयस्य सप्रणामप्रार्थनायाम्—

यन्मयं च जगद् ब्रह्मन् ? ·यतश्चेतच्चराचरम् ।

लीनमासीद् यथा यत्र लयमेष्यति यत्र च ।।

यत्प्रमाणानि भूतानि देवादीनाञ्च सम्भवम् ।
समुद्रपर्वतानां च संस्थानं च यथाभुवः ।।
सूर्यादीनां च संस्थानं प्रमाणं मुनिसत्तम ।
देवादीनां तथा वशान् मनून् मन्वन्तराणि च ।।
कल्पान् कल्पविभागांश्चचातुर्युगविकल्पितान् ।
कल्पान्तस्य स्वरूपं च युगधर्मांश्च कृत्स्नशः ।।
देवर्षिपार्थिवानां च चरितं यन्महामुने ।
वेदशाखाप्रणयनम् यथावदव्यासकर्तृकम् ।।
धर्मांश्च ब्राह्मणादीनां तथा चाश्रमवासिनाम् ।
श्रोतुमिच्छाम्यहं सर्वं त्वत्तो वासिष्ठ नन्दन ।।[१]

अत्र भूतानां प्रमाणं देवादीनां सम्भवः, समुद्र पर्वतादीनां भुवः सूर्यादीनां च संस्थानमिति सर्व सर्गे अन्तर्भवति। चराचरस्यप्रलयः प्रतिसर्गे, देवादीवंशःवंशे। कल्प-कल्पविभागयुगधर्मांश्च मन्वन्तरे। देवर्षिपार्थिवादीनां चरितं वेदशाखाविभागश्चेति सर्वं वंशानुचरिते अन्तर्भवति।

प्रशस्तं पुराणलक्षणमिदं किञ्चिद् पाठभेदेन एकरूपेण वा विष्णुपुराणे[२] (३।६।२४), मत्स्यपुराणे (५३।६४), मार्कण्डेयपुराणे (१३७।१३), देवीभागवते (१।२।१८), शिवपुराणस्य वायवीयसंहितायां पूर्वार्द्धे (१।४१), अग्निपुराणे (१।१४), भविष्यपुराणे (२।२५), ब्रह्मवैवर्ते (१३१।६) कूर्मपुराणस्य पूर्वार्द्धे (१।१२), वाराहपुराणे (२।४), गरुणपुराणस्याचारकाण्डे (२।२८), स्कन्दपुराणस्य प्रभासखण्डे (२।८४), ब्रह्माण्डपुराणस्यपूर्वभागे (१।३८), शुक्रनीतौ च (४।९३), समुपलभ्यते अमरसिंह प्रभृतिभिः कोशकारैरपि पुराणलक्षणं तथैवाङ्गीकृतम्। किन्तु श्रीमद्भागवतस्य द्वितीयस्कन्धे दशमाध्याये पुराणानि दशलक्षण लक्षितानि। यथा—

अत्र सर्गो विसर्गश्च स्थानं पोशगमूतयः ।
मन्वन्तरेशानुकथा निरोधोमुक्तिराश्रयः ।।
दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम् ।
वर्णयन्ति महात्मानः श्रुतेनार्थेन चाज्जसा ।।[३]

अपि च-

भूतमात्रेन्द्रियधियां जन्मसर्गं उदाहृतः ।
ब्रह्मणो युणवैषम्याद् विसर्गः पौरुषः स्मृतः ।।
स्थितिर्वैकुण्ठविजयः पोषणः तदनुग्रहः ।
मन्वन्तराणिसद्धर्मऊतयः कर्मवासनाः ।।

अवतरानुचरितं हरेश्चास्यानुवर्तिनाम् ।
सतामीश कथाप्रोक्ता नानाख्यानोपवृंहिताः ।।
निरोधो स्यानुशयनमात्मनः सहशक्तिभिः ।
मुक्तिर्हित्वान्यथारूपं स्वरूपेणव्ययस्थितिः ।।
आभासश्च निरोधश्च यतश्चाध्यवसीयते ।
स आश्रयः परं ब्रह्म परमात्मेति शब्दते ।।[४]

दशलक्षणसमन्वयः-

श्रीमद्भागवते महापुराणे एतल्लक्षणसमन्वयकारिणां विपश्चितां मतमस्ति यत् श्रीमद्भागवतस्य प्रथम द्वितीयोस्कन्धौस्त उपोद्घातस्वरूपौ। अत एतयोर्द्वयोः स्कन्धयोर्नहि लक्षणसमन्वयो भवितुमर्हति, किन्तु तृतीयस्कन्धतो द्वादशस्कन्धपर्यन्तं दशसु स्कन्धेषु क्रमशो दशानां लक्षणानां भवति समन्वयः। तथाहि—तृतीयस्कन्धे ३३ अध्यायाः सन्ति। तेषु सर्गस्य कारणसृष्टेः तत्त्वानामुत्पत्ति प्रक्रियाया वर्णनं विद्यते।

चतुर्थेस्कन्धे सन्ति ३१ अध्यायाः। येषु विसर्गस्य कार्यसृष्टेश्चराचरस्य जगतो वर्णनमस्ति।

पञ्चमे स्कन्धे सन्ति २६ अध्यायाः, यत्र तृतीयलक्षणस्य=स्थानमित्याख्यस्य जम्बूद्वीपादीना स्थितेवर्णनं जातमस्ति।

षष्ठस्कन्धे १९ अध्यायाः सन्ति, तेषु चतुर्थलक्षणस्यानुग्रहणरूप पोषणस्या जामिलादिरक्षाया पुष्टिःकृतास्ति।

सप्तमे स्कन्धे १९ अध्यायाः सन्ति। तत्र अन्तेः प्रह्लादहिरण्यकशिपु प्रभृतीनां शुभाशुभकर्मवासनाया उत्कर्षापकर्षौ वर्णितौस्तः।

अष्टमे स्कन्धे २४ अध्यायाः सन्ति, तेषु षष्ठ लक्षणस्य मन्वन्तस्य निरूपणमस्ति नवमे २४ अध्यायाः सन्ति, यत्र १-१३ अध्यायेषु भगवतो विष्णोरनुवर्तिनां सूर्यवंशसमुद्भवानां राज्ञाम्। १४-२४ अध्यायेषु च चन्द्रवंशीयानां च राज्ञां नानाख्यानोपवृंहितकथा द्वारा सप्तमलक्षणस्य ईशानुकथायाः प्रामाणिकं विवरणं विद्यते।

दशमे स्कन्धे-९० अध्यायाः सन्ति, येषु अष्टम् लक्षणस्य निरोधस्य दुष्टानां राज्ञां दैत्यानां च वधस्य निरूपणमुपस्थापितमस्ति। एकादशस्कन्धे ३१ अध्यायाःसन्ति, यत्र पुराणनवमलक्षणस्य मुक्तेः स्वस्व रूपेणावस्थितेर्विवेचनं वर्तते।

द्वादशस्कन्धे च सन्ति १३ अध्यायाः येषु दशमस्य पुराणलक्षणस्य आश्रयतत्त्वस्य परमेश्वरस्योपदेशो दत्तो अस्ति।

दशममिदमाश्रयतत्त्वमेव श्रीमद्भागवतस्यास्त्यन्तिमं लक्ष्यम्। इत्थं सामान्यतया दशानां पुराणलक्षणानां भवति श्रीमद्भागवतस्य क्रमशः दशसु ३-१२ स्कन्धेषु समन्वयः अपि च—श्रीमद्भागवतस्य द्वादशस्कन्धे सप्तमाध्याये कतिपयशब्दभेदेन भूयो दशलक्षणानीत्थं परिगणितानि सन्ति।

सर्गो स्याथ विसर्गश्च वृत्तीरक्षान्तराणि च ।
वंशो वंशानुचरितं संस्था हेतुरपाश्रयः ।।
दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः ।
केचित् पञ्चविध ब्रह्मन् महदल्पव्यवस्थ्या ।।'[५]

१. सर्गः, २. विसर्गः, ३. वृत्तिः, ४. रक्षा, ५. अन्तराणि, ६. वंशः, ७. वंशानुचरितम्, ८. संस्था, ९. हेतुः, १०. अपाश्रयः।

एभिर्दशभिर्लक्षणैर्लक्षितं साहित्यं पुराणविद्भिः विद्वद्भिःपुराणं प्रोच्यते। येषु पुराणेषु एषां दशानां लक्षणानां पृथक्-पृथक् वर्णनं विद्यते, तानि महापुराणानि इति कथ्यन्ते। येषु च पञ्चलक्षणस्यास्तिप्राधान्यं तानि लघुपुराणानि इति कथ्यनते। येषु च पञ्चलक्षणस्यास्ति-प्राधान्यं तानि लघुपुराणानि, उपपुराणानिवा प्रोच्यन्ते। तस्मादन्महदल्पव्यवस्थायाः पुराण-महापुराणव्यतस्थया च पुराणलक्षणं ज्ञेयं सर्वथा भवति। एवं दशानां सर्गादीनां लक्षणानि श्रीमद्भागवते एवमुक्तानि सन्ति।—

१. ईश्वरप्रेरणया गुणत्रय साम्यावस्थापन्नाया प्राकृतौ जायमानात् क्षोभात् महतत्त्व-स्याविर्भावो भवति, ततो हकारः तत् एकादशेन्द्रियाणि, पञ्चतन्मात्राश्च तेभ्यः पञ्चमहाभूतानि उत्पद्यन्ते। इत्येवं तत्त्वानामुत्पत्तिक्रमः सर्गः पोच्यते। तथाहि—

अव्याकृतगुणक्षोभान् महतस्त्रिवृत्तो हमः ।
भूत मात्रेन्द्रियार्थानां सम्भवः सर्ग उच्यते ।।[६]

२. परमात्मनो नुग्रहात् सृष्ट्यर्थं सामर्थ्यं प्राप्य ब्रह्मद्वारा पूर्वकर्मानुसारं सदसद्वा-सनाप्राधान्येन बीजाद् बीजमितिप्रवाहोपन्नं यत् चरा चरात्मकं जगज्जायते तद् विसर्गः कथ्यते। यथा—

पुरुषानुगृहीतानां एतेषां वासनामयः ।
विसर्गो यं समाहारो बीजाद्बीजं चराचरम् ।।[७] इति

३. वृत्तिः प्राणिना जीवननिर्वाहसामग्री। जीवननिर्वाहार्थम् चराणां प्राणिनामचराणि-भूतानि वृत्तिः। मानवा जीवन निर्वाहार्थ येषां वस्तूनामुपयोगं विधत्ते, तदेव तद्वृत्तिः। मनुष्यैः स्व स्वभावातः स्वेच्छानुसारं काश्चनवृत्तयो निश्चिताः, काश्चन च शास्त्रादेशतो गृहीताः। उभयविधाया वृत्तेरूद्देश्यं मानवजीवनस्थिति संरक्षणमेवास्ति।

वृत्तिर्भूतानि भूतानां चराणामवराणि च ।
कृता स्वेन नृणां तत्र कामाच्चोदनया अपि वा ।।[८]

४. प्रतियुगमीश्वरः पशुपक्षिमनुश्यर्षिदेवतादिरूपेणावतीर्य विविधां लीलां विद्यत्ते, वेदद्विषो निहत्य च धर्मं स्थापयति। तस्यावतार लीलाविश्वस्यरक्षार्थमेव भवति। अतो भगवन्लीलेयं रक्षाव्यपदिश्यते—

रक्षाच्युता वतारेह विश्वस्यानु युगे युगे ।
तियङ्मर्त्यर्षिदेवेषु हन्यन्ते यैः त्रयीद्विषः ।।[९] इति

५. मनुःमनुपुत्रा ऋषयो देवता इन्द्रो विष्णोरंशावतारश्चेत्येवं विधाभिः षड्भिर्विशेषताभिर्युक्तः कालो मन्वन्तरमुच्यते। मन्वन्तरेणैव सर्वोव्यवहारो निर्वहति। प्रत्येकमन्वन्तरस्याधिपतिरेकः कश्चनविशिष्टो मनुर्भवति, यस्य सहयोगिनः पञ्चान्येऽपि भवन्ति यथा—

मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वरः ।
ऋषयोंशावताराश्च हरेः षड्विधमुच्यते ।।[१०]

६+७. ब्रह्मणः सकाशाद् उत्पन्नानां भूतभविष्यत् वर्तमानानां राज्ञां ऋषीणां च सन्तानपरम्परा वंशः। तेषां वंशधराणां चरित्र चर्चा च वंशानुचरितं कथ्यते[११]—

राज्ञां ब्रह्म प्रसूतानां वंशस्त्रैकालिकौ अन्वयः ।
वंशानुचरितं तेषां वृत्तं वंशधराश्च ये ।।[१२]

८. संस्था प्रलयः, स्वभावादेव ब्रह्ममाण्डप्रलयो जायते। स च चतुर्विधः—१. नित्यप्रलयः, २. नैमित्तिकप्रलयः ३. प्राकृतिकप्रलयः ४. आत्यन्तिक प्रलयः। तत्त्वविद्भिः कविभिः प्रलय एव संस्थेति नाम्ना अभिधीयते—

नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः ।
संस्थेति कविभिः प्रोक्ता चतुर्धास्य स्वभावतः ।।[१३]

९. वस्तुतो जीव एवात्र हेतु शब्देन व्यवह्रियते। यतः स एवादृष्टद्वारा सर्गविसर्गादीनां कर्मणां भवति हेतुः कर्ता। अविद्या विवशो जीवो विविधकर्मकलापेष्वासक्तो भवति। य एनं च प्रधानतत्त्वदृष्ट्या पश्यन्ति ते तमेनमनुशयिनं प्रकृतौ शयनकर्तारं कथयन्ति। ये चोपाधिदृष्ट्या अवलोकयन्ति ते तमव्याकृतं प्रकृतिरूपं वदन्ति—

हेतुर्जीवो अस्य सर्गादेरविद्याकर्मकारकः ।
यं चानुशयिनं प्राहुरव्याकृतमुतापरे ।।[१४]

१०. यत्तिसृषु जाग्रत-स्वप्न-सुषुप्तिषु अवस्थासु ततःपरं तुरीयतत्त्वरूपेण लक्ष्यते, तदेव ब्रह्म अत्र अयाश्रयशब्देन प्रोच्यते—

व्यतिरेकान्वयो यस्य जाग्रतस्वप्नसुषुप्तिषु ।
मायामयेषु तद् ब्रह्म जीववृत्तिष्वपाश्रयः ।।[१५] इति

एवञ्च—श्रीमद्भागवतपुराणवत् ब्रह्मवैवर्तपुराणस्य श्रीकृष्णजन्मखण्डे अपि महापुराणानिदशलक्षण लक्षितानि सन्ति।

अतो विशेषरूपेण ध्यातव्यो यत् उपर्युक्तेषु लक्षणेषु दशलक्षण समन्वितं पुराणं महापुराणम्। पञ्चलजक्षणलक्षितं पुराणम् उपपुराणमिति कथ्यते तत्त्वविद्भिरिति शम्।

पुराणानां विषयाः

(क) पुराणशब्दनिरुक्तिः

भारतीयहिन्दू परम्परायां "यथानाम तथा गुणः" इत्याधारेण बहुशः विचार्य कस्यापि नामकरणं क्रियते, येन तद्व्यक्तः गुणावगुणविशेषतादीनामाभासः सहजा जायते। धर्मशास्त्रानुसारं नामकरणमेवः षोडशसंस्कारेषु अन्यतमः संस्कारो मन्यते। अतः हिन्दू समाजे कस्यापिनामकरणं महता समारोहो क्रियते। इदमेव सम्यक विचार्यपुराणविषयविवेचनात् पूर्वं पुराणशब्दस्य व्युत्पत्ति-पुरस्सरं नामकरणमपि वक्ष्यते।

१. पुरति अग्रे गच्छति इति पुरा तुदादिगणपठितात् पुर अग्रगमने इति धातो औणादिके का प्रत्यये कृ + ते सति पुराशब्दो निष्पद्यते योव्ययोमन्यते स च त्रिषु अर्थेषु प्रयुज्यते-प्रबन्धे-अतीतकाले-संकटे च।

२. पुराण पूर्वकात् देवादिकादण् प्राणने इति धातोः पचाद्यचिकृते पुराणशब्दो निष्पद्यते। "घञ् जपःपुंसि" इत्यनुसारं पुराणशब्दस्य पुलिंगे प्रयोगो भवितुमर्हति, किन्तु "पुराणं पञ्चलक्षण"[१६] पुराणं ग्रन्थ भेदे च क्लिबे त्रिषु पुरातने"[१७] इत्याद्यनुसारं पुराण-शब्दस्य नपुंसकलिंगे प्रयोगो भवति।

३. पुराभवं पुराणमिति विग्रहे "सायं चिरं प्राहणे प्रगे व्ययेभ्यष्ट युट्युलौ तुट च"[१८] इति पाणिनि सूत्रात् ट्यू प्रत्यये, टकारस्येत्संज्ञालोपे च कृते "युवोरनाकौ"[१९] इत्यनेन योरनादेशे "अट् कुप्वाङ्नुम्व्यवायेऽपि इति सूत्रेण णत्वे पुराणशब्दस्य सिद्धिः मन्यन्ते वैयाकरणाः।

४. पुरा पुरतनम् अनीति जीवयति इति पुराणं ग्रन्थविशेषः।

५. पुरा अतीतान् अर्थान् अणयति कथयति इति व्युत्पत्तौ पुरा उपपदात् भौवादिकात् अण् शब्दे इति धातोः पचादित्वात् अचिकृते सति पुराण इति।

६. पुरापूर्वकणीज् प्रपणे इति धातोः औणादिके उ प्रत्यये टि लोपे णत्वे च कृते पुराणशब्दो निष्पद्यते। अर्थात् पुरा + नी + ड = पुराण इति केचित्।

७. महर्षिणायास्काचार्येण स्वकीये निरुक्तग्रन्थे पुराणशब्दस्य निर्वचनं कुर्वता प्रोक्तमस्ति यत् "पुराणं कस्मात् ? पुरा नवं भवति।[२०] अर्थात् पुराणं कस्मादुच्यते ? अतो यत् कदापिपूर्व नवं स्यात्।

यद्यपि पुराणशब्दस्य पर्यायवाचिनः प्रत्न-प्रतन-पुरातन-चिरन्त-नादयः शब्दा सन्ति, तथापि अत्र पुराशब्देन प्राचीनाख्यायिकादि युक्तामहर्षिव्यास द्वारा निर्मिता अष्टादशग्रन्थविशेषा एव ज्ञायन्ते। संस्कृत साहित्यस्य सर्वे ग्रन्थकारा इममेवार्थं स्वीकुर्वन्ति। वायुपुराणे अपि उक्तम्—

यस्मात् पुराह्यनक्तीदं पुराणं तेन कथ्यते।
निरुक्तिमस्ययो वेद सर्वपापैः प्रमुच्यते।।[२१] इति।

महापुराणानां क्रमः-

देवीभागवते पुराणगणनाप्रसंगे महापुराणानां त्वेवं क्रमो विहितः। यथा—

म अक्षरे पुराणद्वयम् - १. मत्स्यपुराणं २. मार्कण्डेय पुराणञ्च।
भ अक्षरे पुराणद्वयम् - १. भागवतपुराणं २. भविष्यपुराणञ्च।
ब्र अक्षरे पुराणत्रयम् १. ब्रह्म २. ब्रह्मवैवर्त ३. ब्रह्माण्डपुराणिनि।
व अक्षरे पुराणचतुष्टयम् १. वायु २. वामन ३. वाराह ४. विष्णुपुराणानि।
अ अक्षरे एवम् १. अग्निपुराणम्।
ना अक्षरे एकम् १. नारदपुराणम्।
प अक्षरे एकम् १. पद्मपुराणम्।
लि अक्षरे एकम् १. लिङ्गपुराणम्।
ग अक्षरे एकम् १. गरुड़पुराणम्।
कू अक्षरे एकम् १. कूर्मपुराणम्।
स्क अक्षरे एकम् १. स्कन्धपुराणम्।

अतिसरलतया महापुराणानां नामगणनाक्रमविधायकश्लोको यथा—

म-द्वयं भ-द्वयं चैव ब्र-त्रयम् व-चतुष्टयम्।
अ-ना-प-लिं-ग-कू-स्कानि पुराणानि प्रचक्षते।।

ब्रह्माण्डेपुराणे-

१. ब्रह्मपुराणं २. पद्मपुराणं ३. विष्णुपुराणं ४. शिवपुराणं
५. भागवतपुराणं ६. नारदपुराणं ७. मार्कण्डेयपुराणं
८. अग्निपुराणं ९. भविष्यपुराणं १०. ब्रह्मवैवर्तपुराणं
११. लिंगपुराणं १२. वाराहपुराणं १३. स्कन्दपुराणं
१४. वामनपुराणम् १५. कूर्मपुराणम् १६. मत्स्यपुराणम्
१७. गरुड़पुराणम् १८. ब्रह्माण्डपुराणमिति।

नारदीयपुराणे-

१. ब्रह्मपुराणम् २. पद्मपुराणम् ३. विष्णुपुराणम्
४. वायवीयपुराणम् ५. भागवत्पुराणम् ६. नारदीयपुराणम्
७. मार्कण्डेयपुराणम् ८. अग्निपुराणम् ९. भविष्यपुराणम्
१०. ब्रह्मवैवर्तपुराणम् ११. लिंगपुराणम् १२. वाराहपुराणम्
१३. स्कन्दपुराणम् १४. वामनपुराणम् १५. कूर्मपुराणम्
१६. मत्स्यपुराणम् १७. गरुड़पुराणम् १८. ब्रह्माण्डपुराणम्।

उपपुराणविवेचनम्–

अष्टादशमहापुराणवत् महर्षिणा वेदव्यासेन अष्टादशउपपुराणमपि निर्मापितम्। तद्यथा—

१. आदिपुराणम् २. नरसिंहपुराणम् ३. स्कन्दपुराणम्
४. शिवधर्मपुराणम् ५. दुर्वासःपुराणम् ६. नारदीयपुराणम्
७. कपिलपुराणम् ८. वामनपुराणम् ९. औशनसपुराणम्
१०. ब्रह्माण्डपुराणम् ११. वरुणपुराणम् १२. कालिकापुराणम्
१३. माहेश्वरपुराणम् १४. शाम्बपुराणम् १५. सौरपुराणम्।
१६. पराशरपुराणम् १७. मारीचपुराणम् १८. भास्करपुराणञ्चेति।

औपपुराणविश्लेषणम्–

यथाष्टादश महापुराणानि अष्टादशोपपुराणानि विवेचितानि सन्ति। तथैव अष्टादशौप-पुराणानि अपि विद्यन्ते। तथाहि—

१. सनत्कुमारपुराणम् २. वृहन्नारदीयपुराणम् ३. आदित्यपुराणम्
४. सूर्यपुराणम् ५. नन्दिकेश्वरपुराणम् ६. कौर्मपुराणम्
७. भागवतपुराणम् ८. वसिष्ठपुराणम् ९. भार्गवपुराणम्
१०. मुद्गलपुराणम् ११. कल्किपुराणम् १२. देवीपुराणम्
१३. महाभागवतपुराणम् १४. वृहद्धर्मपुराणम् १५. परानन्दपुराणम्
१६. वन्हिपुराणम् १७. हरिवंशपुराणम् १८. पशुपतिपुराणम्।

एवं श्री स्वामिना ज्ञानानन्दसरस्वती महोदयेन स्वकीये धर्मकल्पद्रुमे अष्टादशानां औपपुराणामपि संकेतः कृतो अस्ति। तन्मते पञ्चप्रकारकाणिपुराणानिसन्ति।

१. पुराणानि-(महापुराणानि) २. उपपुराणानि ३. औपपुराणानि
४. उपोपपुराणानि ५. उपौपपुराणानि। इति।

केचित्तु—

पुराणानां मुख्यतया पञ्चभेदाप्रकल्पिताः। तन्मते—

१. महापुराणानि २. पुराणानि ३. उपपुराणानि ४. पुराणसंहिता
५. इतिहासश्च।

तत्र महाभारते इतिहासलक्षणोपेतमपि कर्मोपासना ज्ञानात्मककाण्डत्रयरहस्यपूर्णत्वात् सवांगपूर्ण पुराणमंगी क्रियते।[२३]

पुराणानि च लौकिकेतिहासरूपाणि नापि कल्पितगाथापूर्णानि। वस्तुतः पुराणानि ज्ञानमास्य त्रिकालदर्शिनो वेदस्य भाष्य रूपाणि।

अतएव वेदानां सर्वे मन्त्राःपुराणानाञ्च सर्वे विषयाः अपि प्रायः भावत्रितयात्मकाः।

"पुराणानां प्रतिपाद्यार्थाः"

पुराणानां विषयाः-

पुराणानां कानि सन्ति स्त्रोतांसि येषामाधारेण भगवता व्यासदेवेन तेषां प्रणयनं कृतमिति जिज्ञासायामिदमुच्यते यत् पुराणतत्त्ववेत्ता महर्षिवेदव्यासः चतुर्णाम् आख्यानानां, उपाख्यानानां, गाथानाम्, कल्पशुद्धीनां चोपकरणानां आशयमादाय अष्टादशपुराणानि विरचयाञ्चकार। यथा—

आख्यानैश्चाप्युपाख्यानैः गाथाभिः कल्पशुद्धिभिः ।
पुराण-संहितां चक्रेपुराणार्थ विशारदः ।।[२४]

आख्यानोपाख्याने-

तत्र स्वयं दृष्टार्थकथानकमाख्यानमुच्यते, परम्परया श्रुतं कथानकमुपाख्यानमाख्यायते। तद्यथा—

स्वयं दृष्टार्थकथनं प्राहुराख्यानकं बुधाः ।
श्रुतस्यार्थस्य कथनमुपाख्यानं प्रचक्षते ।।[२५]

अर्थात् यस्यार्थस्य साक्षात्कारः स्वयं वक्त्राकृतो अस्ति तदाख्यानं निगद्यते। यस्य चार्थस्य कथनं वक्त्रा अन्य व्यक्तिद्वारा श्रुतं विद्यते तदुपाख्यानं कथ्यते। एतदनुसारं मर्यादा-पुरुषोत्तमस्य श्रीरामचन्द्रस्य, सत्यव्रतस्यराज्ञो हरिश्चन्द्रस्य धर्मिष्ठस्यराज्ञो ययातेश्च कथानकं यस्य केवलं परम्परा श्रुतमस्ति, तद् रामोपाख्यानं हरिश्चन्द्रोपाख्यानं, ययात्पुपाख्यानं च उच्यते।

केषाञ्चिदविदुषा मते- भेदो य न दृष्टश्रुतकारको कारणविद्यते, अपितु महदल्पाकारको वर्तते। आकारे यत् कथानकं महदस्ति तदाख्यानं निगद्यते अपेक्षाकृतं स्वल्पाकारकम् कथानकमुपाख्यान नाम्ना प्रसिद्धः। यथा रामायणे रामस्य कथानकं व्यापित्वादाख्यानमुच्यते। तदेकदेशवर्तित्वात् सुग्रीवस्य कथानकमुपाख्यान कथ्यते।

गाथाः-

अज्ञात कर्तृकाणां लोकप्रख्यातानां केषाञ्चिद्महापुरुषाणाम् वैशिष्ट्यबोधकानां श्लोकानां संज्ञा गाथा अस्ति। प्राचीनसाहित्येषु अनेकानि एवं विधानि प्राचीनानिपद्यानि समुपलभ्यन्ते, येषां कर्तृणा नामानि नोपलभ्यन्ते। यानि केषाञ्चिद् महामान्यमहीपतीनां प्रशंसायामसामान्ये शौर्ये दानमहिम्नि च प्रतिपादितानि सन्ति। इदृशाअज्ञातकर्तृकाः परम्परया प्रचलितालोक-प्रख्याताःश्लोका गाथापदेनोच्यन्ते। पुराणगाथासु केचाञ्चिन्महापुरुषाणां सार्वभौमं जीवनदर्शनं सेक्षेपतःएकस्मिन् द्वयोर्वाश्लोक्योरभिव्यक्तीकृतमस्ति। अधिकांशतः इमा गाथा भारतीयसाहित्येषु अतीतकालतः सम्बद्धा सन्ति। तथैतिहासिकव्यक्तीनां दान महत्वाभिषेकादीनां वर्णनं कुर्वन्ति। तथा च महाभारते ययाति गाथा—

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषाकृष्णवर्त्मेव भूव एवाभिवर्द्धते ।।
यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ।
एकस्यापि न पर्याप्तं तस्मात्तृशणां परित्यजेत् ।।[२६]

वायुपुराणे पितृगाथा यथा—

एष्टव्या बहवः पुत्रा यद्येको अपि गयां व्रजेत् ।
यजेत नाश्वमेधेन नीलं वा वृषमुत्सृजेत् ।।
गयां यास्यति यः पुत्रः स नस्त्राता भविष्यति ।
गयाप्राप्तं सुतं दृष्ट्वा पितृणामुत्सवो भवेत् ।।[२७] इति।

मत्स्यपुराणे मनुमत्स्यसंवादप्रसंगे पितृगाथमुक्तमस्ति। यथा—

अपि स्यात् स कुले स्माकं यो नो दद्यात् जलाज्जलिम् ।
नदीषु बहुतोयासु शीतलासु विशेषतः ।।[२८]

विष्णुपुराणे सप्तर्षिगाथा-कार्तवीर्यगाथा च—

तत्रापि श्रूयतेश्लोको गीतः सप्तर्षिभिः पुरा ।
खट्वाङ्गेनसमो मान्यः कश्चिदुर्व्या भविष्यति ।।
नूनं न कार्तवीर्यस्य गतिं यास्यन्ति पार्थिवाः ।
यशैर्दानैस्तपोभि र्वा प्रश्रयेण दमेन च ।।''[२९] इति

कल्पशुद्धिः-

कल्पशुद्धिशब्दस्य तात्पर्यनिर्णये विदुषांमतमस्ति पारस्परिकोभेदपरकः। केचन कल्पशुद्धिशब्दस्थाने कल्पजोक्तिरितिपाठं मत्वा विभिन्नेषु कल्पेषु उत्पद्यमानानां पदार्थानां विवरणमित्यर्थं कुर्वन्ति। श्रीधरस्वामिना तु कल्पशुद्धिरित्यस्यार्थः श्राद्धकल्प इति कृतो अस्ति। समीक्षा चक्रवर्तिनः पं० मधुसूदनोझामहोदयानां तथा म०म०पं० गिरिधरचतुर्वेदानां मते कल्पशुद्धिशब्देन धर्मशास्त्रस्य सर्वे विषयाः अभीष्टाः सन्ति। कल्पस्य तात्पर्यं तौ वेदाङ्गम मन्येते।

अत्र श्रौत-गृह्य-धर्मसूत्र-सदाचार-संस्कारान्तर्भवन्ति। शुद्धिपदेन तौ षड्विधां शुद्धिं मन्यनते। तथाहि—

१. मलशुद्धिः, २. स्पर्शशुद्धिः ३. अघशुद्धिः ४. एनः शुद्धिः ५. आत्मशुद्धिः मनशुद्धिः इति।

तथा च भगवताव्यासदेवेन पुराणनिर्माणावसरप्रतिसर्गे एषां चतुर्णां आख्यानोपाख्यानगाथाकल्पशुद्धीनां सम्यगुपयोगःकृतो अस्ति। अत इमानि सन्ति पुराणां स्रोतान्सि, उपकरणानि, उपादानानि वेत्यत्र नास्ति काचित् संशीतिः। स्कन्दपुराणानुसारं पुराणेषु पञ्चलक्षणतिरिक्तो यावान् विवेच्यो विषयो विद्यते तावान् आख्यानपदेन प्रसिद्धो अस्ति। यथा—

पञ्चाङ्गानि पुराणस्य चाख्यानमितरत् स्मृतम्।[३०]

किन्तु मत्स्यपुराणानुसारम् पञ्चलक्षणमेवाख्यानकमुच्यते। यथा—

पञ्चाङ्गानि पुराणेषु आख्यानकमिति स्मृतम्।[३१]

पुराणसंहिता-पुराणमितिहासश्च–

पुराणसाहित्यस्येतिहासेन सहास्तिघनिष्ठः सम्बन्धः प्राचीनग्रन्थेषु द्वयोर्नाम सम्मिलित-रूपेणोपलभ्यते। छान्दोग्योपनिषदि इयं कथास्ति यत्—एकदा यदादेवर्षिर्नारदोब्रह्मविद्यामध्येतुं सतत्कुमारपार्श्वे उपस्थितस्तदा तेन पृष्टोयद् भवता इतः पूर्वं किं किमधीतमस्ति ? तदुत्तरे स स्वाधीत विद्यासु इतिहासपुराणयोर्नाम गृहीत्वा तत् पञ्चमं वेदं प्रोवोचद्—

ऋग्वेदं भगवो ध्येमि यजुर्वेदं सामवेदमप्यथर्वाण-
मितिहासपुराणं पञ्चमं वेदानां वेदम् ।[३२]

न्याय भाष्ये वात्स्यायनेनापि विषयभेदात् साहित्यस्य त्रयो भेदाःस्वीकृताःसन्ति।

१. यज्ञः २. लोकचरितम् ३. व्यवहारव्यवस्थापनं च। एषु मन्त्र-ब्राह्मणात्मकस्य वेदस्य विषयः। लोकचरितम्इतिहासपुराणानां विषयः। तथा व्यवहारव्यवस्थापनम्=मानवानां पुण्यपापादीनां निर्धारणञ्च धर्मशास्त्रस्यास्ति विषयः।

वस्तुतो द्रष्टुः प्रवक्तुश्च दृष्ट्या एषु भेदोनास्ति। यतो हि ते एव मन्त्राणां द्रष्टारः। इतिहासपुराणस्य, धर्मशास्त्रस्य च द्रष्टारो, वक्तारश्च सन्ति। किन्तु विषयविवेचन दृष्ट्यापार्थक्यं स्वीक्रियते। तैत्तिरीयारण्यके अपि उक्तं भाष्यकृत—

"यद् ब्राह्मणानीतिहासान् पुराणानि कल्पागाथानाराशंसी"इति तैत्तिरीयारण्यकं विवृण्वताभगवताभाष्यकृता, पुराणानि ब्रह्मादीनि यद्वा देवासुराः संयत्ता आसन्नित्यादयः, इतिहासः, "आत्मा वा इदमेवाग्र आसीत् नान्यत् किञ्चमिषदिति सृष्ट्यादिप्रतिपादकानि पुराणानि" इत्युक्तम्।

पुराणेषु योगसिद्धिविमर्शः–

भारतीयायाः संस्कृतेविद्यायाश्चावबोधार्थं पुराणं विश्वकोषभूतमस्ति। पुराणवाङ्मये बहुनामेवं विधानां विद्यानां संकेतो उपलभ्यन्ते। पुराणप्रोक्तानि अलौकिककर्मणां संज्ञा पदेनोच्यते।

कया अपि लोकातीत शक्त्या अलौकिकेन वापि सामर्थ्येन कस्यचन अद्भुतस्य पदार्थस्य यासृष्टिर्विलोक्यते, सा खलु सिद्धिसत्तानिर्धारिणी, अद्भुदपदार्थजननशक्तिनी देहेन्द्रियादिषु विलक्षणपरिवर्तनकारिणी, अलौकिकसामर्थ्यप्रकाशिकाशक्तिसिद्धिपदेन व्यवह्रियते।

महर्षिः पतञ्जलिः योगदर्शने सिद्धेः पञ्चप्रकारान् आदिशति। यथा—

''जन्मौषधिमन्त्रतपःसमाधिजा सिद्धयः''[३३]

श्रीमद्भागवते अपि—

पर कायं विशन् सिद्ध आत्मानं तत्र भावयेत् ।
पिण्ड हित्वा विशेत् प्राणो वायुभूतः षडटिग्रवत् ।।[३४]

अपि च श्रीमद्भागवते उद्धवस्य प्रश्ने भगवान् श्रीकृष्णप्रोक्तवान्—

कया धारणया कास्वित कथंस्थित सिद्धिरच्युत ।
कति वा सिद्धयो ब्रूहि योगिनां सिद्धिदोभवान् ।।
सिद्धयो अष्टादशाप्रोक्ता धारणायोगपारगैः ।
सासामष्टौ मत्प्रधाना दशैव गुण हेतवः ।।[३५] इति।

पुराणेषु शिवपुराणस्य स्थानम् :

पुराण शब्दो हि अथर्ववेदे ब्राह्मणग्रन्थेषु च सर्ग-विद्यत्यर्थे पठ्यते। महाभारते तु शब्दो यं पुरातनोपाख्यानबोधकत्वेन प्रयुज्यमानो दृश्यते। विष्णु-वायु-ब्रह्माण्डपुराणेभ्यो सर्वपुराणेषु प्राचीनतमस्यपुराणस्य जन्मकथां विद्मः। यथा—

व्यासो हि वेदान् चतुर्धा विभज्य तान् आत्मनश्चतुः शिष्यान् उपदिष्टवान्तश्चासौ कथाः आख्यायिकाः उपाख्यानानि गीतानि, लोकवादाश्च संगृस्यपुराणं नाम ग्रन्थविशेषं ग्रथितवान्। इतिहासेन च सार्धममुं ग्रन्थ रोमहर्षणम् (लोमहर्षणम्) नामपञ्चमं स्वशिष्यं पाठयामास। तदनन्तरं च तेन महाभारतम् खलु निबद्धम् इति श्रूयते किल। व्यास आद्यस्य पुराणस्य कर्ता उतनैव इति विवादस्तु अकिञ्चिकरो स्माकं इदानीं तनाय प्रयोजनाय। एतावत्तु केवलं अस्मत् प्रयोजनोपयोगी भवति यत् पुरा पुरूरूपाःपरम्परा प्राप्ताः नानाकथाः लोके प्रतीता आसन्, तांश्च उपादाय महाभारतस्य निर्माणं समपद्य। धर्म्यान् मन्त्रान् संगृह्य पुराण-निर्माणमभवत्।

पुराणानामाश्रयेणैव मानवजीवनस्य प्राथमिक्यवस्था उन्नतिप्रकारे विद्यमाना विशिष्ट-प्रकाराः, भिन्न-भिन्नजातीनां परस्परमलेनपृथग्भावः, नीतितत्वानां, धर्मतत्त्वानां, भिन्न-भिन्न-देवोपासनातत्त्वानां, निरूपणं, जीवस्येतिकर्तव्यता, समाजस्यक्रमविकासः परमेश्वरस्य सर्वत्रैकरूपेणस्थितिः सुजस्य मूलम् साधनमित्यादयो बहवो विषयाः पुराणद्वारैव मनुजाः सरलतयासुखे न च ज्ञातु शक्नुवन्ति। अपितु तानिपुराणानि भगवतावेदव्यासेन शुकाय पुत्राय रोमहर्षण शिष्याय चोपदिष्टानि। अयं रोमहर्षणश्च महानपुराणवक्ता सीदिति वायुपुराणोक्त तन्नामनिर्वचनतो ज्ञातुं शक्यम्—

लोमानि हर्षयान्चक्रे श्रोतृणां यत् सुभाषितैः ।
कर्मणा प्रथितस्तेन लोके अस्मिन् लोमहर्षणः ।।[३६]

रोमहर्षणेन तस्य सुमतिप्रभृतिभिः षट्शिष्यैश्च पुराणसंहिता द्वारा सर्वत्र भारतीयसंस्कृतेः पुराणज्ञानस्य च प्रचारः कृतः—

प्राप्य व्यासात् पुराणादि सुतो वै रोमहर्षणः ।
सुमतिश्चाग्निवर्च्चाश्च मित्रयुः शांशपायनः ।।

कृत व्रणो अथ सावर्णिः षट्शिष्यास्तस्य चाभवन् ।
शाशपायनादश्चक्रुः पुराणानां तु संहिता ।।[३७] इति

पुराणवाङ्मयं भारतीयजीवन साहित्य अस्ति अमूल्यं रत्नं तथा तीतं वर्तमानेन सह संयोजयितु स्वर्णमयी शृंखला विश्वसाहित्यस्य अक्षयभाण्डारे अष्टादश महापुराणानि, अनुपमानि सर्वश्रेष्ठानि च रत्नानि सन्ति। इमानि चास्माकं सामाजिक सांस्कृतिक, राजनीतिक, धार्मिक, दार्शनिक-जीवनं स्वच्छ दर्पणवत् प्रतिबिम्बितं कुर्वन्ति, सहैव सरलभाषया क्रमबद्ध-कथानकशैल्या च प्राचीनानि सन्त्यपि नवीनतमां स्फूर्ति सञ्चारयन्ति।

भारतीयवाङ्मये पुराणसाहित्यस्य कृते एकं विशिष्टं महत्वपूर्णञ्च स्थानविद्यते धार्मिक-परम्परायां वेदानन्तरं पुराणानामेव मान्यता वर्तते। पौराणिक ज्ञानस्याभावे वैदिकताहित्यस्या-र्थावबोधः सर्वथा सम्भवो विद्यते। यथा—

"इदं विष्णुर्विक्रमे त्रेधानिदधे पदम् समूढमस्य वां सुरे।"[३८]

अस्य मन्त्रस्यार्थो न सायणादिभाष्यैरपि सम्यक् स्पष्टीभवति, यद् विष्णुना कदा कथं केनप्रकारेण वा विश्वमिदं त्रिभिः पदैः मापितम् ? किन्तु पुराणेषु कदा बलि-वामन कथया मन्त्रार्थस्यास्य विवरणम् सम्यगुपलभ्यते, तदा सन्देहस्य कश्चनावसरो न तिष्ठति। यथा— "नमो नील ग्रीवांय"[३९] इति मन्त्रस्यार्थोमहीधरेण स्वभाष्ये कृतो अस्ति यद् विषभक्षणान्नीलं जातं कण्ठं यस्य तस्मै शिवायनमः। परन्तु अनेन भाष्यार्थेन न स्पष्टं जायते यच्छङ्करेण कदा कथं केन प्रकारेण विषभक्षण कृतम् ? किन्तु पुराणेषु समुद्रमन्थनप्रसङ्गे अस्य समाधानं सम्पूर्णरूपेण जायते। अतः पौराणिक साहाय्यं विना वेदानां गूढार्थस्य समाधानं न सम्भवति। सूत्ररूपस्य वेदस्य भाष्यभूतं पुराणमर्थपरकं भूत्वा तदुपयोगित्वं नितरां वर्द्धयति।

वस्तुतः पुराणस्य वा पुराणानां रचना कस्मिन् समये जाता ? अथा तानि एकस्येव व्यक्तेःसन्ति कृतयः। इति विषय दुरूहमेव प्रतिभाति, किन्तु वेदकालतो द्वादशशतीं यावत् सततं तेषां रचना, संस्करणं, संकलनं सम्पादनञ्च जायतेति वाचस्पति गैरोलाप्रभृतीनामस्ति मतम्।

पुराणेषु प्रायः पाणिनि व्याकरणनियमानां सर्वाधिकं पालनं दृश्यते। अतः सिद्धयति यद् इमानि पाणिनिव्याकरणनिर्माणानन्तरं निर्मितानि सन्ति। महर्षि पाणिनेःकालः चतुर्थी शताब्दी स्वीक्रियते।

केचित् तु- द्वापरस्य तृतीयचरणे व्यासदेवजायमाने सति पुराणानां रचनाकालं स्वीक्रियते। यथा श्रीमद्भागवते—

द्वापरे समनुप्राप्ते तृतीये युगपर्यये ।
जातः पराशराद्योगी वासव्यां कलया हरेः ।। इति।

अपि च श्रीमद्भागवते उद्धवस्य प्रश्ने भगवान् श्रीकृष्णप्रोक्तवान्—

कया धारणया कास्वित कथंस्थित सिद्धिरच्युत ।
कति वा सिद्धयो ब्रूहि योगिनां सिद्धिदोभवान् ।।
सिद्धयो अष्टादशाप्रोक्ता धारणायोगपारगैः ।
सासामष्टौ मत्प्रधाना दशैव गुण हेतवः ।।[३५] इति।

पुराणेषु शिवपुराणस्य स्थानम् :

पुराण शब्दो हि अथर्ववेदे ब्राह्मणग्रन्थेषु च सर्ग-विद्यत्यर्थे पठ्यते। महाभारते तु शब्दो यं पुरातनोपाख्यानबोधकत्वेन प्रयुज्यमानो दृश्यते। विष्णु-वायु-ब्रह्माण्डपुराणेभ्यो सर्वपुराणेषु प्राचीनतमस्यपुराणस्य जन्मकथां विद्मः। यथा—

व्यासो हि वेदान् चतुर्धा विभज्य तान् आत्मनश्चतुः शिष्यान् उपदिष्टवान्त्तश्चासौ कथाः आख्यायिकाः उपाख्यानानि गीतानि, लोकवादाश्च संगृस्यपुराणं नाम ग्रन्थविशेषं ग्रथितवान्। इतिहासेन च सार्धममुं ग्रन्थ रोमहर्षणम् (लोमहर्षणम्) नामपञ्चमं स्वशिष्यं पाठयामास। तदनन्तरं च तेन महाभारतम् खलु निबद्धम् इति श्रूयते किल। व्यास आद्यस्य पुराणस्य कर्ता उतनैव इति विवादस्तु अकिञ्चिकरो स्माकं इदानीं तनाय प्रयोजनाय। एतावत्तु केवलं अस्मत् प्रयोजनोपयोगी भवति यत् पुरा पुरूरूपाःपरम्परा प्राप्ताः नानाकथाः लोके प्रतीता आसन्, तांश्च उपादाय महाभारतस्य निर्माणं समपद्या। धर्म्यान् मन्त्रान् संगृह्य पुराण-निर्माणमभवत्।

पुराणानामाश्रयेणैव मानवजीवनस्य प्राथमिक्यवस्था उन्नतिप्रकारे विद्यमाना विशिष्ट-प्रकाराः, भिन्न-भिन्नजातीनां परस्परमलेनपृथग्भावः, नीतितत्वानां, धर्मतत्त्वानां, भिन्न-भिन्न-देवोपासनातत्त्वानां, निरूपणं, जीवस्येतिकर्तव्यता, समाजस्यक्रमविकासः परमेश्वरस्य सर्वत्रैकरूपेणस्थितिः सुजस्य मूलम् साधनमित्यादयो बहवो विषयाः पुराणद्वारैव मनुजाः सरलतयासुखे न च ज्ञातु शक्नुवन्ति। अपितु तानिपुराणानि भगवतावेदव्यासेन शुकाय पुत्राय रोमहर्षण शिष्याय चोपदिष्टानि। अयं रोमहर्षणश्च महानपुराणवक्ता सीदिति वायुपुराणोक्त तन्नामनिर्वचनतो ज्ञातुं शक्यम्—

लोमानि हर्षयान्चक्रे श्रोतृणां यत् सुभाषितैः ।
कर्मणा प्रथितस्तेन लोके अस्मिन् लोमहर्षणः ।।[३६]

रोमहर्षणेन तस्य सुमतिप्रभृतिभिः षट्शिष्यैश्च पुराणसंहिता द्वारा सर्वत्र भारतीयसंस्कृतेः पुराणज्ञानस्य च प्रचारः कृतः—

प्राप्य व्यासात् पुराणादि सुतो वै रोमहर्षणः ।
सुमतिश्चाग्निवर्च्चाश्च मित्रयुः शांशपायनः ।।

कृत व्रणो अथ सावर्णिः षट्शिष्यास्तस्य चाभवन् ।
शाशपायनादश्चक्रुः पुराणानां तु संहिता ।।[३७] इति

पुराणवाङ्मयं भारतीयजीवन साहित्य अस्ति अमूल्यं रत्नं तथा तीतं वर्तमानेन सह संयोजयितु स्वर्णमयी शृंखला विश्वसाहित्यस्य अक्षयभाण्डारे अष्टादश महापुराणानि, अनुपमानि सर्वश्रेष्ठानि च रत्नानि सन्ति। इमानि चास्माकं सामाजिक सांस्कृतिक, राजनीतिक, धार्मिक, दार्शनिक-जीवनं स्वच्छ दर्पणवत् प्रतिबिम्बितं कुर्वन्ति, सहैव सरलभाषया क्रमबद्ध-कथानकशैल्या च प्राचीनानि सन्त्यपि नवीनतमां स्फूर्ति सञ्चारयन्ति।

भारतीयवाङ्मये पुराणसाहित्यस्य कृते एकं विशिष्टं महत्वपूर्णञ्च स्थानविद्यते धार्मिक-परम्परायां वेदानन्तरं पुराणानामेव मान्यता वर्तते। पौराणिक ज्ञानस्याभावे वैदिकताहित्यस्या-र्थावबोधः सर्वथा सम्भवो विद्यते। यथा—

"इदं विष्णुर्विक्रमे त्रेधानिदधे पदम् समूढमस्य वां सुरे।"[३८]

अस्य मन्त्रस्यार्थो न सायणादिभाष्यैरपि सम्यक् स्पष्टीभवति, यद् विष्णुना कदा कथं केनप्रकारेण वा विश्वमिदं त्रिभिः पदैः मापितम् ? किन्तु पुराणेषु कदा बलि-वामन कथया मन्त्रार्थस्यास्य विवरणम् सम्यगुपलभ्यते, तदा सन्देहस्य कश्चनावसरो न तिष्ठति। यथा— "नमो नील ग्रीवांय"[३९] इति मन्त्रस्यार्थोमहीधरेण स्वभाष्ये कृतो अस्ति यद् विषभक्षणान्नीलं जातं कण्ठं यस्य तस्मै शिवायनमः। परन्तु अनेन भाष्यार्थेन न स्पष्टं जायते यच्छङ्करेण कदा कथं केन प्रकारेण विषभक्षण कृतम् ? किन्तु पुराणेषु समुद्रमन्थनप्रसङ्गे अस्य समाधानं सम्पूर्णरूपेण जायते। अतः पौराणिक साहाय्यं विना वेदानां गूढार्थस्य समाधानं न सम्भवति। सूत्ररूपस्य वेदस्य भाष्यभूतं पुराणमर्थपरकं भूत्वा तदुपयोगित्वं नितरां वर्द्धयति।

वस्तुतः पुराणस्य वा पुराणानां रचना कस्मिन् समये जाता ? अथा तानि एकस्येव व्यक्तेःसन्ति कृतयः। इति विषय दुरूहमेव प्रतिभाति, किन्तु वेदकालतो द्वादशशतीं यावत् सततं तेषां रचना, संस्करणं, संकलनं सम्पादनञ्च जायतेति वाचस्पति गैरोलाप्रभृतीनामस्ति मतम्।

पुराणेषु प्रायः पाणिनि व्याकरणनियमानां सर्वाधिकं पालनं दृश्यते। अतः सिद्धयति यद् इमानि पाणिनिव्याकरणनिर्माणानन्तरं निर्मितानि सन्ति। महर्षि पाणिनेःकालः चतुर्थी शताब्दी स्वीक्रियते।

केचित् तु- द्वापरस्य तृतीयचरणे व्यासदेवजायमाने सति पुराणानां रचनाकालं स्वीक्रियते। यथा श्रीमद्भागवते—

द्वापरे समनुप्राप्ते तृतीये युगपर्यये ।
जातः पराशराद्योगी वासव्यां कलया हरेः ।। इति।

शिवपुराण समीक्षा–

सार्वजनीनं हितमुपदेष्टुं प्रवृत्तानां पुराणानां नाम-क्रम-संख्या सम्बन्धे पुराणेष्वेव महानमतभेदो दृश्यते। विष्णु, पदम् श्रीमद्भागवत, मार्कण्डेय, ब्रह्मवैवर्त, कूर्म, वाराह, लिङ्ग, स्कन्दपुराणेषु चतुर्थपुराणस्थाने शिवपुराणस्योल्लेखो विद्यते, किन्तु मत्स्य, नारदीय, देवीभागवतेषु शिवपुराणस्य स्थाने चतुर्थस्य वायुपुराणस्य नामनिर्दिष्टमस्ति। एवं एतत् पुराणेषु निर्दिष्ट पुराणसूच्यनुसारं चतुर्थपुराणरूपेण द्वे पुराणेदृष्टिगोचरीभवतः—

एकं शिवपुराणं अपरञ्च वायुपुराणमिति। मुद्गलपुराणे सूभयोरेव पुराणयोः स्पष्टमुल्लेखो विद्यते। तत्र कतरद् महापुराणम् कतरच्चोपपुराणं मन्तव्यमित्यत्र किमस्ति वास्तविकं रहस्यमिति समीक्षा जागर्ति। कियन्तो विद्वांसः शिवपुराणम् चतुर्थमहापुराणम् स्वीकुर्वन्ति। केचिद् वायुपुराणमेव मन्यन्ते। कतिपये च समालोचकाः शिवपुराणं-वायुपुराणञ्चैकमेव अङ्गीकुर्वन्ति। तेषां मते शिवपुराणान्तर्गतमेवास्तिवायुपुराणम्। यतो हि शिवपुराणस्य वायवीयसंहितायां वायुप्रोक्तत्वाद् तदेव वायुपुराण नाम्ना प्रसिद्धं जातम्। बंगलाविश्वकोषकारेण च द्वयोः पुराणयोः नाम्ना एकस्यैव शिवपुराणस्य सूची प्रदत्तास्ति, तन्मते अपि शिवपुराणस्यैव नामान्तरमस्ति वायुपुराणम्, न तदस्ति भिन्न पुराणम्। तथाहि—

यथा शिवस्तथा शैवपुराणं वायुनोदितम् ।
शिवभक्तिसमायोगान्नामद्वय-विभूषितम् ।। इति

तत्र युक्तिसहं प्रमाणपुष्टञ्च। "एसियाटिकसोसायटी" कालिकातातः, आनन्दाश्रम-संस्कृतग्रन्थावलीपूनातः, म०म०पं० पञ्चाननतर्करत्न द्वारा सम्पादितबंगवासीप्रेस संस्करणतः, गुरुमण्डलग्रन्थमालायां कालिकातातश्च प्रकाशितस्य वायुपुराणविषयसूची वेंकटेश्वर-प्रेस-बम्बईतः, पण्डितपुस्तकालयवाराणसीतश्च प्रकाशितस्य शिवपुराणस्य विषयसूचीतः सर्वथा अस्ति भिन्ना। अतो वायु पुराणं शिवपुराणान्तर्गतमिति स्वीकरणं, उभयोरैवयञ्चेति। मतम् प्रामाणिकम्। तस्मात् शिवपुराणं वायुपुराणस्य विकल्पाङ्गीकरणमेव युक्ति युक्तं प्रामाणिकञ्च। किञ्च अरबयात्रिणा "अल्वेरूणिनापि स्वकीये भारत-भ्रमण" नामके पुस्तके पुराणानां सूचीद्वयं प्रदत्तम् अस्ति। तत्रैकस्यां सूच्यां वायुपुराणस्योल्लेखो विद्यते अपरस्यां च सूच्यां वायुपुराणस्य स्थाने शिवपुराणस्य नाम निर्दिष्टमस्ति।

अपि च साम्प्रतं शिवपुराण-वायुपुराणनाम्ना प्रकाशिते विषय भेदान्विते हस्तलिखिते च भिन्ने भिन्न द्वे पुराणे उपलब्धे स्तः। उभयोरपि पुराणयोराकारप्रकार वर्ण्य-विषया भिन्ना-भिन्ना उपलभ्यन्ते। अतस्तयोर्द्वयोः स्वरूपमुपस्थापयितुमत्यावश्यकं मत्वा तयोः स्वरूपं वर्ण्य-विषयाश्च पृथक्-पृथक् मन्तव्यम्।

शिवपुराणस्य स्वरूपम्–

शिवपुराणस्योमासंहितायां लिखितमस्ति यद् यस्य पुराणस्य पूर्वोत्तरखण्डे भगवतः

शिवस्य पवित्रं चरित्रं विविधैः प्रकारैः वर्णितमस्ति तत् पुराणं पुराणमर्मज्ञा विद्वांसश्चतुर्थ शिवपुराणं कथयन्ति—

यत्र पूर्वोत्तरे खण्डे शिवस्य चरितं बहु।
शैवमेतत् पुराणं हि पुराणज्ञा वदन्ति च।।[४०]

शिवपुराणं हि सप्तसु संहितासु विभक्तमस्ति।

१. विद्येश्वरसंहिता, २. रुद्र संहिता, ३. शतरुद्रसंहितासु ४. कोटिरूद्र संहिता, ५. उमा संहिता, ६. कैलास संहिता ७. वायवीय संहिता।

तद्यथा—

विद्येश्वराख्या तत्राद्या द्वितीया रूद्रसंहिता।
तृतीया शतरूद्राख्याकोटिरूद्रा चतुर्थीका।।
पञ्चमी कथिता चोमा षष्ठी कैलास संहिता।
सप्तमी वायवीयाख्या सप्तैव संहिता इह।।[४१]

तत्रापि द्वितीयायां रूद्रसंहितायां—१. सृष्टिखण्ड, २. सतीखण्ड ३. पार्वतीखण्ड, ४. कुमारखण्ड, ५. युद्धखण्ड। इमानि पञ्चखण्डानिसन्ति।

सप्तम्यां वायवीयसंहितायां अपि द्वौ भागौ अस्तः, पूर्वार्द्धमुत्तरार्द्धञ्च सप्तस्वासु संहितासु सङ्कलनया ४५७ अध्यायाः सन्ति।

शिवपुराणस्य वायवीयसंहितायाः पूर्वार्द्धे तु द्वादशसंहितात्मकस्यापरस्यैकस्य शिवपुराणस्यापि संकेतो अस्ति, यत्र लक्ष्य संख्याकाः श्लोकाः सन्ति।

तत्रशैवं तुरीयं यच्छार्वं तर्वार्थसाधकम्।
ग्रन्थौ लक्ष प्रमाणं तद् व्यस्तं द्वादशसंहितम्।।
विद्येश्वरं तथा रौद्रं वैनायकमुनत्तमम्।
औमं मातृ पुराणं तु रूद्रैकादशकं तथा।।[४२]

अपि च—

कैलास-शतरुद्र च कोटिरुद्राख्यमेव च।
सहस्रकोटि रुद्राख्यं वायवीयमतः परम्।।[४३] इति

किन्तु साम्प्रतं द्वादश संहितात्मकं शिवपुराणं नोपलभ्यते, परं भगवता व्यासदेवेन तत् एव संक्षिप्तीकृत्य सप्तसंहितात्मकं चतुर्विंशतिसहस्रश्लोकं चतुर्थं शिवपुराणम् तूपलभ्यत एव—

व्यासेन तत्सु संक्षिप्तं चतुर्विंशत्सहस्रकम्।
शैवं तत्र पुराणं वै चतुर्थ सप्त संहितम्।।[४४]

अपि च-प्रबुद्ध शैवभक्तसमाजतिरिक्त सामान्ये जनसमुदायेऽपि शिवपुराणस्य श्रीमद्-

भागवतपुराणस्य च कथाश्रवण पठन-पाठनस्य च अतीव महत्वमासीत्। एतस्मात्, कारणात् पुराणज्ञा लोककल्याणकारक सर्वोपरिशिवपुराणस्यैव महत्वं स्वीक्रियते।

जानन्त्येव तत्र भवन्तो यद् भगवान शङ्करःपरमकल्याणमयः। तस्य स्वरूपे लीलायां च परमं कल्याणकारितत्त्वं समुज्जृम्भते। अत एव बहवो मनीषिणः सांसारिकं प्रपञ्चं विहाय गाढ़भक्तिपुरस्सरं सततं शिवाराधनपरायणा दृश्यन्ते। एवं कृत्वा ते महानुभावा ऐहलौकिकं पारलौकिकं चाभीष्टं लभमाना एतादृशमानन्दमनुभवन्ति, यत् सांसारिणां कृते यावज्जीवन-मसमभवप्रायमेव। अतो भगवतः शङ्करस्य महिमा न केवलं भारते अपितु निखिले जगतीतले येन-केनापिरूपेण विद्यमाना सती स्व-स्व श्रद्धाविश्वासानुरूपं सर्वान् जनान् आप्याययति। भारते तु आकश्मीरात् कन्याकुमारीपर्यन्तम् नैकापि काचिदेवं स्थली यत्र शिवस्य तद् भक्तानां चाराधकानस्युः। ते सर्वत्र सन्ति अहर्निशं ते भगवतो निटिलेक्षणस्य गुणगणान् गायमाना लोक कल्याणं वितरन्ति। एतादृशानां महापुरुषाणां पुण्यपुज्जबलादेव स्वार्थैक तत्पराणां संसारे योग-क्षेमं पूर्यते।

अतः सर्वतोभावे सर्वसिद्धान्त समर्थितेन स्वीकर्तव्यं यत् शास्त्रेवर्णितेषु अष्टादश-महापुराणेषु, उपपुराणेषु, औपपुराणेषु शिवपुराणस्य अतीवमहत्वपूर्णस्थानमस्ति। इतिशम्।

शिवपुराणगता विषयाः–

भगवतः महत्व-सात्विक चरित्रैतिहास-विविधोदारतापूर्णानां कथानां विशदतया वर्णनं शिवपुराणस्यास्ति वैशिष्ट्यम्। अत्र शिवसम्बन्धिनां व्रतोपवास-पूजापद्धति-तपस्या-योगसाधना-दीनां वर्णनम् महदुत्कृष्टम् विद्यते। प्रसङ्गतो ब्रह्माण्ड-भारतवर्ष-द्वीप-ग्रहस्थिति-कश्यपपत्नी-नामपत्यवर्णनमिक्ष्वाकुवंश-मनुवंशवर्णनं च मनोहरं विद्यते। जन साधारणानामशिवं समयितुं शिवमाहात्म्य प्रतिपादकस्य शिवपुराणस्य पठन-पाठन-श्रवण-मननैः विविध तापसंतप्पानां प्राणिनां स्वान्ते शान्तिरूपजायते। अतएव बहवो मनीषिणः सांसारिकं प्रपञ्चमपहाय गाढ़ भक्तिपूर्वकं भगवतः निटिलाक्षस्य गुणगणान् गायमानाः शिवाराधन तत्पराः ऐहलौकिकं-पारलौकिकं च अभीष्टं लभमानाः परमानन्दमनुभवन्तो अनुदिनं लोककल्याणं कुर्वन्ति।

अत्र हि साम्प्रतिके युगे भगवता द्वैपायनव्यासेन विरचित समुपलब्धस्य शिवपुराण (चतुर्थ) सप्तसु संहितासु विभक्तमस्ति। तद्यथा—

विद्येश्वरसंहिताः–

शिवपुराणस्य आद्यांयांविद्येश्वरसंहितायां सन्ति बहुशो वर्णिता विषयाः किन्त्वत्र विशिष्ट-विशिष्ट विषयाणांसूची संक्षिप्य मया प्रस्तूयते। तद्यथा—

१. तीर्थराजप्रयागे मुनियज्ञावलोकनार्थ समागताय सूताय कलिदोशैः क्षीयमाणे वर्णाश्रमे धर्मे नृणां श्रेयः साधनमधि जिमिषूणां मुनीनां प्रश्नस्योत्तरे शिवपुराणस्य कलिकल्मष-

ध्वंसित्ववर्णनानन्तरं, संहिताभेदनिरूपणम्। शिवलिङ्गस्य अर्चनान्मुक्ति प्राप्तिः, तथा विविध-प्रकारैः पुष्पैर्विल्वपत्रैश्च पूजने फल वर्णनम्। भस्मरूद्राक्षधारण महत्वकथनं। शिवनिर्माल्य भक्षण निर्णयः। पार्थिवेश्वर पूजनम्। परस्पर ईश्वरत्वाभिमानिनोः विष्णुः-ब्रह्मणोराहवेक्षिप्तमाहेश्वर पाशुपतास्त्र भीतानामराणां कैलास गमनम् विदिताभिप्रायस्य शम्भोः समरमागत्यानलस्तम्भा-विष्कारेण विमनस्कयोः विष्णु-ब्रह्मणोः स्तम्भप्रमाणज्ञाने प्रवृत्तिः। तदनुपलब्धो केतकीपुष्पस्य कूट साक्षित्वं विधाय दृष्टव्यापारो हम् इति ब्रह्मोक्तया विष्णुना ब्रह्मगौरव स्वीकार स्ततः प्रसन्नस्य शम्भोर्विष्णवे स्व साम्यप्रदानम्। शिवाक्षया विधिवधे प्रवृत्तमवलोक्य भैरवमच्युतेन प्रार्थितस्य शम्भोर्यसेतरत्रापूज्यत्वं विधाय विधावनुग्रहः केतकीपुष्पस्य च स्वान्यत्र स्वीकारः।

विष्णुविधिभ्यामर्चितो अर्चनादिवसं शिवरात्रिसंक्षितम् महाफलप्रदमभिधानस्वस्य ईश्वरत्वमभिदधे महेश्वरः इति कथानकम्।

पार्थिवपूजनप्रकारं प्रदर्श्य अमुकामुकसमये मुकामुक फलप्राप्तिरिति वर्णनम्। वैदिक विधिना पार्थिवपूजाप्रकारं अभिधाय कामनानुरोधेन लिङ्गसंख्याविधानं प्राकाराणतरेण तदर्चा-विधानम्। रूद्राक्षमहिमा, धारणविधिश्चेत्यादयो विषया अतीव स्पृहणीयमस्ति।

रूद्रसंहिताः–

१. सृष्टिखण्डे–

निर्गुणस्य शिवस्य शक्ति सम्बन्धेन प्रपञ्च निर्माणवर्णनम्। शिवदर्शनार्थं स्थितयो ब्रह्म-विष्णवोरोङ्कारनाद श्रवणम्। ब्रह्माण्डोत्पत्तिः। पञ्चवक्त्र शिवसगुणमूर्तिप्रादुर्भावः। ततो वेदाधिगमः लिङ्गपूजैव शिवसृष्टौ कारणम्। पुष्पविशेषैलिङ्गपूजने फलविशेष कथनम् ततो अनेकविध सृष्टि वर्णनम् निरूपितमस्ति।

२. सतीखण्डे–

दक्ष प्रजापते पुत्र्या भगवत्या सत्याः पावनं चरित्रम् अनेकविधैः विविधकामनाप्राप्ति-भिश्च ४३ अध्यायेषु निरुपितमस्ति। तत्रैव दक्षकनयाया रत्यासह मदनस्य विवाहवर्णनपूर्वकं सतीशिवयोर्विवाहोत्सवानन्तरं लीलया पृथिव्यामहतोः तयोः वने वियुक्तस्य श्रीरामचन्द्रस्य परीक्षायाः अतीव मार्मिकः प्रसङ्गो वर्णितो अस्ति। तमेवाधारीकृत्य गोस्वामिना श्री तुलसीदासेन आत्मीये रामचरितमानसे मार्मिकं वर्णनं कृतमस्ति। पितुर्यज्ञे गतायाः सत्या दक्षावमानः, सर्वदेवानां तिरस्कारवर्णनम्, दक्षाय सत्या शिव माहात्म्य कथनम्। तत्रैव योगाग्निना सती शरीरत्यागेनपवित्रपातिव्रत्यधर्मस्य अद्भुतमुदाहरणं प्रस्तुतं वर्तते। दक्षप्रजापतिस्वस्यैव दुष्कृत-प्रभावात् (शिवविरोधात्) वीरभद्रेण निहितशिरसः। तज्जनित दुःखेन खिन्नस्य ब्रह्मणोः देवैः सह वैकुण्ठगमनम् दक्ष संजीवनं, यज्ञसंधानाम देवैः सह कैलासगमनम्। शिवप्रसन्नार्थं विविधविधस्तुतिः। वीरभद्रदग्धः शिरसः प्रजापतेर्वस्तशिरः सन्धानाज्जीवनोपाय कथनम्। यज्ञानुसन्धानं सतीखण्ड श्रवणपठनफलप्राप्तिकथनम् वर्णितमस्ति।

३. पार्वतीखण्डे–

शिवपुराणस्य पार्वतीखण्डे ५५ अध्यायेषु पर्वतराज हिमालयस्य भार्यायां मेनायां द्वितीये जन्मनि पार्वतीनाम्ना प्रसिद्धायास्तस्या पूर्वपतिं भगवन्तं शिवं पतिरूपेण पुनः प्राप्तु घोरतपश्चर्यानुष्ठानसमयेकामदहनम्। परीक्षायै समागतेन जटिल ब्रह्मचारिवेषेण शिवेन सह भगवत्याः=पार्वत्याः सम्वादो अत्यन्त रुचिकरो वर्णते। यस्य शब्दतो अर्थतश्च कुमारसम्भवे महाकाव्ये कविकुलकलाधरेण महाकविना कालिदासेन स्वीक्रीये ग्रन्थे स्पष्टतरःप्रभावो प्रतिष्ठापितः।

ततः शिवपार्वती विवाहविधिवर्णनम्। वधूवरयोर्यात्र प्रसङ्गे मेनायाः पार्वत्यैः शिक्षण-व्याजेन पातिव्रत्यधर्मस्योपदेशः। लौकिकरीत्यापि सर्वविवाह कृत्यं निर्वत्य शिवाशिवयोः कैलासगमनमित्या इत्यादयो विषयाः वर्णितमस्ति।

४. कुमारखण्डे–

शम्भोर्दिव्यवर्षसहस्रं गिरिजया सह लीलाविहारवर्णनं तारकार्दित सुराणां विष्णुपुरोगानां शिवसन्निधौ दुःखनिवेदनम्। ततः क्रमशः २० अध्यायेषु कार्तिकेय जन्मकथाप्रसङ्गः ततः हरब्रह्मादि देवानां स्वा स्वायुधप्रदानपूर्वकं कार्तिकेयाभिषेककरणम्। तारकेण सहेन्द्रादि देवानां युद्धवर्णनम्, ततः देवासुरसंग्रामः तारकेण वीरभद्रविष्णोर्घोरयुद्धम्, स्वामीकार्तिकेय द्वारा तारकवधः। कुमारे बाण प्रलम्बबधः ततः देवः प्रीतः सन् शिवाशिवसहैव कार्तिकेय स्तुतिः।

गणेशोत्पत्तिः तस्यकाये गजमुखस्ययोजनम्, गणेशपूजाप्राथम्य निरूपणम् तद्विवाहादिकं च मनोहारि रूपेण वर्णितमस्ति।

५. युद्धखण्डे–

त्रिपुर, विद्युन्माली कमलाक्षतपःप्रीतेन ब्रह्मणा वर प्रदानम्। तारकार्दित देवानां तद्‌बधाय शिवस्तुति, शिवोपदेशात् देवानां विष्णुप्रार्थनम् त्रिपुरमोहनार्थं विशणुना निजस्योत्पादनम्, नियम-धर्मवर्णनं, त्रिपुरवधाय विश्वकर्मारथनिर्माणम्, शिवस्य युद्धयात्रावर्णनम्, त्रिपुरदाहवर्णनं रूद्रनेत्रोत्थवाहिनना समुद्राज्जलन्धरोत्पत्तिः। कालान्तरे रूद्रेण जलन्धरवधः। शंखचूड़वध प्रसंगः, पार्वतीप्रस्वेदतो अन्धकजन्म शिवद्वारा तस्य हिरण्याक्षायदानं तुलसी-वृन्दादिसतीनां प्रसंगः शिवशूलाग्रप्रोतान्धकस्य त्रिसहस्रवर्णपर्यन्तम् तपश्चरणं, वाणपुत्री ऊषा, अनिरुद्धप्रणयप्रसंगः, महिषपुत्र गजासुरस्य वधः, श्रीगौरी द्वारा विदलोत्पल दैत्यवध वर्णनम् च सुष्ठु निरूपितमस्ति।

शतरूद्र संहिता :–

अस्यां संहितायां मुख्यत्वेन वर्ण्य-विषयाणां क्रमः ४२ अध्यायेषु क्रमशः शिवस्याष्टमूर्ति वर्णनप्रसंगः, द्वन्द्वप्रजासिसृक्षु ब्रह्मणः तपश्चरणं, अष्टाविंशति द्वापरपर्यन्त शिवावतार-

कथनम्। कालभैरवउत्पत्तिः नृसिंह चरिते श्रीमहादेवस्य प्रतिवचनं, उग्रतपोनिरतं विश्वानराख्य मुनिं प्रातिशम्भोः प्रतिज्ञा दुर्वासाम्बरीष प्रसंगः, भगवतः मोहिनी स्वरूपवर्णनम्, समुद्र-मन्थनप्रसंगः, पिप्पलायावतारः, इक्ष्वाकुवंशवर्णनम्। पार्वतीप्राप्तीच्छया शम्भोः सुनर्तकरूपेण तस्या याञ्चा, अश्वत्थामस्येण शंभोरवतारवर्णनम्, किरातवेशधारेण शिवेन सह अर्जुन युद्ध वर्णनम्। अर्जुनाय पाशपतास्त्रप्रदानम्। श्रीशम्भोर्द्वादशज्योतिर्लिङ्गावतारवर्णनम्।

कोटिरूद्र संहिता :–

शिवपुराणस्य चतुर्थीकोटिरूद्रसंहितायां क्रमशः—लिङ्ग माहात्म्यवर्णने द्वादशज्योतिर्लिङ्गवर्णनम्। काशीस्थलिंगानां वर्णनम्, अनसूयादितपो वर्णनम्, नन्दिकेश्वरमाहात्म्य, वैशाख-माहात्म्यवर्णनम्, गोवर्णक्षेत्रस्थ लिङ्गमाहात्म्यवर्णनम्, अन्धवेश्वरमाहात्म्यं सोमेश्वरमल्लि-कार्जुन, महाकाल, ओंकारेश्वर, वेदारेश्वर, भीमेश्वरादिलिङ्गानां विवेचनम्। शिवसहस्रनाम-वर्णनम्, शिवरात्रिमहिमानिरूपणं, शिवस्य सगुण-निर्गुण भेदवर्णनमतीवरुचिकरं वर्णितमस्ति।

उमा संहिता :–

पञ्चमी उमासंहितायां श्री उपमन्यु-कृष्णसम्वाद वर्णनम्, श्रीशिवेन, श्रीद्रौपद्याभीष्ट-वरप्रदानम्, दाशरथे (श्रीरामचन्द्राय) वरं प्रदानं, तेन च रावणं विजित्य जानक्युपलब्धिः, मायावर्णनम्, पापभेदाद्, विविधनकराणां नरक यातनानां च वर्णनम्, दानमहिमा, तर्पणमा-हात्म्य, कर्मानुसारिजीवानां फलभोगवर्णनम्, ब्रह्माण्डवर्णने सप्तद्वीपवर्षाणां च वर्णनम्, ग्रहाणां स्थितिः मानवजन्मप्राशस्त्यवर्णनपूर्वकं शिवलोक प्राप्तिवर्णनम्। नारस्य स्त्रीत्वप्राप्ति-वर्णनम्, मृत्युकालज्ञानवर्णनम्, चतुर्दशमन्वन्तरानुकीर्त्तनम्, सूर्य-संज्ञा वर्णनम्, पितृश्राद्ध-पितृसर्गादीनां वर्णनम् सत्यवत्यां पराशरात् व्यासोत्पत्ति कथनम्, देवी चरित्रवर्णने सुरथ-समाधि कथानकं, महिषासुरकथाप्रसंगः, शुम्भ-निशुम्भ वर्णनम्, धूम्रलोचन-चण्ड-मुण्ड कथादशमहाविद्योत्पत्तिः, ज्ञान-क्रिया-भक्तियोगवर्णनम् प्रतिमास्थापनादिकञ्च निरूप्यन्ते।

कैलास संहिता :–

कैलाससंहितामाहात्म्यवर्णनोत्तरं काशीक्षेत्रवर्णनम्, पार्वतीमन्त्रदीक्षावर्णनं दीक्षाग्रहणे ॐकारमाहात्म्य कथनं, पूजास्थानमण्डपनिर्माणविधिः, षोडशोपचार पूजाविधानकथनम्, प्रणवविधानोक्तिः लिङ्गपूजाविधिवर्णनं नान्दीश्राद्धब्रह्मयज्ञादिविधिवर्णनम्, प्रणवजप-रात्रौ गायत्रीजपविधि उपासना, सृष्टि, सगुणस्वरूपवर्णनञ्च, शिवशक्तयोस्वरूपवर्णनम्। पतीनां गुरुत्व, शिष्यत्वकरणविविधवर्णनम्, क्षौर-स्नानविधिः, यतीनां अंत्येष्टिसंस्कारविधिः, कथनम् महन्महत्वधायकमिति।

पूर्व भागः - १

वायवीय संहिता :–

अत्र सप्तम्यां वायवीय संहितायामपि अन्य संहितावत् विविध विषयानां विवेचनम् दृश्यते। यतो हि—

वेदादि चतुर्दशविद्याविर्भावकथनम्, पुराणसंख्यालक्षणादि वर्णनम्, शिवकृपात: जीवानां मुक्ति:, पशुपति शब्दार्थविवेचनम्, शिवानुगतकालकथनम्, ऋषीणां वायुंप्रति शिवस्य क्रीडा विषयक वर्णनम् भूतपिशाचासुररक्षसां उत्पत्ति वर्णनम्, प्रतिकल्पे रूद्रोत्पत्तिकथनं अर्धनारीश्वररूपेण सृष्टि कल्पना, दक्षादीनां चोत्पत्ति कथनम्। सती कथानकम्, वीरभद्रोत्पत्ति:, तपस्तप्तुं मन्दराचले शिवस्य गमनं, कालीव्यभिहितां शिवा वर्णनम् वागर्थाविव विश्वस्य शिवाशिवयो: सम्बन्धकथनम्, मोक्षप्रापके श्रेष्ठत्वेन शैवधर्मस्य चर्चा, पाशुपत व्रतविधि:, भस्मधारणमहिमा कथनं, उपमन्यु चरित्रिर्णनं शैवागम वर्णनम्, उपमन्योवरप्रदानपुरस्सरं शिवस्य सवलोकगमनादिकश्चान्ये विषया अतीवमनोहारिरूपेण वर्णितानि सन्तीति दिक्।

उत्तरभाग- २

वायवीय संहिता :-

सप्तभ्यां वायवीयसंहितायां शैवतन्त्रसम्बद्धाया उपासनापद्धते र्विशदं विवेचनं शैवागमसिद्धान्तानां निरूपणं, शैवतान्त्रिकाणां मनो विनोदाय परमं साधनमुपयोगि च वर्तते। तथाहि—

पुत्र कामनया शिवसन्निधि गतस्य श्रीकृष्णस्य पाशुपत व्रतस्य विधि:, कथनं, ऋषिप्रश्नानुसारं पाशुपत ज्ञानस्योल्लेख:। सर्वं शिवमयं जगत् इत्यस्य विवेचनम्। शिवस्य-सर्वमयत्वम्। शिवद्वारेव जगत: उत्पत्ति कथनम्, वेदान्तानुरोधेन शिवतत्त्वज्ञानम्, युगे-युगे शिवस्य योगावतारा:, गौरीपूजने शिवस्यैव प्राध्यान्यम् "नम: शिवाय" इति पञ्चाक्षर महामन्त्रस्य माहात्म्यकथनम्, पञ्चाक्षर मन्त्र द्वारैव कालिकलुष विध्वंसनम्। पञ्चाक्षरमन्त्रजपविधानम्, शिवदीक्षाविधानम्, गुरो: शिष्ययोग्यताविचार:, साधक संस्कारमन्त्रमाहात्म्यम्, आचार्य महत्त्वम्, नित्य नैमित्तिक कर्मानुष्ठानं, शैवागमोक्तपूजाविधिकथनम्। शैवानां लिङ्ग-पूजाविधानम्। पूजोपकरणानां विधिवत् विवेचनम्, शिवलिंगपूजनेने उग्रतम पापस्यविध्वंसनम्, अग्निकार्ये कुण्डादिविधानकथनम्, शिवपुराणोक्तपूजा जपहोम-तप-दानादि कथनम्, नित्य-कर्मणां लिङ्गबेर प्रतिष्ठाविधानम्, शिवस्य सपरिकर लिंगप्रतिष्ठापनविधि: कथनम्, शिवध्यान-योगस्य वर्णनम्, नैमिषारण्ययात्रावर्णनम्, स्कन्दसर: सविधमागतस्य ऋषिभ्य: शैवज्ञान-प्राप्तिकथनं शिवपुराणमाहात्म्यनिरूपणञ्च महानुल्लासकरो विद्यते। शिवपुराणस्याश्रय: सर्वेषां प्राणिनां महानुपकारी शिवभक्तिसाधक: सकलतापवारवश्चेति सिद्धान्तितम्। यथा—

शैवं पुराणमिदमात्मविदां वरिष्ठं,
सेव्यं सदा परमवस्तु सतां समर्च्यम् ।
तापत्रयाभिशमनं सुखदं सदैव,
प्राणप्रियं विधिहरीश मुखमराणाम् ।। इति

पुराणैः सह तन्त्रागम सिद्धान्तस्य सम्बन्धः

इत्थं हि समूलमिद प्रमाणयितुं शक्यते यत् पौराणिका शिवस्य स्वरूपउपासनाया-श्चप्रायः सर्वेप्रधानांशा वैदिकरूद्रस्वरूपात् तदुपासनायाश्चैव गृहीताः विद्यन्ते। स्वयम् "शिव" इत्यभिधानमपि वैदिकरूद्रस्य प्रशस्तिपरं विशेषेणमेवेति मन्ये यत् प्राथम्येन यजुर्वेदे प्राप्यते। शिवस्यान्येषां नाम्नामभ्युदयो अपि वैदिकाधारे एव जातभित्यत्र शङ्कायाः लेशावसरोनास्ति। शिवसय त्रयाणां नेत्राणामुपमा "त्रयम्बक" इत्यनेन सम्पन्नम्। नीलशिखण्डोपाधो शिवस्य त्रयाणां नेत्राणानमुपमा "त्रयम्बक" इत्यनेन सम्पन्नम्। नीलशिखण्डोपाधौ शिवस्य हालाहल-विषपानस्य पौराणिक कथाबीज प्राप्यते। अयमुपाधि यजुर्वेदे "नीलग्रीव" इत्यनेन दीयते। कपर्दिन् "केशिन्" प्रभृत्युपाधिभिः परिवर्तिकालिक शिवस्य जटामण्डितरूपस्य कल्पना समजनि। "केशिभिः मुनिभिश्च सह वैदिक रूद्ररूपस्य प्राक्तन साहचर्य रूपेण पुराणकालिक शिवस्य यौगिकक्रियाभिः सम्बन्धः, तस्यमहायोगिरूपस्य च उत्पत्तिः समजनि वैदिकरूद्रस्यावासः उत्तरीय पर्वतेषु स्वीक तत्वादेव परिवर्तिसमये शिवावासः कैलासे प्रतिष्ठापितः। यजुर्वेदस्य "शतरूद्रिय" स्तोत्रे रूद्रधनुषःपिनाके अत्यभिधानेनागामिकाले, सैव संज्ञा तद्धनुषः समपद्यत। वैदिकरूद्रस्यैको न्यउपाधिः कृतिवासा इवेति। एतेनैव पौराणि कशवस्यापिकृतिः, धृगित्येदं नामसार्थकं भवति। एवं दृश्यते हीदं यत् कथमनादिरूद्रोपासना परम्परा इदानीमपि याथातथ्येन प्रचलति। एतेन आगमिकशैवागमस्य मन्त्रस्य च तद्रूपं निर्ममे। यत्रानेके विश्वासा परम्पराश्च प्रतिष्ठापि पास प्रतिष्ठापिताः वभुवुः। अतः यावत्यः परम्परा अनादिकालतराभ्य इदानीं यावत् शिवोपासनायां प्रचलन्ति, सन्ये तावत्तयः परम्परा नान्यस्मिन् धर्मर्णि समजनीत्यसंशयम्।

आगमिक, पौराणिकशैवधर्मस्य च केचनपक्षाः एतादृशाः अपि सन्ति, ये वैदिक-रूद्रोपासनायां प्रायः नैवलभ्यन्तो। यथा लिङ्गपूजायाः प्रकारः वेदेषु न दृश्यते, परं वेदोत्तर-कालादारभ्य अद्यावधिसा शिवोपासनायाः प्रमुखतमा पद्धतिः दृश्यते। यद्यपि अश्वमेध यज्ञेषु यज्ञीय पशोः लिङ्गपूजा प्रचलिता सीत्, तथापि स्पष्टतया लिङ्गपूजायाः वेदेषु अनुपदेशात् नैतेन पश्चात्कालिकी लिङ्गपूजापद्धति योजयितुम् शक्यते। शक्तिपूजा नामापरं वैशिष्ट्यं वेदोत्तर रूद्रोपासनायाः दृश्यते। यजुर्वेदस्य प्रथमकाण्डे अष्टमेसूक्तेषष्ठतन्त्रे त्र्यम्बक होमे रूद्रेण सह एकस्याः स्त्रीदेवतायाः अम्बिकायाः समुल्लेखो विद्यते, या च तस्य भगिनीत्वे-नावतिष्ठते, परं ततो न्यत्र अम्बिकाया काप्युल्लेखो न जातः। अतः तस्या अकिञ्चित्करमेव महत्वं कल्पनीयम्। एतदतिरिक्तं वेदोत्तरकाले शक्तेः सर्वप्रधान देवेष्णग्रगण्यत्वेन प्रतिष्ठा वरीवर्ति। शक्तेः माहात्म्यं शिवेनान्यूनम्, तत्समम्, क्वचिदधिकं वा विद्यते। अतः स्वातन्त्र-रूपेण उपासना वहोःकालात् प्रचलति। अवश्यमेव यजुर्वेदीया अम्बिका नैतत्स्वरूपमधिरोहति। अतः वेदादन्यस्यास्तस्या प्रतिष्ठाप्य अन्वेषणं अद्यापि शक्तिपूजा प्रकरणे कर्तव्यमिति यतो लोकाः तं स्वीकुर्युः इति।

तन्त्रागमे देवालयानां निर्माण तत्र शिवस्य लिङ्गानां स्थापनम् अन्येषाम् वा देवानां स्थापनं पूनं वेदेषु क्वचित् साक्षात् निरूपणाभावे अपि उत्तरवैदिककाले लब्धप्रतिष्ठापकं दृश्यते। वैदिकयुगे दीर्घसत्रावसायिनां यज्ञानाम् यज्ञमण्डपानाञ्च निर्माणानि भवन्तिस्म। पर परवर्तिकाले अत्युत्कृष्ट देवालयानां तत्र देव मूर्तीनां प्रतिष्ठापनेनेदं कल्पनीयं भवति, यद स्या परम्पराया: प्रादुर्भाव: वेदोत्तरकाले एव समजनि। इदं च तृतीयं वैशिष्ट्यम्, वेदोत्तर-कालस्य संलक्ष्यते। एवं हि—

रूद्रोपासनाया: विविधोपचारा: विचारधारा च रूद्राद्वैतवाद: द्वैतवाद: द्वैताद्वैतवादांश्च वेदोत्तरमेव प्रादुर्वभूवु:। इत्यशंशयेन वक्तुम् शक्यते एवं च क्रमेण शैवधर्मस्य तदुपासनाया: तत्र विविधसाधनामार्गाणां च विकास: प्राय: शनै: शनै: जात:। यस्यप्रभाव: भारतीयसाहित्येषु देशान्तरेष्वपि अंशशयेन सम्भवदिति तत्तत्प्रमाणै: दृश्यते स्माभि:।

निगमागमप्रामाण्याभ्युपगन्तृत्वात् पुराणानामपि प्रमाण्यम्। भारतीय जीवनस्य निखिला शोभा पुराणेष्वेव लभ्यते। तत्र हि शिवमुद्दिश्य "शिवपुराणम्" देवीमुद्दिश्य "देवीभागवतम्" विष्णुमुद्दिश्य विष्णुपुराणादिकञ्च संगच्छन्ते।

एवं हि तत्तद्पुराणेषु तेषां-तेषां देवानाम् स्वरूपनिरूपणञ्च वर्तते। एवं अन्येषां देवानां अपेक्षया तस्य वैशिष्ट्यमपि तत्र तत्र संसाधितमेवास्ति। भगवत: लोकगुरो: परमका-रुणिकस्य शिवस्य विषपानं श्रूयते। अस्याख्यानस्य विवेचनं प्राय: बहुषुपुराणेषु विद्यते। तथा चाग्निपुराणे—

क्षीराब्धेर्मध्यमानाच्च विषं हालाहलं ह्यभूत्।
हरेण धारितं कण्ठे नीलकण्ठस्ततो भवत्।।[४६] इति।

एवं हि अत्र पुराणे शिवार्चनस्य विविध-विधय: निर्दिष्टा: वर्तन्ते। एवं गणेशपुराणे, करुणपुराणे, ब्रह्मपुराणे, ब्रह्मवैवर्तपुराणे, ब्रह्माण्डपुराणे, मत्स्यपुराणे, मार्कण्डेयपुराणे, लिङ्गपुराणे, वाराहपुराणे, वायुपुराणे, विष्णुपुराणे, सौर्यादिपुराणेषु तन्त्रागम समन्वित शिवस्वरूपस्य तथा अन्येषां देवानां स्वरूपाणां तत्तत् प्रभावस्य च विपुलं निरूपणं दृश्यते। तत्र च लिंगपुराणे शैवानां वैशिष्ट्यं सर्वातिश्रेष्ठतरामिति प्रतिपाद्यमानामिदमुच्यते—

अन्य भक्त सहस्रेभ्यो विष्णुभक्त: विशिष्यते।
विष्णुभक्तसहस्रेभ्यो रुद्रभक्तोविशिष्यते।।
रुद्र भक्तात् परोनास्ति परं लोके न संशय:।।[४७] इति

अपि च तत्रैव पुराणे—

सर्वावस्थांगतो वापि मुक्तो यं सर्वपातकै:
शिवध्यानान्य संदेहो यथारुद्रस्तथा स्वयम्।।
हत्वा मीत्वा च भूतानि भुक्त्वा चान्यतो अपि वा।
शिवमेकं सकृद् स्मृत्वा सर्वपापै: प्रमुच्यते।।[४८]

इत्थं विचारणायां सम्यक् प्रतिभाति यत् पुराणेषु तन्त्रागमसिद्धान्तस्य भूयस्त्वेन विमर्श: कृतो विद्यते।

तन्त्रागमस्य विवेचकस्तु साक्षात् भगवानशिव: निर्णायिका साक्षात् भगवती पराम्बा उमादेवी, आख्यानस्तु सर्वजगन्नियन्ता भगवत: विष्णोरेव। उक्तञ्च—

आगतं शिव वक्त्रेभ्यो गतं च गिरिजानने ।
मतं वासुदेवस्य तस्मादागम उच्यते ।। इति।

तथा च विविधाख्यानै:, कथाप्रकल्पै:, प्रतीकैश्च शिवतत्वस्य यन्निरूपणं जातं पुराणेषु तदुपेक्ष्य शिवस्वरूपविमर्शप्रक्रियारमणीयक प्रतियोगिनीसेत्स्यति इति। पुराणेषु यादृशं एतत्त्वत्वमभिहितं तन्त्रागम ग्रन्थेषु तदेव महता समारोहेण निरूपितमस्ति। पुराणानामेवेदं वैशिष्ट्यम् यद् अनार्य शिवानुरूपमजरामरम् मृत्यु जयिनं पतिम् कामयन्ते, पराश्च शुभ्रगुणसम्पन्नां निग्रहानुग्रह समर्थां समस्त साधकसामग्रीसम्पन्नां शिवा सन्निभां नारीं कामयन्ते।

शिवपुराणे अपि तन्त्रागमसिद्धान्तसम्बन्धिनो अनेके प्रसंगा विद्यन्ते। यथा—पाद्मकल्पे कुबेरतपोबलात् रुद्ररूपेण शिवस्य कैलासे गमनम्, तत्रैव अति तुष्टे शिवे ढक्का (डमरू) वादनान्ते तन्त्रागमसूचक घोष द्वारा देवादीनाम् तन्त्रागम प्रदानस्य सुष्ठुतरा चर्चा वर्णिता अस्ति। यथा—

इति संचिन्त्य रुद्रो सौ शिवेच्छां गन्तुमुत्सुकः ।
ननाद तत्र ढक्कां स्वां सुगतिं नादरूपिणीम् ।।
तच्छ्रुत्वा विष्णु-ब्रह्माद्या सुराश्च मुनयस्तथा ।
आगमा-निगमा मूर्तासिद्धा जग्मुख्य तत्र वै ।।[४९] इति

अत्र मूर्तरूपेण आगमनिगम इत्यनयो: उल्लेख: अस्ति। अपि च उपमन्यु कथा प्रसङ्गे शैशवे सर्वज्ञानसम्पन्न उपमन्यो: आराधनया प्रीत: सन् तस्मै उपदिशति भगवान् शिव:। यथा—

तस्य ज्ञानागमो अप्यस्य प्रसादादेवशङ्करात् ।
कौमारं हि परं साक्षात् ज्ञानं शक्तिमयं विदुः ।।
शिवशास्त्रप्रवक्तृत्वमपि तस्य हितत्कृतम् ।
कुमारो मुनितो लब्ध्यानाब्धिरिव नन्दनः ।।[५०] इति

अपरञ्च तन्त्रागमोक्तपूजापद्धति व्याख्यानावसरे अपि ग्रन्थकारेण इत्थं निर्दिष्टम् यथा—

व्याख्यां पूजाविधानस्य प्रवदामि समासतः ।
शिवशात्रे शिवेनैव शिवायैकथितस्य तु ।।[५१] इति

अत्रापि शिवशास्त्रस्य चर्चाविद्यते। एतेनापि ज्ञायते यद् तन्त्रागमस्य विचारकः शिव एव। अतएव पुराणेषुतन्त्रागमसिद्धान्तस्य सम्बन्धः निर्विवादं स्वीक्रियते। इतिशम्।

सन्दर्भ

१. म०भा० आदिपर्वणि १।२६८
२. विष्णुपुराणे १।१।९-१०-११-१२-१३-१४ श्लोकाः।
३. श्रीमद्भागवतं २ स्कन्धे १० अध्याये १-२ श्लोकाः।
४. श्रीमद्भागवतं २ स्कन्धे १० अध्याये ३-४-५-६-७ श्लोकाः।
५. श्रीमद्भागवतं १२ स्कन्धे ७ अध्याये ९-१० श्लोकोः।
६. श्री०भा० १२।७।१
७. वही १२।७।१२
८. वही, १२।७।१३
९. वही, १२।७।१४
१०. वही, १२।७।१५
११. वही, १२।७।१६
१२. वही, १२।७।१६
१३. वही, १२।७।१७
१४. वही, १२।७।१८
१५. वही, १२।७।१९
१६. मत्स्यपुराणे ५।४।६४
१७. नानार्थरत्नमाला, पृष्ठ ७७ पंक्ति-८
१८. पा०सू० ४।३।३२
१९. वही, ७।१।१
२०. निरुक्ते ३।९।३४
२१. वायुपुराणे -
२२. कूर्मपुराणस्य पूर्वार्द्धे। स्कन्धे १७-१८-१९-२० श्लोकाः।
२३. विष्णुपुराणे ३।६।१५
२४. अष्टादशपुराणदर्पणे-२५
२५. महाभारते आदिपर्वणि ८५ अध्याये १२-१३ श्लोकौ।
२६. वायुपुराणे १०५।९-१० श्लोकौ।
२७. मत्स्यपुराणे २०३।३
२८. विष्णुपुराणे ४।४।३८-४० श्लोकौ।
२९. स्क०पु०प्र०ख० ७।७५

३०. म०पु० ५३।६४
३१. छान्दो० उ० ७।१।१४
३२. पातञ्जलयोगदर्शने ४।१
३३. श्री०भा० ११।१५।२३
३४. वही, ११।१५।१-२
३५. वायुपुराणे १।१६
३६. अग्निपुराणे २७१।१०, १२
३७. ऋग्वेदे - १।५।२२।१७
३८. यजुर्वेदे १६।२८
३९. शिवपुराणे ४४।१२५
४०. शिवपुराणे वायवीय संहिता १।५९-६०
४१. शिवपुराणे वायवीय संहिता १।४५-५०
४२. शि०पु०वा०सं०पूर्वार्द्ध १।५२ १।२ श्लोक:
४३. शि०पु०वा०सं०पूर्वार्द्ध ७।१।५८ श्लोक:
४४. अग्निपुराणे ३ अध्याये ८-९ श्लोकार्धा।
४५. लिंगपुराणे ३ भागे ४ अध्याये २० श्लोका:।
४६. लिंगपुराणे ३ भागे ४५ अध्याये ३४-३५ श्लोकौ।
४७. शि०पु० रूद्र सं० २० अध्याये ६-७ श्लोक:।
४८. शि०पु० वायवीय सं० ३४ अध्याये ८-९ श्लोक:।
४९. शि०पु० वायवीय उत्तरभागे २३ अध्याये-१ श्लोक:।

द्वितीयो अध्याय

शिवपुराणे "विद्येश्वर संहिता" इति खण्ड-विषये विचारः

ननु अष्टादश भेदैर्विभक्तेषु पुराणेषु शिवपुराणे श्रीमताभंगवता वेदव्यासेन पुराणलक्षण निर्देशपुरःस्सरम्। सर्ग-प्रतिसर्ग वंशवंशानुचरित-मन्वन्तर वर्णनं, अवतार तत्वस्यसमीक्षा, भक्तिरहस्य मीमांसा, इहलोक-पारलौकिक सुखसाधन विवेचनम्, प्राणिमात्रस्य कल्याण-कामनाय, विविधाभ्युदयस्य मार्गप्रदर्शनं, संसारसागरसंस्तरेणापाय जातं विवेचितमस्ति। किमधिकम् सर्वोपयोगिनो धर्मार्थकाममोक्षादयो विविधा ज्ञातव्याः विषया पुराणेषु सम्यक् विवेचिस्सन्ति।

एवं विध चतुर्णां ब्रह्मचर्य, गृहस्थ, वानप्रस्थ, संन्यासाश्रमाणामपि विवेचनेन सह भव्य, उत्कृष्टश्च विचारो व्यक्तीकृतो अस्ति। तेषु अष्टादशपुराणेषु विशेषतः शिवपुराणस्य सर्वाधिकं वैलक्षण्यं भक्तिरसास्वादनमेवविद्यते। येनासु प्रसीदति भगवाञ्छिवः। यथा देवा सुरैमथ्यमानात् समुद्रात् विविधानि रत्नानि निर्गतानि। तथैव पुराणसागर मन्थनात् हालाहलं गहलम्, सुराअमरकारकममृतमपि निःसतुमर्हति, ततःसुधा सुधांश अपि निर्गन्तुमर्हतः। ततश्च हालाहलं गरलभिया भीताः त्रयो लोका ब्रह्मेन्द्रविष्णु, पुरस्कृत्य चन्द्रशेखरसमीप मार्गत्य विविध स्तोत्रमन्त्रैः स्तुतवन्तः आशुतोष भगवान्शिवः लोककल्याणार्थ तथा च सुरकार्यं सिद्धयर्थं हालाहलमपायय‍त्। एतेन पुराणेषु शिवपुराणस्य सर्वाधिकं वैशिष्ट्य विलक्षणत्वं च दरीदृश्यते लोके।

वस्तुतः शिवपुराणे सर्वाभिष्टफल प्रदायकानां अन्येषामपि देवानां देवीनाञ्च लीलाम-योगाथा सन्ति तपःपूतान्तः करणानां ऋषीणां मुनीनान्वाख्यानोपाख्यानानि प्रोक्तानि सन्ति। प्राख्यातकीर्तीनां प्रजापालकानां, धार्मिकाणामुदात्मनां पुण्यश्लोकानां नृपतीनां समुज्ज्वलानि जीवनचरितानि च वर्णितानि सन्ति। एवं तत्र इतिहासः-काव्यं-कला-राजनीतिः अध्यात्म-ज्ञानम्-व्यवहारज्ञानम्, सर्वविधा विद्याश्च वर्णिता वर्तन्ते। अन्येभ्यो पुराणेभ्यः सामान्यवर्गमारभ्य परमोच्चतमान् यावत् सर्वेषां जनानां यथधिकारे लाभोभवितुमर्हति। शिवपुराणे वर्णितं तत्त्वज्ञानं सातिशयम् सुगमश्चास्ते ओज, प्रासाद, माधुर्य गुणत्रयो अपि सर्वत्र परिपूर्णो विद्यते।

अनेकशः पठितेष्वपि पुराणग्रन्थेषु पाठकानां पुनः पुनः शिवपुराण पाठे अभिरुचि वर्द्धते एव, न तेषां चित्ते कदाचिदपि अरुचिः जायते। यदि बालवृन्दं शिवपुराणं पठेत् तदा तस्य सौजन्यवृद्धि पूर्वकम् भाविजीवनस्य पुण्यमये मार्गे नूनं प्रवृत्ति प्रसरेत्। यदि युवानो वा

शिवपुराणस्य पाठं विदधीरन् तदा तेषां कर्तव्य निष्ठा विवर्द्धेत। वृद्धा वा चेत् पाठं कुर्यात् तदा तेषु प्रगाढ़ भक्ति पुरस्सरम् सायुज्य मोक्षमवाप्नुयात्। पुराणपाठप्रभावात् स्त्रीणां हृदयेषु गृहिणी धर्मस्योदयो भवेत्, पातिव्रत्य धर्मस्य च मूलं दृढ़मुपजायते एवं च शिवस्वरूप साक्षात्कार एवात्यन्तिकमनन्तं च सुखं जीवनस्य वास्तविकं लक्ष्यं, अन्तिमोद्देश्यम् आत्यन्तिक निरतिशयं सुखमेव मोक्षः मुक्तिः अपवर्गः, कैवल्यम्, निर्वाणं, निःश्रेयसं, परमपुरुषार्थस्य प्राप्तिर्भवितुमर्हति नूनमेव।

वस्तुतः पुराणेषु शिवमहापुराणे वेदवद् भावात्रयं भावात्रयं, गुणाधिकारत्रयं च विद्यते। यथा वेदार्थरहस्य विज्ञाने काठिन्यं तथैव पुराणार्थ रहस्यावबोधने अपि तद् वेदनीयम्। शिवपुराणे यत्र केवलं समाधिगम्य विषयाणामेव वर्णनं विद्यते सैव समाधिभाषेति निगद्यते। यथा—आत्मस्वरूपविवेचनम्, ब्रह्म-प्रकृतिस्वरूप वर्णनम्, दुज्ञेयकर्मरहस्य प्रतिपादनम्।

यथा वर्णन पद्धत्या समाधिगम्यं विषयम् लौकिक रीत्या विधियते सा हि लौकिकी भाषा निरूप्यते। यथा—ब्रह्म-प्रकृति स्वरूपयोः शिवपार्वत्योर्विवाहवर्णनम्। अनाद्यनन्त चिन्मय-शिवलिङ्गवर्णनम्। इत्थञ्च, यथा भगवान् ब्रह्मेश विराट् रूपस्त्रिभावात्मकः तथैव वेदाः पुराणानि, शास्त्राणि च आध्यात्मिक, आधिदैविक, आधिभौतिक दुःखत्रय विघाताय भगवत् कृपा स्वरूप एव परिचेयानीति ज्ञेयम्। तत्रादौ शिवमहापुराणे सर्वसिद्धान्त समन्वित आद्या विश्वेश्वर संहितायां पञ्चविंशतिः अध्यायाः सन्ति। तद्यथा—

१. तीर्थराजप्रयागे यत्र गंगा-यमुना तथा लुप्तधारया प्रवाहमानां सरस्वतीसमुपेत त्रिवेणी भूतां भुवनं पुनानां पुरुषार्थ चतुष्टय प्राप्तिस्थानं तत्रैव लोककल्याणार्थ मुनीनां धर्मसभायां आगताय सूताय ''महापौराणिकाय'' सर्वसाधनबाधक विविधोपद्रवकारिन् कलिदोषैः, क्षीयमाणे वर्णाश्रमधर्मे आधिव्याधि क्षुत्पिपासा तृषार्दितानां नृणां श्रेयः साधनमधिजिगभिषूणां मुनीनां प्रश्नस्य वर्णनं अतीव सुष्ठुरूपेण वर्णितमस्ति।

२. द्वितीया अध्याये कलिकल्मषार्दितानां नानाव्याधि प्रपीडितानां नृणां कल्याणार्थं कलिकल्मषध्वसित्व वर्णनं शिवमहापुराण दृष्ट्या विवेचनपुरःस्सरम् तत्संहिताभेद प्रदर्शनञ्च सम्यक्रूपेण विवेचितमस्ति।

३. तृतीया अध्याये महापौराणिक श्री शिवतत्वप्रेमी सूतमुखात् शिवमहापुराणस्य ऐहिकामुष्मिकाञ्च वर्णनं संश्रुत्य शिवतत्व जिगमिषुः षट्कुलीनान् मुनीनप्रति परमात्मा शिवकृत साध्य-साधन-साधक वर्णनं मधुरतम् सरलतम् च भावनया विविधवत्रूपेण हृदय ग्राहिनीभावनया वर्णितमस्ति।

४. चतुर्था अध्याये अतिक्रूर कलिप्रभावेण कुप्राभितानां नृणां निःश्रेयसार्थाय तथा तपःपूतान्तःकरण महर्षिवेदव्यासाय भगवता सनत्कुमारेण भगवतः शिवस्य श्रवणकीर्तन-मननानि एव भुक्ति-मुक्तिसाधनानि इति। अस्मिन् विषये सम्यक्रूपेण विवेचनं कृतमस्ति।

५. पंचमा अध्याये-भगवतः शिवस्य प्रियतमः अनन्यतमश्च भक्तः नन्दिकेश्वरेण शम्भोः उत्पत्तिस्थितिलय साधनत्रयाशक्तस्य लिङ्गबेर पूजनादेव भुक्ति-मुक्तिः इति सविधिः विवेचनं विवेचितमस्ति।

६. षष्ठा अध्याये- एकदा विष्णुब्रह्मणोः परस्परमीश्वरत्वाभिमानिनो आहवे प्रक्षिप्त माहेश्वर-पाशुपतास्त्र भीतानां अमराणां त्राणार्थं भगवतः शिवस्य सन्निधौ कैलासं प्रति गमनिमिति वर्णितमस्ति।

७. सप्तमाध्याये- विदितामराभिप्रायस्य शिवस्य युद्धक्षेत्रमागत्यानलस्तम्भावितकारेण विमनरकयोविष्णुब्रह्मणोः स्तम्भप्रमाणज्ञानेप्रवृत्तिः तदनुपलब्धो केतकीपुष्पस्य कूटसाक्षित्वं विधाय दृष्टपारो हमिति ब्रह्मोकत्या विष्णुना ब्रह्मगौरवस्वीकारो ततः प्रसन्नस्य शम्भोर्विषये स्वसाम्यप्रदानम्।

८. अष्टाध्याये—शिवाज्ञया विधिवधे प्रवृत्त मवलोक्य भैरवमच्युते नप्रार्थितस्य शिवस्ययज्ञेतरत्रापूज्यत्वं विधाय विधावनुग्रहः केतकीपुष्पस्य च स्वान्यत्रस्वीकारः।

९. नवमाध्याये— विष्णुविधिभ्यामर्चितो अर्चनदिवसं शिवरात्रि संज्ञितं महाफलप्रद-मभिधाय स्वस्येश्वरत्वमभिदधे महेश्वरः।

१०. दशमाध्याये—ब्रह्मविष्णुभ्यां पंचकृत्यमोकारमत्रं चोपदिश्य भगवतः शिवस्या-न्तर्धानमिति प्रसंगे भगवतः शिवस्योक्तिः—

सृष्टिः स्थितिश्च संहारस्तिरोभावो अप्यनुग्रहः ।
पद्यैव मे जगत्कृत्यं नित्यसिद्धमजाच्युतौ ।।[१]
सर्गा संसारसंरम्भस्तत्प्रतिष्ठास्थितिर्मता ।
संहारो मर्दनं तस्य तिरोभावस्तुदुत्क्रमः ।।[२] इति

ज्ञायते यद्जगतः समस्त प्रक्रिया भगवान् शिवस्य ऐशिकी वार्ता संजाता।

११. एकादशाध्याये—भगवतः शिवस्य लिङ्गप्रकरणे सूतः कथयति—

प्रथमंमृच्छिलादिभ्यो लिङ्गं लोहादिभिः कृतम् ।
येन लिङ्गं तेन पीठं स्थावरे हि विशिष्यते ।।

तथा च लिङ्गपूजा प्रकरणे—

गुडेन नवनीतेज भस्मना अन्नैर्यथा रुचिः ।
लिङ्गीयत्लेन कृत्वान्ते यजेत्तदनुसारतः ।।[३]

इति भगवता व्यासेन शिवपञ्चाक्षरस्य पूजाजप विधाने उक्तम्—

अथ पंचाक्षरं नित्यं जपेदयुतमादरात् ।
संध्ययोश्च सहस्त्रं वा ज्ञेयं शिवपदप्रदम् ।।
प्रणवेनादि संयुक्तं ब्राह्मणानां विशिष्यते ।
दीक्षायुक्तं गुरोग्राह्यं मंत्रं ध्यान फलाप्त्वये ।।[४]

इत्यादयः। शिवं पूजयित्वा नरः सर्वपापैः विनिर्गत्य सद्यः परमीशवपदं प्राप्यते। एवं शिवः-लोककल्याणकारी।

द्वादशाध्याये:—भारते वर्षे परमं पावनं स्थानं शिवक्षेत्र मिति पुण्यक्षेत्रे शिवज्ञेक्षमा-गत्यदुपकर पापिनो अपि शिवप्रसारार शिवतां प्राप्नोति उक्तञ्च—

अथास्मिन् भारते वर्षे प्राप्नोति मरणं नरः ।
स्वयंभूस्थानवासेन कुनर्मायुष्यमाप्नुयात् ।।
क्षेत्रे पापस्य करणं दृढं भवति भूसुराः ।
पुण्यक्षेत्रे निवासे हि पापत्रण्वपि नाचरेत् ।। इति।

त्रयोदशाध्याये—अस्मिन्नध्याये सदाचारवर्णने धर्माधर्मान् स्वर्गनरकौ केन कारणेन प्राप्नोति, तान् सर्वान् निरूप्यते—

ब्राह्मणः, राजन्यः, वैश्यः, शूद्रः स्वस्वकर्मणास्वत्वं प्राप्नोति, कस्य वर्णस्य कः कारणमिति तु सर्वं विविचितम् यथा—

सदाचारयुतो विद्वान् ब्राह्मणो नाम चामतः ।
वेदाचारयुतो विप्रो ह्येतैरेकैकवान्द्विजः ।।
अत्याचारो अल्पवेदश्च क्षत्रियो राजसेवकः ।
किञ्चिदाचारवान्वैश्यः कृषिवाणिज्यकृत्तथा ।।
शूद्रब्राह्मण इत्युक्तः स्वयमेव हि कर्षकः ।
असूयालुः परद्रोही चाण्डालद्विज उच्यते ।।
पृथिवीपालको राजा इतरे क्षत्रिया गताः ।।
धान्यादिक्रयवान् वैश्यः इतरो बणिगुच्यते ।
ब्रह्मक्षत्रिय वैश्यानां शुषुषुः शूद्र उच्यते ।।
कर्षको वृषलो ज्ञेय इतरे चैव दस्यवः ।
सर्वो द्युषुः प्राङ्मुखश्च चिन्तये देव पूर्वकान् ।।
धर्मानर्थाश्य तत्फलेशानापं च व्ययमेव च ।।

सदाचारवर्णने तु नित्यकृपायांमस्वस्थतायां स्नानाशक्तौ मन्त्रस्नानं विधीयते। प्रथमं पादप्रश्नालनं तदन्तरं मूर्ध्नि हृदि तदनतरं मूर्ध्नि हत्यादं सम्प्रोक्ष्यमन्त्रस्नानं विधिः। उक्तञ्च—

ईषत्स्पर्शे च दौः स्वास्थ्ये राजराष्ट्रभये अपि च ।
अगत्या गतिकाले च मन्त्रस्नानं समाचरेत् ।।
प्रातः सूर्यानुवाकेन सायमग्न्यनुवाकतः ।
अपः पीत्वा तथा मध्ये पुनः प्रोक्षणमाचरेत् ।।
गायत्र्या जपमन्त्रान्ते त्रिरूर्ध्वं प्राग्विनिक्षिपेत् ।
मन्त्रेण सह चैकं वै मध्ये अर्ध्यं तु वर्द्धिजाः ।।[५]

शिवपुराण वर्णितं सदाचारमाश्रित्य जनाः धर्मार्थकाममोक्षाख्य परूषार्थचतुष्टयेषु पारङ्गतां यान्ति।

चतुर्दशाध्याये—अस्मिन्नध्याये त्रिविध यज्ञानां वर्णनं भगवता वेदव्यासेन सर्वजनहिताय सर्वजनसुखायेति भावनया भावापन्ना भूत्वा कथयति यत्—

अग्नौ जुहोति यद्द्रव्यमग्नियज्ञः स उच्यते।
ब्रह्मचर्याश्रमस्थानां समिदाधानमेव हि॥[६]
समिदग्नौ व्रताद्यश्च विशेष यजनादिकम्।
प्रथमाश्रमिणामेवं यावदौपासनं द्विजाः॥[७]
आत्मान्यारोपिताग्नीनां वनिनां यतिनां द्विजाः।
हितं च मितमेध्यान्नं स्वकाले भोजनं हुतिः॥[८]

इत्यनेनार्थ वचनेन ब्रह्मचर्य-गृहस्थ-वानप्रस्थसंनयासाश्रमस्थानं समेषां कल्याणकामना-दरीदृश्यते।

पञ्चदशाध्याये—अध्याये अस्मिन् देवयज्ञादिषु देशकालपात्रादि वर्णनं पूजास्थलवर्णनं, विल्व-तुलसी-अश्वत्थमूलकवर्णनं गङ्गादिनदीनां वर्णनं, ब्रह्म-क्षत्र-विट्-शूद्राणां मैहिकपार-लौकिक सुखप्राप्त्यर्थं समीचीन वर्णनं वर्णितमस्ति।

षोडशाध्याये—पार्थिव-पूजन तत्प्रकारस्तत्फलानि चेत्यस्मिन् विषये सविधवर्णनं समायोजिता भगवता वेदव्यासेन।

सप्तदशाध्याये—अस्मिन्नध्याये प्रणवपञ्चाक्षर मन्त्रमाहात्म्य विषये विवेचनं कुर्वता ग्रन्थकारणोक्तम्—

अकारश्च उकारश्च मकारश्च ततः परम्।
विन्दुनादयुतं तद्धि शब्दकालकलान्वितम्॥[९] इति

अष्टादशाऽध्याये—अत्र वन्धमोक्षस्वरूपं शिवलिङ्गमाहात्म्यञ्च वर्णयति भगवता वेदव्यासेन यथा—

प्रकृत्याद्यष्टबन्धेन वद्धो जीवः स उच्यते।
प्रकृत्याद्यष्टबन्धेन निर्मुक्तो मुक्त उच्यते॥
प्रकृत्यादिवशीकारो मोक्ष इत्युच्यते स्तवः।
वद्धः जीवस्तु निर्मुक्तो मुक्त जीवः स कथ्यते॥[१०] इति

तथैवलिङ्गप्रकारविषये पञ्चधा लिङ्गं वर्णयति। यथा

स्वयम्भूलिङ्गं प्रथमं विन्दुलिङ्गं द्वितीयकम्।
प्रतिष्ठतं चरं चैव गुरुलिङ्गं तु पञ्चमम्॥[११]

इत्यनेन संज्ञितयपेण भगवता व्यासेन संसारिणां जीवानां बन्धान्मोक्षं प्रति नेतुं सुप्रयत्नं कृता।

एकोनविंशाऽध्याये—पार्थिवलिङ्गमाहात्म्यविषये भगवता ग्रन्थ कृता सर्वेषु पूजाविधानेषु लिङ्गपूजायाः माहात्म्यं सर्वोपरि वर्णितमस्ति लिङ्गपूजाप्रभावेणैव किं मानवानामपितु देवानामपि स्वेष्टसिद्धिः सम्प्राप्ता। उक्तञ्च—

हरिर्ब्रह्मा च ऋषयः सप्रजापतयस्तथा ।
सम्पूज्य पार्थिवं लिङ्गं प्रायुः सर्वोप्सतं द्विजाः ।।[१२] इति

अपि च—युगे युगे अन्यान्य धातोर्निमितलिङ्गपूजायाः विधानं दरीदृश्यते शिवपुराणे—

कृते रत्नत्रयंलिङ्गं त्रेतायां हेमसम्भवम् ।
द्वापरे पारदं श्रेष्ठं पार्थिवं तु कलौयुगे ।।[१३]

एवमेव पार्थिव माहात्म्य विषये अप्युक्तम्-

यथा सर्वेशु देवेषु ज्येष्ठः श्रेष्ठो महेश्वरः ।
एवं सर्वेषु लिङ्गेषु पार्थिवं श्रेष्ठमुच्यते ।।[१४] इति

विंशाऽध्याये—अध्यायेऽस्मिन् पार्थिवपूजायाः वैदिकी प्रकारः निर्दिष्टः। उक्तञ्च—

अथ वैदिक भक्तानां पार्थिवार्चा निगद्यते ।
वैदिकेनैव मार्गेण भुक्ति मुक्तिप्रदायिनी ।।[१५] इति

अस्मिन् विषये पूजायाः षोडश विधिषु पाद्यर्या चमनादिषु वैदिकविधिना सम्यग् रूपेण लिङ्गार्थने अभीष्टसिद्धिर्प्राप्स्यति।

एकविंशाध्याये—अस्मिन्नध्याये विविध कामनानुरोधेन ससंख्याक शिवलिङ्गपूजायाः विधानं तन्माहात्म्यञ्चोपस्थापितः।

द्वाविंशाध्याये—अस्मिन् प्रकरणे शिवनैवेद्य भस्याभक्ष्च निर्णयः विल्वमाहात्म्यञ्च वर्णितमस्ति। उक्तञ्च—

अग्राह्यं शिवनैवेद्यमिति पूर्वं श्रुतं वचः ।
ब्रूहि तन्निर्णयं विल्वमाहात्म्यमपि सन्मुने ।।[१६]

इत्थं ऋषीणां कृते निवेदने सति परमशैव श्रीसूतेनोक्तम्—

शिवभक्तः शुचिः शुद्धः सद्व्रती दृढनिश्चयः ।
यक्षयेच्छिव नैवेद्यं त्यजेदग्राह्यभावनाम् ।।
दृष्ट्वा अपि शिवनैवेद्यं यान्ति पापानि दूरतः ।
भुक्ते तु शिवनैवेद्ये पुण्यान्यायान्ति कोटिशः ।।[१७] इति

विल्वमाहात्म्ये अपि—

पुण्यतीर्थानि यावन्ति लोकेषु प्रथितान्यपि ।
तानि सर्वाणि तीर्थानि विल्वशूले वसानी हि ।
विल्वमूले महादेवं लिङ्गरूपिणमव्ययम् ।।
यः पूजयति पुण्यात्मा स शिवं प्राप्नुयादध्रुवम् ।[१८] इति

त्रयोविंशा अध्याये—रूद्राक्षमाहात्म्यं शिवनाममहिमाविषये लोकोपकार भावनया सम्यग् विवेचितम्।

विभूर्तियस्य नो भाले नाङ्गे रूद्राक्षधारणम् ।
नास्ये शिवमयी वाणी तं त्यजेदधर्मं यथा ।।[१९] इति

चतुर्विंशाऽध्याये—भस्माहात्म्य वर्णनविषये उक्तं भगवता वेदव्यासेन—

एकं ज्ञेयं महाभस्म द्वितीयं स्वल्पसंज्ञकम् ।
महाभस्म इति प्रोक्तं तं भस्मनानाविधं परम् ।।
तद् भस्म विविधं श्रोतं स्मार्त च लौकिकम् ।
भस्मैव स्वल्पसंज्ञां हि बहुधा परिकीर्तितम् ।।
श्रोतं भस्म तथा स्मार्त द्विजानामेव कीर्तितम् ।
अन्येषामपि सर्वेषामपरं भस्म लौकिकम् ।।[२०] इति

पञ्चविंशाऽध्याये—अध्याये अस्मिन् रूद्राक्षमहिमाविषये वृहद्रूपेण वर्णनं कृतम्। यथा—

शिवप्रियतमो ज्ञेयो रूद्राक्षः परपावनः ।
दर्शनास्पर्शनाज्जाप्यात्सर्वपापहरः स्मृतः ।।
पुरा रूद्राक्षमहिमा देव्यग्रेकथितो मुने ।
लोकोपकरणार्थाय शिवेन परमात्मना ।।[२१] इति

एवमेव रूद्राक्षमहिमा वर्णनं भगवाच्छिव स्वमुखेनैव त्यादरात् बहुप्रकारं कृतम्। मन्ये तत् सर्वं समेषां मानवानां कल्याणाय सुखवर्धनाय भुक्तिमुक्तिप्रदाय चास्ति।

रूद्रसंहिता रति खण्डविषये विचार :

लोकोपकरणकामनया श्रीमद्वेदव्यासेन शिवमहापुराणे द्वितीयायां रूद्रसंहितायां पञ्चविभागाः कृता। तेषां नाम खण्डरूपेण विद्यते। प्रथमः सृष्टिखण्डः, द्वितीयो सती खण्डः, तृतीयो पार्वतीखण्डो प्रथितः। तत्रादौ सृष्टिखण्डे विंशति अध्यायाः सन्ति। तत्रादौ प्रथमाऽध्याये निर्गुणशिवस्य शक्ति सम्बन्धेन प्रपञ्चनिर्माणादिलाभविषयकानेकप्रश्न कर्तृकान् शौनकादिऋषीन् प्रति सूतस्यथानन्दपूर्वकं ब्रह्मनारदसंवादमुखेन कथने प्रतिज्ञादि वर्णितम्। द्वितीयाऽध्याये तु ब्रह्मर्षिनारदस्य तपसो वर्णनं, नारदस्य घोर तपसो भित्त्वादेवराज इन्द्रः तस्य तपोनाशार्थं कामदेवं प्रेषयति, मदनः तत्रागत्य स्वकामजालमातनोति किन्तु महाकल्याणकारी शिवप्रभावात् कामदेवः पराभूतः। कामं पराभूत्य नारदः स्वं जितेन्द्रियं, कामजयं मत्वा स्ववार्ता शिवस्याग्रे निवेदितः तं श्रुत्वा शिवः कथयति यद् हे नारद ? वार्तो यं हरग्रेन निवेदनीयम्। यत् स्वपराक्रमं स्वयमेव नहि कथनीयम्। यथा—

हे तात नारदप्राज्ञधन्यत्वं श्रृणुमद्वचः ।
वाच्यमेवं न कुत्रापि हरेरग्रे विशेषतः ।।
पृच्छमानो अपि न क्रयाः स्ववृत्तं मे यदुक्तवान् ।
गोप्यं गोप्यं सर्वथा हि नैव वाच्यं कदाचन् ।।[22]

परन्तु भगवान् नारदः हरेरग्रेऽपि स्ववार्तां श्रावयति तदनन्तरं नारदः स्वं कामजयं मत्वा परिभ्रमति, अनुस्यरति च। यथा—

किम्प्रभावाः स्मरः स्वामिन् कृपा यद्यस्ति ते मयि ।
इत्युक्त्वा हरिमानम्य ययौ यादृच्छिको मुनिः ।।[23]

ततस्तृतीये अध्याये नारदः परिभ्रमन् श्रीपुरनगरस्य राजाशीलनिधेः परमरूपवतीं कन्यां विलोक्य कामवंशगतः। स स्मरार्दितः नारदः विष्णुं प्रत्यागत्य विष्णोः सौन्दर्य स्वरूपमयायत। विष्णुरवि हरेरूपं प्रदाय नारदस्योपकारं कृतं।

ततः चतुर्थेऽध्याये स्वयम्बरेपराभूतः मायाच्छन्नः स्मरार्दितः नारदः वैकुण्ठं प्राप्य भगवतः विष्णोः शापितम्। यथा—

तद्रूपेण मनुष्यत्वं भवतद्दुःख भुग्धरे ।
यन्मुखं कृतवान् मे त्वं ते भवन्तु सहायिनः ।।
त्वं स्त्रीवियोगजं दुःखं लभस्व परदुःखदः ।
मनुश्यगतिकः प्राणो भवाज्ञानविमोहितः ।।
इति शप्त्वाहरिं मोहाद्नारदो ज्ञानमोहितः ।
विष्णुर्जग्राहं तं शापं प्रशंसम्शाम्भवीमजाम् ।।[24] इति

तदनन्तरं पञ्चमे अध्याये ज्ञानान्धकारान्मुक्त्वा श्री विष्णोः प्रसादेन शिवस्य प्रसन्मतार्थ काशीक्षेत्रम् प्रतिगच्छति तत्र सदाशिवगणयोः समागमं जातं, तयोः स्वशापमुक्तये प्रार्थना, ततः तावाश्वास्य नारदस्य काशीक्षेत्रगमनम्।

ततः षष्ठेऽध्याये नारदस्य लोकोपकारकानेकप्रश्न श्रवणोत्तरं महाप्रलयस्वरूपनिरूपणं, शिवनिर्गुण लक्षणवर्णनम्, ईशेच्छारूपशक्तेरूत्पत्तिस्वरूपकथनं तथा च विष्णोरूत्पत्तिकं वर्णनं कृतम्, भगवता श्रीमतावेदव्यासेन।

ततः सप्तमेऽध्याये प्रलयान्ते सृष्टेरारम्भकाले परमकल्याणकारी परमेश्वरो शिवेच्छया क्षीरसागरे प्रसुप्तस्य नारायणस्य नाभेः पंकजमुत्पन्नं पंकजाद् ब्रह्मा चतुर्मुखो जातः, शिवदक्षिणङ्गाद्ब्रह्मोत्पत्तिप्रकारः, पुनर्लीलया तस्य कमलादाविर्भावः मयकुतो जन्येति ब्रह्मणो भ्रमः-पुनर्मोहात्पितृगवेषणाय विधेर्नालदण्डादधः प्रवेशः तदाधाराज्ञानात्पुनरूपर्यागमः एवं ब्रह्मणो बहुकाल भ्रमणं कृतं तदनन्तरं तपसा ब्रह्मणो विष्णुदर्शनं संजातं, ब्रह्मविष्णवोः स्वस्वश्रेष्ठत्वे विवादं वर्णितं तयोर्मध्ये लिङ्गाविर्भावः तवदलोकनेन ब्रह्मविष्णवोः स्वस्व जयाय, वाराह-

हंसरूपे धृत्वा लिंगोर्ध्वाधोभागगमनम्, लिंगातानधिगमाल्लिंगनिकटागमनवर्णनं कृताय, भगवता श्रीमद्व्यासेन।

ततः अष्टमे अध्याये भगवतः परमेश्वरस्य शिवस्य दर्शनार्थ स्थितयोब्रह्मविष्णवोशेकारनादश्रवणं ओंकारगतवर्णानां लिङ्गे स्थितिप्रकारः, ओंकरादेव ब्रह्माण्डोत्पत्तिः, हरिब्रह्मणोर्ज्ञानाप्राप्त्युक्तिश्च वर्णनम्। एतस्मादेव पंचवक्त्रशिवसगुणमूर्तिप्रादुर्भावः इति तयोर्ज्ञानाधिगमः, ततः शब्दब्रह्मस्वयपवर्णनम्, शब्दब्रह्मज्ञानेन। शब्दब्रह्मानेन विष्णुविधि गर्वपरिहारस्य वर्णनम् विद्यते।

नवमे अध्याये तु पंचवक्त्रशिवाद्विविधविष्णवोर्वेदाधिगमः, लिङ्गपूजैव शिवपुष्टौ परं कारणमिति ब्रह्मविष्णवोरूपदेशः, सृष्टिकर्मणि सहाये याचितें शिवे सृष्टिकर्त्ता हमेव रूद्ररूपेण कर्तृपालने त्रिगुणया शक्त्या सहकारो भवामिति तयोर्वरदान प्रदानेन कलहनिवारणोक्तिः वर्णितमस्ति।

तदनन्तरं दशमे अध्याये विक्षिप्तसृष्टप्रजादुःखमोचने नेकरूपधारणे च विष्णोराज्ञाकरणम रूद्ररूपेणाहमपि त्वदशक्यं कार्यं करिष्यामिति रूद्रौक्तौ हरिहररूपदेवतां निरयगमित्वोक्तिविष्णवोरधिकारप्रदानं च, ब्रह्मविष्णुरूद्राणामापुष्यप्रमाणवर्णनम् विष्णुप्रार्थनया निर्गुणताप्रदानोत्तरं लिङ्गस्वरूपकथनं वर्णितम्।

एकादशे अध्याये शिवार्चनविधवर्णनं तत्फलकनावसरे उक्तं ग्रन्थकारेण—

शिवे भक्तिः शिवे भक्तिः शिवे भक्तिर्भवे भवे ।
अन्यथा शरणं नास्ति त्वमेव शरणं मम् ।।[२५] इति

ततः द्वादशो अध्याये लिंगार्चनज्ञानेच्छया देवैः सह ब्रह्मणः क्षीरनिधितीरगमनम्, पुनश्च लिंगार्चनमेव सर्वेषां सर्वार्थदमित्येवं रूपां विष्णुक्तिं श्रुत्वा सर्वेषां यथाधिकारं लिंगानि देयानीति ब्रह्मोक्तिं श्रुत्वा विश्वकर्माणम्प्रति सर्वेभ्यो लिङ्गप्रदाने विष्णोराज्ञादानम्, तत्सकाशाद् देवानां लिंगप्राप्तिः लिंगार्थनादेव सर्वेषां सर्वार्थलाभ कथनम्, कर्मयज्ञादीनां स्वरूपवर्णनम्, वाह्याभ्यन्तरभेदेन लिंगस्य द्वैविध्योवितर्भक्तिज्ञास्वरूपकर्म तद्द्वारा च द्विविधलिंगपूजाधिकारवर्णनम्।

त्रयोदशो अध्यायः—विस्तृतलिंगपूजाविविधवर्णनप्रसंगे स्नानासनादिविधिंकथनम्, मृन्मयादि लिंगप्रतिष्ठा भूतशुद्धिपाद्यार्ध्याद्युपचारार्पणविधिवर्णनम् पूजान्ते जपस्तोत्रपठनपूर्वकं लिंगविसर्जनप्रकार कथनविस्तृतरूपेण वर्णितम्।

ततः चतुर्दशे अध्याये—ष्वुपविशेषैलिङ्गपूजने फलविशेषवर्णनम्, लक्षद्विलक्षपूष्पपूजने अपि फलविशेषकथनम्, तथा कामनाभेदेन पुष्पविशेषैलिंगपूजने- विचित्रफलप्राप्तिवर्णनम्, चम्बकेतके हित्वा सर्वत्रपुष्पविहितत्वाक्तिः धान्यलक्षपूजायां मानलक्षणफलादिकथनम्, जलाधिधारापूजनवर्णनञ्च कृतम्।

पञ्चदशे अध्याये तु सृष्टिरक्षणार्थं-हरिविधभ्यां वाराहहंसरूपधारणे कारणोक्तिः, भुवनात्मकाण्डनिर्माणप्रकारः, तस्मिन् विराट्प्रवेशः कैलाशवैकुण्ठयोरूत्पत्तिः नवधाभक्तिसृष्टिवर्णनम्, ततो रूद्रादिरूद्रगणशिवसृष्टिवर्णनम् कृतम्।

ततः षोडशो ध्याये-सूत्रस्भूतेभ्यः स्थूलाकाशादिपंचभूतसृष्टिवर्णनं तदनन्तरं ब्रह्मणः स्वाङ्गेभ्योमरीच्यादीनामुदभवकथनम्, मानवरूपेण ब्रह्मणा सुरासुरनिर्माणप्रकारस्तेषां तच्छरीरदानञ्च सर्वजगत्पूर्तिवर्णनम्, दक्षकन्यावंशवर्णनम्, सतीनाम्न्याः शिवशक्तेदेक्षात्प्रादुर्भावस्तस्यास्त्रिगुणात्वप्रकारकथम्, शिवसतीविवाहवर्णनम्, दक्षयज्ञेस्वतनुत्यागेन विपुलकीत्यानेकनामलाभवर्णनम्, शिवशक्तिरूद्रस्वरूपवर्णनञ्च कृतम्।

ततः सप्तदशे अध्याये शिवस्य कैलासागमनकुवेरमित्रतागमनप्रसंगे गुणनिधिचरित्रवर्णनं कृतं भगवता वेदव्यासेन।

ततो अष्टादशे अध्याये-तद्दुराचारेण तन्नयनार्थ समागतैर्यमदूतैः सह शिवगणानां संवादः शिवगणैः साकं गुणनिधेः कैलासागमनवर्णनम्। पुनर्भूमौ राजपुत्रीभूतस्य शिवोपास्त्यैव तस्याललकापुरप्राप्त्युक्ति द्वारा शिवस्याल्पतोषितत्ववर्णनम्।

उनविंशे अध्याये तु पाद्पकल्पे पौलस्त्यो वैश्रवणो लकापतिः पश्चान्मेषवाहनकल्पे याज्ञदत्तेस्तस्याधिपत्यप्राप्तिः, तत्रापि तस्य शिवभक्त्युरेकाच्छिवसख्यसम्पादने भवानीवचनादनेकाज्ञत्वाप्राप्तिपूर्वकयज्ञपतितत्वाद्यैश्वर्यप्राप्तिवर्णनम्।

ततो विंशे अध्याये तु कुवेरतपोवलाद्रूद्ररूपेण शिवस्य कैलासगमनम्, तत्र ढक्कावादनेनाह्वान सूचनाद्देवादीनामागमः तत्रैव कुवेरशिवसख्यवर्णनञ्च सम्यक्रूपेण कृता श्रीमताभगवतावेदव्यासेन।

द्वितीयः सतीखण्डः

परमकारुणिकेन भगवता वेदव्यासेन शिवमहापुराणे रूद्रसंहितायां द्वितीये सतीखण्डे ४३ त्रिचत्वारिंशदध्यायाः सन्ति किल। तत्र प्रथमे अध्याये-रूद्रे ब्रह्माणं संध्याख्यस्वसुतारूपदर्शनेन मोहितं दृष्ट्वा दसाद्यैस्तत्पुत्रः सहतं निर्भत्सर्य स्वस्थानं गते मर्षित ब्रह्मणो रूद्रमोहार्थप्रलयकरणम्। हठाच्छक्त्युपासनयारूद्रमोहाय स्वसुताद्दक्षात्सतीनामं कन्योत्पादनं त्वया सह रूद्रस्योद्वाहः तया रममाणस्य रूद्ररूपं दक्षेण विरोधस्तत्सम्बन्धेन रूद्ररहितदक्षाज्ञारम्भः, तस्मिन् रूद्रभागानवलोकात्सतीकोपेन यज्ञविध्वंसः पुनः सन्धानं ज्वालामुख्युत्पत्यादिवर्णनञ्च कृतम्।

द्वितीये अध्याये तु किल निर्गुणशिवस्य द्विरूपं ततस्तस्य रूद्रादित्रिधाभवनम्, स्त्रपदुर्ब्रह्मणः सकाशात् सुरासुरनरादिप्रजानां प्रजापतीनां चाविर्भावः प्रसन्नमनस्कस्य विधेः सकाशात् सम्मोहिनीसंध्योत्पत्त्युक्तिः, मदनोत्पत्तित्सत्स्वरूपैश्वर्यदानादिवर्णनम्।

ततस्तृतीये अध्याये-ब्रह्मणः सकाशात् कामस्यनामकर्माद्यैश्वर्य प्राप्तो तेन विधितत्पुत्रो परिसाक्षात् प्रयोगकरणात् पितृसर्गोत्पत्तिमवलोक्य क्रुद्धस्य ब्रह्मणः शापप्राप्तितन्मोचनादि-वर्णनम्।

ततस्तुरीया अध्यायादारभ्य दशमा अध्याय पर्यन्तमनेकानेकविध कथाप्रसंगवर्णनं कृतम्। यथा—

तक्षकन्यया रत्या सह मदनस्य विवाहवर्णनम्, रतिरूप वर्णनम्, शिवमायामोहेन कामशापविस्मरणात्स्वकन्याया योग्यवरप्राप्तिजन्यानन्दादिवर्णनम्। सन्ध्यायास्तपस्तुष्टशिवाद-नेकवरलाभः पूर्वरूपत्यागश्च, सन्ध्यायोमेधातिथिसत्रगमनं तत्रालाक्षितत्त्वेन शरीरत्यागात्सूर्य-लोकगमनं ततस्तस्या अरून्धतीनामप्राप्तिवर्णनम्, वशिष्ठेन तस्याः विवाहः तयोः शक्त्यादि पुत्रोत्पत्तिः। रूद्रोपाहासरूरूष्टनारदसन्तोषार्थ रूद्रसम्मोहनाय प्रेषितयोः कामारत्यीर्वर्सतादिसह-चारसाधनेन कामस्य रूद्रलोकप्रमाणवर्णनम्, वर्सतादिसहाययुक्तस्यापि मदनस्य रूद्रमोहना-शक्त्वेन विमनस्कत्ववर्णनम्, पुनश्च विधेराज्ञया मार नामकगणैः सह यत्र-यत्र गमनं तत्र-तत्र गच्छतो मदनस्य श्रमवैफल्यास्त्वलोकगतिः, अमोहितशिवकामस्वधायगतौ खिन्नविधे-र्विष्णुस्तुतिः, शिवमहिमस्मृतिदानेन विष्णुकृविधेर्बोधः शक्तेरवतार ग्रहणे तपश्चर्यायां दक्षस्य प्रवर्तनेन शक्तिप्राकट्योच्छिवविवाहादि सम्भवोप्रायसूचनवर्णनम् विद्यते। यथा—

मद्रूपं परमं विष्णो र्ददृशं ह्यंगतो विधेः
प्रकटीभविता लोके नाम्ना रूद्रः प्रकीर्तितः।।
पूर्णरूपः समे पूज्यः सदा वां सर्वकामकृत्।
त्रयकर्त्तागुणाध्यक्षोनिर्विशेषः सुयोग कृत्।।
त्रिदेवा अपि मे रूपं हरः पूर्णो विशेषतः।
उमाया अपि रूपाणि भविष्यन्ति त्रिधासुतौ।
लक्ष्मीर्नाम हरेः पत्नी ब्रह्मपत्नी भविष्यति।
पूर्णरूपा सती नाम रूद्रपत्नी भविष्यति।
इत्युक्त्वान्तर्हितो जातः कृपां कृत्वा महेश्वरः।
अभूतां सुखिनावानां स्वस्वकार्यपरायेणो।।[२६] इति

एकादशा अध्याये तु ब्रह्मा दुर्गायाः स्तवनं कृतम्। स्तुत्यां उक्तम्—

नमो नमस्ते जगतः प्रवृत्तिनिवृत्तिरूपे स्थितिसर्गरूपे।
चराचराणां भवती सुशक्तिः सनातनी सर्वविमोहनीतिः।।
या श्रीः सदा केशवमूर्तिमाला विश्वम्भरा या सकलं विभर्ति।
या त्वं पुरा सृष्टिकरी महेशी हत्रींत्रिलोकस्य परागुणेभ्यः।।[२७]

अत्र पराम्वा शिवायाः स्वरूपं वर्णितम् या मूर्तिः श्रीरूपा विश्वपालनकर्त्री सा एव

रजोगुणी भूत्वा सृष्टिकारिणी एव प्रतिभाति सा एव तमोगुणीभूय महेशी त्रिलोकस्य परारूपा भूत्वा संहारकर्त्रीरपि सिद्धयति। सा एव दुर्गा ब्रह्माणं प्रति कथयति। यत्—

सती मूर्तिमहं धृत्वा तस्यैव वशवर्तिनी।
भविष्यामि महाभागा लक्ष्मीर्विष्णोयथाप्रिया।।
यथा सो अपि मयैवेष्ट वशवर्ती सदा भवेत्।
तथा यत्नं करिष्यामि तस्यैव कृपया विधे।।
उत्पन्ना दक्षजायायां सतीरूपेण शङ्करम्।
अहं समाजयिष्यामि लीलया तं पितामह।।[२७] इति

ततः द्वादशाध्याया दारभ्य विंशा अध्यायपर्यन्तमनेकानेक विधकथानकद्वारा शिवस्य ब्रह्म नारदादि सम्भाषण वर्णनं सतेरपि दक्षगृह जन्मादि वर्णनंचकृतम् यथा—ब्रह्मनिर्देशेन प्रजासर्गे प्रवृत्तस्य दक्षस्य ब्रह्मोत्पत्या असिक्नीनामक पंचजनकन्यया विवाह, मैथुनधर्मेणो त्पादितानां दक्षपुत्राणां नारदस्य निवृत्तिमार्गोपदेशेन वैराग्यप्राप्तिः तन्नारदकर्मासहिष्णोर्दक्षान्ना-रदस्य शापप्राप्त्यादिवर्णनम् विद्यते। ब्रह्मनारदाभ्यां सदृशवरप्राप्तिरूपवरोपलब्धनन्तरं मात्र यनुज्ञयासत्याद्वादशमासात्मकशिवार्थव्रतताचरणं विष्णुवार्दिसर्वं देवानां च तदवलोकनेनानन्दवर्णनं सस्त्रीकयोविधि विष्णोः शिवलोकप्रस्थानं तत् स्तोत्रकरणश्चोपपदितम्। ब्रह्मविष्णोः स्वागमन-प्रयोजनकथनानन्तरं युक्त स्त्रीस्वीकरणं विना सृष्टयसम्भवे इति ब्रह्महरिभ्यामुक्ते संगस्यापि शिवस्य तयोराग्रहादविवाहस्वीकारकरणम्। दक्ष कन्याया नन्दाव्रतपूर्त्यतु शिवस्य दर्शनं तन्मनोभिलषितवरप्राप्ति वर्णनश्चोपपादितम्। विष्णवादिदेवै र्मरीच्यादिऋषिगणैः सह शिवस्य सती वरणार्थं दक्षगृहगमनं शिवसतीविवाह वर्णनं तथा च सती शिवविवाहोत्सवे सतीरूपा-वलोकनेन ब्रह्मणस्तद्विषयककामुक वर्णनं शेषाच्छिवस्य विधिहनने प्रवृत्तिः, विष्णुप्रार्थनया च ब्रह्मवधनिवृत्तिः। शिवसती विवाहावसरे ब्रह्मणो विरूपवाकरणं पुनश्च मर्त्यलोके चैतद्-रूपेणैव ब्रह्मणः पूज्यताख्यातिप्राप्तिवरलाभवर्णनश्चोपपादितम् भगवता वेदव्यासेन।

शिवः सत्या सह विवाहोपरान्तं स्वनिवासस्थानं कैलाशं प्राप्य तन्त्रलौकिकदृष्ट्या व्यवहारमर्यादया च तत्र तयोः शिवशत्योः विहारवर्णनं कृतम् भगवता वेदव्यासेन-कैलाश-विहारकाले सर्वे देवाः सर्वादिशः सर्वावनस्पतयः सर्वानद्यः जलाशयाः वृक्षाः जन्तवश्यापि-प्रमुदिता आसन्।

ततः एकविंशतितमाध्यायादारभ्य पंचविंशत्यध्यायपर्यन्तं शिवसत्योर्विवाहानन्तरं तयोर्विहरणं तथा पर्जन्यकाले निलयनिर्माणाय सत्या प्रेरितस्य शिवस्य मत्स्थाने मेघानां गत्याभाव इत्युक्तिः सतीच्छया हिमालये शिवयोः क्रीडावर्णनम्। तथा च विषयोपभोगजात-विरागायाः शिवाया लोक लोकरक्षणार्थं सभेदस्वरूपभक्तिभावकथनं तथा च मोक्षाश्चनेकशास्त्रो-रदेशकथनश्चोपपादितम्। लीलया पृथिव्यामहतोः सतीशिवयोर्वने विहरिणं रामं प्रणान्तं

शिवमवालोक्य शंकिताया सत्याः रामपरीक्षा वर्णनं कृतम्। ततः शिवसतीवियोग कारण वर्णनं जातम्। यथा—

ज्ञातं मे रामविष्णुस्त्वं दृष्ट्वा ते प्रभुताखिला ।
निःसंशया तदापि तच्छूणु त्वं च महीपते ।।
कथं प्रणम्यस्त्वं तस्य सत्यं ब्रूहि ममाग्रतः ।
कुरू निःसंशयां त्वं मां शमलं प्राप्नुहि द्रुतम् ।।[२८] इति

अन्यच्च—

शिवाशिवचरित्रं को जानातिपरमार्थनः ।
स्वेच्छया क्रीडतस्तौ हि चरितं कुरूतः सदा ।।
वागर्थाविव सम्पृक्तौ सदा खलु सतीशिवौ ।
तयोर्वियोगः सम्भाव्यः सम्मवेदिच्छयातयोः ।।[२९]

ततः षड्विंशाध्यायादारभ्य त्रिशदध्याय पर्यन्तन्तु क्रमशः रामपरीक्षार्थं सीतारूपेण-गतायाः सत्याः राममोहायोगात्पश्चात्रापः विपणने शिवत्वाधिकारार्वणम्, सत्रे दक्षशिवयोर्विरोध-कारणवर्णनञ्चोपपादितम्। ततः दक्षप्रजापतेः रूद्रभागरहितयज्ञे देवादीनामागमनं तत्र रूद्रम-दृष्टवा दधीयेर्यज्ञवाटान्निर्गमनम्। तत्पज्ञपातिब्रह्मणानामपि निर्गमे शिवविरोधिनो यज्ञप्रवृत्तिः। गन्धमादने सखीजनसहितायाः शत्या रोहिण्या सह चन्द्रस्य दक्षयज्ञगमनमवलोक्य स्वगमनेच्छाप्रकटनं बोधने अपि साग्रहायैशिवाज्ञाप्रदानम्। दक्षयज्ञे गतायाः सत्या दक्षाद-वमानः सर्वदेवानां तत् कृततिरस्कारवर्णनं दक्षाय सत्या शिवमाहात्म्य कथनञ्च वर्णितम्। ततः सत्या योगात् स्वेच्छया तत्र देहत्यागे कृते-भृगुणा शिवगणेष पराभूतेष्वपि विघ्नदर्शनाद-देवादीनां साध्वसोत्पत्तिवर्णनं कृतं भगवता वेदव्यासेन।

ततः एकत्रिंशदध्यायादारभ्य पंचत्रिशदध्यायं यावत् दक्षयज्ञे देववाणी द्वारा दक्षकृत्ये तिरस्कार दर्शनम् भविष्ये किं भविष्यतीति संसूचितम्। भृगुपराजितस्वगण द्वारा सतीदेहत्या-गादिवृत्तश्रवणा कित् क्रुद्धस्य शिवस्य जटाया वीरभद्रमहाकालीज्वरादीनां प्रादुर्भावः, तेभ्यो दक्षतत्पक्षीयाणां संहाराय शिवाज्ञेति वर्णनम्। कैलाशाच्छिवगणैः सह दक्षनाशाय निर्गते वीरभद्र यज्ञवाटस्थानं देवादीनामुत्पातदर्शनाट्ययोत्पत्तिः, देववाण्या शिवनिन्दकस्य दक्षस्य महद्भ्यसूचने विष्णुप्रार्थकेक्तः। विष्णुं प्रति दक्षस्य तद्विज्ञप्तिः शिवनिन्दकस्य रक्षणे केषामपि सामर्थ्यं नेति तात्पर्यगर्भिता हरेरुक्तिः, एतत्तत्कर्मणा तव वीरभद्रान् मृत्युरस्मदादीनां च मृत्युसमशासनं भविष्यतीति च तदुक्तिः शिवसामर्थ्यमव्यवर्णितेन श्रीमद्भगवतावेदव्यासेन।

ततः षट्त्रिंशदध्यायारभ्य चत्वारिंशदध्यायं यावत् शिवमायामोहितैलोकपालैर्वीर-भद्रस्य संग्रामः तस्मिश्च तेषां सर्वेषां पराभवः ततो विष्णुवीरभद्रयोः संवादोत्तरं संग्रामोनमुख त्वादिकथनम्, विष्णुवादिदेवैर्वीरभद्रादिशिवगणानां दारुणसंग्रामस्य वर्णनं, तथा वेदं सर्वं

सतीकृतं मत्वा पराभूतानां देवानां स्वस्वस्थानगतं जयशक्तिवीरभद्रकृतदेवर्षिगणानां दन्तत्रोटन श्मश्रुलुञ्चनादि उपद्रवो यज्ञविध्वंसनञ्च वर्णितम्, ततो दक्षस्य दीक्षितस्यावि वीरभद्रकृतशिरश्छेदादिवर्णितम्। शिवप्रभावं ज्ञात्वा विष्णोः शिवं विना देवैः सह दक्षयज्ञगमनं कारणकथनप्रसङ्गे दधीचर्षिक्षुषधुराज्ञोः स्वस्वश्रेष्ठ्यविषयकविवादकथनं क्षुवयोः सकाशाद्दधीचेः पाराभवः मृत्युज्जयप्रभावाद्दधीयेरमरत्वप्राप्तिः तस्मात् पराभूतस्य सुवयोहरेरराधनादिवर्णनम्। दधीचिप्रति द्विजरूपेण सुक्षुत्रिय कार्यार्थ विष्णोर्गदधीचिविष्णवोः सुवधिनिमित्तको महानकुलहः दधीचेः शिवाद्विष्णोश्च पराभवः दधीचिसकाशाद्देवैः सह विष्णोः शापप्राप्तिः। दक्षप्रजापतिभि जनितदुःखेन खिन्नस्य ब्रह्मणो देवैः सह वैकुण्ठगमनं दक्ष संजीवनं यज्ञसंधानाय देवैः सह कैलासे विष्णोर्गमनम् वर्णितम्।

ततः एकचत्वारिंशदध्यायादारभ्य त्रिचत्वारिंशदध्यायं यावत् सतीविरहिणो अपि शिवस्य विष्णुकृतस्वापरापरव्यापन प्रदर्शिका स्तुतिः स्तुत्याप्रसननस्य शिवस्य यज्ञसंधानोपायकथनम्। वीरभद्रदग्धशिरसः प्रजापतेर्वस्तशिरः संधानाज्जीवनोपायकथनं, यज्ञानुसन्धानप्रकारः, सतीखण्डश्रवणपठनफलावाप्तिकथनञ्चोपपादितम्। यथा—

> **पुनः कृत्वा तपस्तत्रशिवं वत्र पति च सा ।**
> **गौरी भूत्वा अर्द्धवामांगी लीलाश्चन्द्र रभुताः शिवा ।।**
> **इत्थं सती चरित्रं ते वर्णितं परमाद्भुतम् ।**
> **भुक्तिमुक्तिप्रदं दिव्यं सर्वकामप्रदायकम् ।।**
> **इदमाख्यानमनघंपवित्रं परपावनम् ।**
> **स्वर्ग्य यशस्यप्रायुज्यं पुत्रपौत्रप्रवर्धनम् ।।**
> **य इदं शृणुयाद्भक्त्या श्रावयेदभक्तिमान्नरः ।**
> **सर्वकर्मालभेत्रातपरत्र परमां गतिम् ।।**
> **यः पठेत्पादयेद् वापि समाख्यानमिदं शुभम् ।**
> **सो अपि भुक्तवा खिलान् भोगानन्ते मोक्षमवाप्नुयात् ।।**[३०] इति

पार्वती खण्डे

परमकल्याणकारी लोकहिताय सर्वजनमानस प्रमुदिताय अष्टादशपुराणरचनाप्रसङ्गे परमतत्वज्ञेन परमर्षिणा वेदव्यासेन शिवमहापुराणे रूद्रसंहितायां तृतीये पार्वतीखण्डे जगज्जननी राजराजेश्वरी पराम्वा उमायाः जीवन वर्णनं वर्णितम्। पूर्वजन्मकाले पार्वत्या सतीनामासीत्। सा स्वपितु दक्षस्य यागे स्वस्वामिनं शिवस्यापमानं दृष्ट्वा स्वदेहत्यागं चकार। स्वदेहत्यागसमये तथा प्रतिज्ञाता तस्याः प्रतिज्ञा गोस्वामि तुलसीदासेन स्वकाव्ये रामचरितमानसे अपि वर्णितम् यथा—

कोटि जन्म लगि रगरि हमारी ।
वरऊँ सम्भु न त रहऊ कुआरी ।।[३१]
इत्यादयः महतीप्रतिज्ञा कृता पराम्वा देवी ।

ततः पार्वतीखण्डे श्रीमद्वेदव्यासेन ५५ पंचपंचाशदध्यायाः वर्णिता किल। तेषु प्रथमाध्यायारभ्य पंचमाध्यायान्तं क्रमेणेहशं वर्णनम्। यथा—

सत्या हिमालय गृहे जन्मधारणनिमित्तकथनम् नारदश्चोपदेशतस्य पार्वत्याः पुनः शिवप्राप्तिकथनं हिमगिरेद्वैरूप्यनिरूपणं तेन च पितृकन्यकाया मेनाया विवाहादि कथनम्। येनोत्पत्तिप्रसंगात्तिसृणां मेनकादिपितृकन्यानां सनकादिमुनिभ्यः शापप्राप्तिः प्रसन्नेभ्यस्तेभ्यश्च पुनः शापनिर्मुक्तिप्रकारस्य वर्णनम्। हिमाचल गृहे पार्वत्युत्पत्तिशिवप्राप्ति कथाप्रश्नप्रसंगे हिमवद्गृहे विष्णवादीनां गमनं तत्कृतशिवस्तुति वर्णनञ्चोपपादितम्। सती विरहाद् रुद्ररोदन श्रवण जात दुःखानां देवानां देव्याः स्वरूपदर्शनं हिमवन्मेनाप्रार्थनाच्च त्वद्गृहे मदाविर्भाव इति तदुक्तिः देवकार्य सम्पादनप्रकारवर्णनं तथा च मेनानारूद्रतपोवर्णनं मेनायाः शिवाया जन्मकथनम्, मेनायाः शक्तिप्रसादाच्छतपुत्रप्राप्तिरूपवरप्राप्तिरूपपदितम्। यथा—

शत्पुत्राः सम्भावन्तु भवत्या वीर्य संयुता ।
तत्रैको वलावान्मुख्यः प्रथमां सम्यविष्यति ।।
सुता हं सम्भविष्यामि सन्तुष्टा तव भक्तितः ।
देवकार्यं करिष्यामि सेविता निखिलैः सुरैः ।।[३२] इति

तदनन्तरं षष्ठाध्यायादारभ्य द्वादशाध्यायपर्यन्तम्। पार्वत्या मेनायाः जन्यप्रकारवर्णनम् पार्वत्या मेनायाः जन्यप्रकारवर्णनम् पार्वत्या जन्मनिमित्तस्य हिमवत्कृतमहोत्सवस्य वर्णनं, नामकरणसंस्कारोत्तरं पार्वत्याः बालक्रीडाविहारवर्णनञ्चोपपादितम्, भगवता वेदव्यासेन। ततः हिमाचलः स्वकन्यायाः उमायाः स्वभाग्यादिकं नारदमुखाच्छुत्वा दिगम्बरविरक्तावधूतामङ्गला-दिवेषधारिणं स्वकन्या दुर्दैवं विचिन्त्य दुःखितस्य हिमवतो नारदेन सह वार्तालाप करणम् वर्णितम्। योग्यवरोपलब्धे पित्रोः पार्वत्यै शिवाराधनोपदेशः, शिवस्य स्वप्ने आविर्भावः श्रीरुद्रस्य पार्वतीप्राप्त्यै हिमगिरिगमनं पार्वत्याश्च तत्सेवायां नियोगादि वर्णनम्। पार्वतीप्राप्यै तपश्चरतो रूद्रस्य भालोत्पन्नधर्मविंदोर्भौमोत्पत्तिः स्त्रीरूपिण्या मूभ्यास्वस्तनदानादिना वधितस्य तस्य शिवकृपया महत्वप्राप्तिश्च वर्णिता श्रीवेदव्यासेन। ततः शिवां मनसि निधाय हिमगिरौगणैः सह रूद्रस्य तः स्थितिः तत्र हिमाचलस्य शिवदर्शन सम्भाषणादि वर्णनञ्चोपपादितम् एकदा पार्वत्या साकं शिवदर्शनायागतस्य हिमगिरेःकन्यया सह त्वया कदापि नागन्तव्यमिति शिवोक्तौ गिरिकृतविनयप्रकाशः। ततः उक्तम्—

इयं कुमारी सुश्रोणीतन्वीचन्द्रानना शुभा ।
नानेतव्या मतसमीपे वारयामि पुनः पुनः ।।

मायारूपा स्मृता नारीविद्वद्भिर्वेदपारगैः ।
युवनी तु विशेषेण विघ्नकर्त्री तपस्विनाम् ।।
अहं तपस्वी योगी च निर्लिप्तो मायया सदा ।
प्रयोजनं युक्तया वै स्त्रिया किं मे अस्तिभूधर ।।
एवं पुनर्नवक्तव्यं तपस्विवरसंश्रित ।
वेदधर्मप्रवीणस्त्वं यतो ज्ञातिवरो बुधः ।।
भवत्यचल तत्संगारविषयोत्पत्तिराशु वै ।
विनश्यति च वैराग्यं ततो भ्रश्यति सत्तपः ।।
अतस्तपस्विना शैल न कार्या स्त्रीषु संगतिः ।
महाविषयमूलं सा ज्ञानवैराग्यनाशिनी ।।[३३] इति

पुनश्च—

तपस्विनोक्तं वचनं निशम्यतथागिरीशं चकितं विचार्य ।
अतः प्रणम्यैव शिवं भवानीजगाद वाक्यं विशदं तदानीम् ।।[३४]

ततः त्रयोदशा ध्यायादारभ्य विंशा अध्यायान्तं यावत्, सांख्यवेदान्ताभिप्रायेणशिवशक्तयोर्विवादोत्तरं गिरिजायाः स्वसेवायां शिवाज्ञया चिरमेकत्र स्थितयोः शिवशक्त्योर्विकारोत्पादनाय देवैः प्रेषितस्य कामस्य शिवकृतदाहवर्णनम्। तारकासुरोत्पत्तिप्रसंगाद्वज्राङ्गोत्पत्तिः, पुत्रार्थं तस्य तपश्चरणेन प्रसन्नाद् विधेर्वरप्राप्तिश्चोपपादितम्। ततः तारकोत्पत्तिकाले प्रसंगादरिष्टस्वरूपविवरणं तारकस्य चोग्रतपसा देवादीनां भय प्राप्तिः, ब्रह्मणः सकाशात् तारकासुरस्य वरद्वयप्राप्तिः, भयात्सर्व देवैस्तस्मैस्वस्वैश्वर्यप्रदानं, तारकत्रस्तदेवानां ब्रह्मणे स्वदुःखकथनं, शिवपुत्रं विना तद् हनने सर्वेषामशक्यत्वकथनोत्तरं हे मवत्या शिवस्य विवाहरूच्युत्पादनयत्नादखिलं देवकार्यं सम्पत्स्यत इत्यादि प्रकारेण देवानां ब्रह्मकृतसान्त्वनवर्णनं वर्णितम्। शक्रस्य काममाहूय तच्छक्तिवर्णनपूर्वकं तस्मै शिवशक्त्योर्विवाहे पुत्रोत्पत्या तारकवधादिस्वकार्य निरूपणं कामस्य च हरजयं प्रतिज्ञाय शिवनिकटगमनम् कामकृतपार्वतीविषयकशिवमोहवर्णनम्, क्रुद्धस्य हरस्य तृतीयनेत्रोत्पन्नाग्निना कामदाहवर्णनम्, देवप्रार्थनया पुनः संजीवनोक्तिश्च, कामदहनोत्तरं वाडवरूपेण शिवनेत्रोत्पन्नवन्हिज्वालायाः सागर गमनं, ब्रह्मानुज्ञया च सा सागरेण स्वीकृता। देवकार्यार्थं मदनः शिवनेत्रेण भस्मीभूतः। यथा—

अयं क्रोधो महेशस्य वाड्ववात्मा महाप्रभुः ।
दग्ध्वा कामं द्रुतं सर्वं दग्धुकामो य वर्त्ततः ।।[३५] इति

कामदाहोत्तरमतर्हिते शिवे हैमवत्याः शिवविरहदुःखवर्णनम्, नारदात्पंचाक्षर मंत्रोपदेशप्राप्ते वर्णनम्, पुनश्च शिधप्राप्तये पित्रोरनुज्ञया पार्वत्या मुनिदुष्करं तपो कारि, पार्वतीतिपोग्निना त्रैलोक्यदाहप्रसंगाद्भीतानां देवानां ब्रह्मलोकगमन, विष्णुना सार्धं च पार्वतीतपःस्थानावलोकनो-

त्तरं शिवसंनिधिप्राप्तिर्णनं च, ब्रह्मविष्णवाद्याग्रहात्पार्वतीपाणिग्रहस्य शिवकृतस्वीकारवर्णनम्, शिवस्मरणात्सप्तर्ष्यागमने पार्वतीछलाय तेषां नियोगः नारदवाक्यविश्वासो अनर्थकर इति तैरागत्योक्ता अपि न च चालस्वमतात्पार्वती पार्वतीनिश्चयपरीक्षार्थं जटिलस्वरूपेणागतस्य शिवस्य शिवया संवादः एकविंशत्यध्यादारभ्य षड्विंशत्यध्यायपर्यन्तं शिवमहापुराणे श्रीमद्-भगवतावेदव्यासेन वर्णितम्। यथा—

सखि मे गिरिराजस्य सुतेयं हिमभूभृतः ।
ख्याता मे पार्वती नाम्ना सा कालीति च मेनका ।।[३६] इति

पार्वत्या निश्चयं दृष्टवा पूर्वजन्मन्यभूते अपि निरिच्छशिवसंबंधात्स्वदेहपातप्रसंगे तत्प्राप्त्यर्थं यतमाना त्वां धिगित्येवं प्रतारणप्रवृत्तो जटिलः, पार्वत्या दृढ़निश्चयेन तुष्टः शिवस्तां निजरूपं प्रदर्श्य त्वां स्वीकरिष्ये इत्यूचे, पूर्व दक्षेण कन्यादानसमये ग्रहाः सम्यङ न 'पूजिता इति हेतोर्वियोगप्रसंगो नुभूतः, इत उत्तरं तथा मा भूदतस्वया विधिना हिमालयान्मत्प्रतिः-संपादनीयेत्यादिपार्वत्युक्तिः, शिवांतर्धानानंतरं महोत्सवपूर्वकं शिवायाः स्वपितृगृह्यगमनवर्णनं कृतमत्र सप्तविंशत्यध्यायादारभ्य त्रिंशदध्यायपर्यन्तं शिवायाः महोत्सवं वर्णितम्। शिवाशिवयो-र्विवाहनिश्चयं श्रुत्वा हिमाचलस्यानया मोक्षप्राप्त्या पृथिव्या महतीहानिरिति मत्वा तदघटनाय देवानां प्रयत्नवर्णनम्, जटिलरूपशिववाक्यादि्भवृहदयाया मेनायाः शिवाय स्वकन्याप्रदाने दुराग्रहः, शिवज्ञया सप्तर्षीणां हिमालयसदनागमनञ्च, पुनश्चारुन्धतीसहितसप्तर्षीणामनेकेतिहास-कथनेन हिमवन्येनयोः सांत्वनम्, शिवयोर्विवाहप्रसंगे वसिष्ठेनारयेतिहासकथनम्, एतत्प्रसंगेनैव पद्मापिप्पलादचरितवर्णनम् कृतम्। ततः षट्त्रिंशदध्यायादारभ्यैक चत्वारिंशदध्याय पर्यन्तं जगज्जननी माता पार्वत्याः वशिष्ठादिसप्तर्षि वचनादनन्तरं शिवस्य विवाहोत्सवे विवाहमण्डप विधिवर्णनं कृतम्। वेदव्यासेन शिवपुराणे।

वसिष्ठवचनान्तरं सर्वेषां शैलानामपि संमत्या हिमालयस्य शिवाय कालीप्रदाने निश्चयवर्णनं, सप्तर्षीणां शिवविवाहघटनां साधयित्वा स्वलोकगमनवर्णनं च, स्वबंधुसंमत्या शिवं प्रतिहिमगिरेः पत्रिकालेखनं शिवकृततत्स्वीकारः विवाहार्थ सर्वपर्वता तागमनञ्च, विवाहसामग्रीवर्णनम् विश्वकर्मणो विवाहमण्डपरचनाकौशलवर्णनं तथा देवादिकानां निवासार्थं स्थलादिनिर्माणवर्णनम्, नारदद्वारा ब्रह्मादीनां शिवनिमंत्रितानां कैलासागमनवर्णनञ्च, विवाहमंडपे विश्वकर्मणश्चातुर्येण मोहितानां देवानां भयोत्पत्तिस्तन्निवारणप्रकारवर्णनम् कृतम्। यथा—

विश्वकर्मकृतं चित्रं विद्धि नारद सद्धिया ।
विस्मयं त्यज देवर्षे स्वस्थो भवशिवं स्मर ।।[३७]

विवाहस्थले शिवस्य गिराणां च समागमोत्सवर्णनम्, तदा शिवं द्रष्टुमागतायां मेनायां तन्मोहाय शिवकृतालीलावर्णनम्, शिवलीलामोहिताया मेनाय मोहनिवारणकथनम्, दिव्यस्वरूपेण शिवाविर्भावस्थितिवर्णनम्, स्वस्त्रीगणैः सह मेनया मंडपद्वारा प्राप्तवरस्य नीजाजनम् हिमालये

मंडपे वररूपशिवस्य सुरादिभि सह प्रवेशप्रकारकथनम्, शिवाशिवयोर्विवाहविधिकथनं कन्या-दानादिप्रकारवर्णनञ्च, विवाहमोहादिसकलसंस्कारवर्णनम्, विवाहमहोत्सवे लौकिकरीत्या स्त्रीणां विनोदवर्णनमत्र द्विचत्वारिंशदध्यायादारभ्य पंचारात्रमध्याय पर्यन्त उक्त वर्णनं कृतम्। श्रीमता भगवता वेदव्यासेन यथा—

> **सती व्यथा परित्यक्ता कामो दग्धःपुराः कृता ।**
> **कथं तदा वशिष्ठश्च प्रभो प्रस्थापितो धुना ।।**
> **कामं पूरय पार्वत्याः कामशास्त्र विशारदः ।**
> **कुरूपारं स्वयं कामी कामिनीकामसागरम् ।।**[३८] इति

ततः एकपंचाशदध्यायादारभ्य पार्वतीखण्डपर्यन्तं शिवस्य शक्तिः उमायाः स्वरूपं कामस्य संजीवनं वर्णितम् शिव शक्तियुक्तं विलोक्य कामसंजीवनाय इति प्रार्थना, कामस्य विष्णुसमीप-गमने शिवाज्ञा कामसंजीवनप्रकारकथनं च, हिमालयगृहे वरपक्षीयजनानां भोजनसमारभवर्णनम्, शिवयोर्विवाहमहोत्साहे द्वित्रिदिनोत्साहवर्णनम्, वधूवरयोर्यात्राप्रसंगे मेनायाः पार्वत्यै शिक्षणमिषेण पतिव्रताधर्मवर्णनम्, लौकिकरीत्या सर्वं विवाहकृत्यं निर्वत्यं शिवायोः कैलासगमनं वर्णित। यथा—

> **पार्वत्या रोदनेनैवरूरूदुः सर्वयोषितः ।**
> **मितरां जननी मेना चामयो भ्रातरस्तथा ।।**[३९] इति

शम्भोर्दिव्यवर्षसहस्रं गिरिजया सह लीला, तारकादि ससुराणां विष्णुपुरोगमानां शङ्करसन्निधौ दुःखनिवेदनम् देवस्तुतिसमाप्तौ शिवच्युतरेतसो अग्निसप्तर्षिपत्नीक्रमेण गंगायां प्राप्त्या शरवणो कार्तिकेयोत्पत्तिः, षट्कृत्तिकाभिःस्तन्यादानादिना कुमारस्य पोषणं सुरलोकं गत्वा कुमारेण नानालीला भिविष्णवादीनां विस्मापनम्, सूर्यवन्द्रोदिभ्यो वृत्ते वगते शिवाज्ञया ससैन्यस्य सगणस्य नन्दिनः षट्कृतिकासविधं गमनं सविनयञ्च स्कन्दस्य शिवसन्निधो प्रापणम्। अतश्चतुर्थे कुमारखण्डक तारकासुर द्वारा उत्पन्नोत्पातस्य निवारणार्थं कुमारः कार्तिकेयस्य जन्म वर्णनम्। यथा—

> **कृत्तिका ज्ञानवत्यश्च योगिन्यः प्रकृतेः कूलाः ।**
> **कृत्तिका स्तन्येनासां वर्द्धितो हमुवशरेण संततम् ।।**[४०] इति

ततः पञ्चमाध्यायादारभ्य नवमा अध्यायपर्यन्तं श्रीमता वेदव्यासेन कार्तिकेयाभिषेक करणे वीरभद्र अस्य विपणोघोरयुद्धवर्णन प्रसंगे वर्णनं कृतं। हरब्रह्मादिदेवानां स्वस्वायुध-प्रदानपूर्वकं कार्तिकेयाभिषेककरणम्, कस्याचिदिजस्य यज्ञिये जे नष्टे तत्प्रार्थनया सुरलोका-त्कार्तिकेयस्य तदानयनं तदुपरिक्षणमात्रेण विश्वभ्रमणात्तस्यालौकिकंशक्तिदर्शनाञ्च तस्य स्वायत्ती-करणम्, तारकेण सहेन्द्रादिदेवानां युद्धवर्णनम्, देवासुरसंग्रामः तारकेण वीरभद्रविष्णोर्घोर-युद्धवर्णनं कृतम्।

यथा—

वीरभद्रो अपि पतितो भूतले मूर्छितः क्षणम् ।
तच्छक्त्या पश्या क्रोधान्निहतो वससि ध्रुवम् ।।[४१] इति

स्वामिकार्तिकेय द्वारा तारकवधः कुमारेण वाणप्रलंबबधः, श्रीशिवतुष्ट्ये प्रतिज्ञेश्वरकपालेश्वर-कुमारेश्वरलिङ्गस्थापनञ्च तारकवधे प्रीतेदेवैः कार्तिकेयपार्वतीमहादेवानां स्तुतिः अन्र्तथासुखं स्नातुं शिवया स्वगात्रमलतो गणेशो द्वारपालत्वेन निर्मित्तः कदाचित्स्नातुं प्रवृतायां तस्यां शिवस्यान्तः प्रवेशं स सय कृप्रहारमरूणत्, चतुःशिवगणानां पार्वत्यन्तः पुरप्रदेशे निवारिते शिवाज्ञया गणेशेन् सह शिवगणानां युद्धनिश्चयः। अथ दशा अध्यायादारभ्य चतुर्दशा अध्यायपर्यन्तं वर्णनं वर्णितम्। यथा—

कुमारमग्रतः कृत्वा हरिकेन्द्रमुखाः सुराः ।
चक्रुर्नीराजनं प्रीत्या मुनयश्चावरे यथा ।।[४२] इति
देव रेव महादेववर तात महाप्रभो ।
पीडितो हं प्रलम्बेन त्वा हं शरणमागतः ।।[४३] इति
रे रे गणाः क्लीवमता न वीरा वीरमानिनः ।
मदग्रे नोदितुं योग्या भर्त्सितः किं पुनर्वदेत् ।।[४४] इति

शिवगणोः सह गणेशयुद्धवर्णनम्, युद्धं निवार्यतामिति महेशाय नारदप्रार्थनम्, गणेशेन विष्णवादीनां युद्धे प्रवृत्ते व्याहतबलस्य रणुदुर्जयस्य तस्य शिरो महेश्वरस्त्रिशूलेनाच्छिनत् युद्धे क्रुद्धमातृगणेन विष्णुशक्रादिदेवानां पराजयस्ततो गिरिजास्तुतिस्तया च गणेशे जीवते युद्धशान्तिकरिष्यामीत्युक्ते गणेशदेहे करिमुखयोजनपूर्वकं रणनिवृत्तिः गणेशकायेगजमुखयोजनेन तस्योज्जीवनमत्र वर्णनं वर्णितम्। सर्वदेवपूजाप्रसंगे प्रथमं गणेशः पुज्य इति वरप्रदानपूर्व-गणाधिपत्वप्रदानम्, गणेशविवाहवर्णनं स्वपाणिग्रहणोन्तरामवलोक्य कार्तिकेयस्य तपसे क्रौञ्चगिरिगमनम् कृतम्।[४५]

यथा—

दैवैश्च मुनिभिश्चैव प्रार्थितः सो अपि दूरतः ।
योजनत्रयमुत्सृज्य स्थितिः स्थाने च कार्तिकः ।।
पुत्रस्नेहातुरौ तौ वै शिवो पर्वणि पर्वणि ।
दर्शनार्थं कुमारस्य तस्य नारद गच्छतः ।।

अथ द्वितीयायां रूद्रसंहितायाः पञ्चमो युद्धखण्डः

अथात्र शिवमहापुराणे द्वितीयायां रूद्रसंहितयां युद्धे खण्डे महाकल्याणकारी शिवरूप युद्धवर्णनं युद्ध विजय वर्णनं लोकोपकारकं विद्यते। महावली त्रिपुरासुरस्य आतंकेन प्रभावितः

भयभीताः देवा ब्रह्मणः प्राप्य प्रार्थनाञ्चक्रः। ब्रह्मा अपि देवैः सह महाकल्याणकारी शिवसमीप-प्राप्य त्रिपुर हनन काम्ययाप्रार्थयामास। शिवाः प्रसन्नो भूत्वा आदिशत्। त्रिपुरात्मजतारकविधु-न्मालिकमलाक्षतपः प्रीतेन ब्रह्मणा वरं याचध्वमित्युक्ते तैः तैः सर्वाभरप्रधानत्वमयाचि नायं परः समुचितो न्यं प्रार्थयतेति तेनोक्ते हैमवज्रायसराजतानि पुरत्रयाणि नो देहीत्युक्ते ब्रह्मणा तन्निर्माणाय विश्वकर्मणे निर्देशः, तारकाद्यर्दितदेवानां तद्वधाय शिवस्तुतिः शिवोपदेशाद्देवानां विष्णुप्रार्थनं तेन यज्ञेभ्य आदेशस्तेभ्यो भूतसृष्टिस्तश्च शिवार्चकत्रिपुरस्य नाशो शक्यः, प्रयत्नतस्य शिवपूजायां विघ्नसम्पादनविचारः, सम्पादितः युद्धखण्डे प्रथमा अध्यायापरभ्य तृतीयाध्यायपर्यन्तम्। यथा—

पराजिता महादेवा भ्रातृर्व्यासहितेन तु ।
भगवंस्तारकोत्पन्नैः सर्वे देवाः सवासवाः ।।
त्रैलोक्यं स्ववशं नीतं तथा च मुनिसत्तमा ।
विध्वस्ताः सर्व संसिद्धा सर्वमुत्सादितं जगत् ।।[४६] इति

त्रिपुरारेमोहनार्थ विष्णुना जिनस्योत्पादनं तद्द्वाराऽर्हसदीक्षक्षया त्रिपुरस्यार्हद्धर्भाङ्गीकरणम्, जिनधर्म-कथनप्रसङ्गे देवानां ग्राम्यवर्माद्यनियमवर्णनम्, विष्णुबधप्रभृतिसुरैस्त्यक्तशिवधर्मः तारकः सुबध्य इति शिवाय संस्तुतिनिवेदनम् त्रिपुरघाताय शिवाज्ञया विश्वकर्मणा सर्वदेवमयरथनिर्माणम् श्रीशिवस्य युद्धयात्रावर्णनम् त्रिपुरदाहवर्णनमत्र चतुर्था ध्यायादारभ्यदशमा ध्यायपर्यन्तम्। यथा—

अर्द्धदग्धाविवुद्धाश्य वभ्रमुर्मोमूर्च्छिताः ।
तेन वासीत्सुसूक्ष्मो ऽपि घोरत्रिपुर वन्हिना ।।
अविदग्धो विनिर्मुक्तः स्थावरो जंगमो ऽपि वा ।
वर्जयित्वा मयं दैत्यं विश्वकर्माणमव्ययम् ।।[४७]

त्रिपुरासुरे दग्धे शिवस्य रौद्रीं मूर्ति विलोक्य विषया दिदेवैः शम्भुस्तुतिः त्रिपुरदाहावशिष्टमयस्य शम्भुशरंणगमनं तस्मै शम्भुना वितललोक वासदान पूर्वकं स्वभक्तिर्यता, जैनावार्येभ्यः कलौ त्यन्मतं प्रसरिष्यतीति निर्देश पूर्वकं विष्णवादिदेवानां परावर्तनम् तपस्विरूपेण गच्छति शिवे शक्रेण तदवमानाच्छम्भुना तद्भस्मीकरणं वृहस्पति प्रार्थनया पुनरूज्जीवनम् रूद्रनेत्रोत्यवन्हिना समुद्राज्जन्धरोत्पत्तिः कालनेमि दुहित्रा वृन्दया तत्परिणयनम्कादश्याध्यायारभ्याचतुर्दशा ध्याय-पर्यन्तं वर्णनं कृतम् भगवता वेदवयासेन यथा—

अथाम्बुधिः समाहूय कालनेमि महासुरम् ।
वृन्दाभिधासुतां तस्य तद्भार्यार्थमयाचन ।।
कालेन भ्यसुरो वीरो सुराणां प्रवरः सुधीः ।
साधु मेने म्बुधेर्याञ्चां स्वकर्मनिपुणो मुने ।

जलंधराय वीराय सागरप्रभवाय च यदौ ।
ददौ ब्रह्मविधानेन स्वसुतां प्राणवल्लभम् ।।''४८ इति

स्वसदसि छिन्नशिरसं राहुमवलोक्य सुधामन्थनसामयिकदेववैरं स्मृत्वा जलंधरस्य शक्रेण युद्धं देवानां तत्कनृर्पपरायश्च स्वर्ग विहाय विश्रुतेषु सुरेषु जलन्धरेण तदनुसरणं देवसहायार्थ विष्णोः संग्रामकरणञ्च विष्णुजलन्धरयुद्ध जलन्धरपराक्रमतुष्टविष्णोर्वरदानने तन्नगरे सलक्ष्मीकहरेर्निवासः वर्णनं वर्णितं भगवता वेदव्यासेन श्रीशिवमहापुराणे। शक्रादिदेवः संप्रेषितो नारदो जलन्धरमागत्य पार्वतीरूपावण्य लक्ष्मी प्रशंस तस्यां जातानुरागः स दैत्यो मारशराहतो बभूव पार्वतीं मह्यं देहीति शिवसन्निधौ दूतप्रेषणं तदाकर्ण्य रूषा तिभीमस्य पुरुष-स्योत्पत्ति शम्भुदेहात् शिवगणजलन्धरसैन्ययुद्धवर्णनम् विशेषयुद्धवर्णनम् श्रीशिवजलन्धर-योर्युद्धे नानामायाः संविधाय तत्र प्रवृत्ते हरेपार्वतीरिर्क्षया जलन्धरस्य शिवरूपेण पार्वत्यन्तिकं गमनम् तन्मायामांलोक्य भवान्या विष्णो स्मरणं दुष्टजलन्धरदैत्यस्य पत्न्या वृन्दायाः सतीत्वमपाकुर्वितयामन्त्रणमत्राष्टादशाध्यायादारभ्य द्वाविंशत्यध्यायपर्यन्तमुक्तवर्णनं वर्णितम्। यथा—

ततो गणेश्वरः क्रुद्धो स्मृत्वाशिवपदाम्बुजम् ।
संप्राप्यातिकलो दैत्यगदां परशुनाच्छिदत् ।।४९
वीरभद्रस्त्रिभिर्वाणैर्हदिविवध दानवम् ।
संपाभिश्च ह्यान्केतुं धनुस्मृतं च चिच्छिदे ।। इति,

तत्र त्रयोविंशत्यध्यायादारभ्य पंचविंशत्यध्यायपर्यन्तं विष्णुना जलन्धरपत्न्यै दुःस्वप्रान्दर्शयित्वा भयोप्रादनं स्वयं मायाजलन्धरवपुषा तया सह विहरणम्, विदितविष्णुच्छलाया वृन्दया जन्मान्तरे तव पत्नीहरण भवित्विति विष्णवे शापदानपूर्वकं चिताप्रवेशः श्रीशिवद्वारा जलन्धरवधः तत्तद्भभुक्तिमुक्त्यादिप्रदानात्मकशम्भुयशः स्तवनम् वर्णितम् यथा—

इति स्तुत्वा च ते देवा ब्रह्ममायाः समुनीश्वराः ।
तुष्णीं वुभूवुर्हि तदा शिवांर्घिद्वन्द्वचेतसः ।।
अथशम्भुर्महेशानः श्रुत्वादेवस्तुति शुभाम् ।
दत्वा वरान् वरान्सद्यस्तत्रैवान्तर्दधे प्रभुः ।।५० इति

वृन्दाचिताभूमौ समाधिस्थस्य हरेः प्रवृत्तिसूचयितुं शम्भवे देवानां निवेदनं यूयं सर्वे पार्वती-सविध गत्वा स्वप्रार्थितं प्राप्स्यथेति शम्भुवचसा देवानां शिवास्तुति पूर्वकं तत्प्रार्थनम्, तथा च वृन्दाचिताभूमौ वपनार्थ बीजदानं ततश्च तेभ्यो धात्रीमालतीतुलसीनामुत्पत्तिस्ताः प्राथविष्णु-मोहापगमः दम्भासुरस्य पुत्रार्थ तपश्चरणम् तत्तपस्तुष्टविष्णु प्रसादात्तस्य शंखचूडान्हपुत्रो-त्पत्तिः शंखचूडस्य तपश्चरणं ब्रह्मकनिदेशात्तस्य तुलस्या सह विवाहश्च शंखचूडवधोपक्रमे तद्राज्यवर्णन पूर्वकं तत्पूर्व भववृत्ताभिधानम् तपद्धते दृप्तशंखचूडस्य वधो संभाव्य इति

हरिब्रह्मप्रमुखे देंवैः कृता शिवस्तुतिरत षड्विंशत्यध्यायादारभ्य त्रिंशदध्यायपर्यन्तं वर्णनं कृतम्। यथा—

देव देव महादेव परब्रह्माखिलेश्वर ।
त्रिगुणातीत निर्व्यग्र त्रिदेव जनकप्रभो ।।
वयं ते शरणापन्ना रक्षास्यान्दुःखितान् विभो ।
शंखचूडार्दितान् क्लिष्टान् सन्नाथान्परमेश्वर ।
अयं यो धिष्ठितो लोको गोलोक इति सस्मृतः ।
अधिष्ठाता तस्य विष्णु कृपणो यं त्वधितिष्ठति ।।[५१]

शंखचूडवधार्थ याचमानेभ्यो देवेभ्यः शिवोपदेशः देवोभ्यो राज्यं देहि नो चेद्युद्धयस्वेति शंखचूडसविधं शिवेन पुष्पदन्तदूतप्रेषणम्, वीरभद्रनन्दिकाल्यष्ट भैरवाद्यनेकशिवगणानां तत्सैन्य-संख्याभिधानपुरः सरं युद्धयात्रावर्णनम्, भार्यातुलसीं समाश्वास्य पुत्रे राज्यं समर्प्य शंखयूडस्य युद्धयात्रोपक्रमः वर्णितं श्रीमद्भागवतावेदव्यासेनैकत्रिंशद्ध्यायादारभ्य चतुश्त्रिंशदध्यायपर्यन्तम्। मरीचिपुत्रकश्यपपादानवोत्पत्तिः पूर्वदेवास्त इत्यादि कुलीनता प्रकटनपुरः सरं सजातिभर्युद्ध-मनर्थहेतुरित्यादिशिवोपदेशो दूतं प्रति देवाः सदैव स्वकार्यसाधकास्तैयोद्धवयमेवेति शंखचूडा-शयकथनपूर्वकं दूतवचनम्, देवानां दानवानां च रोमहर्षणयुद्धवर्णनम् शंखचूडेन कार्तिकेया-दिमहावीराणां निरूपमयुद्धवर्णनम्, ब्रह्मपाशुपतास्त्रप्रयोगपूर्वकं श्रीकालिचन्द्रचूडयोर्युद्धवर्णनम् वर्णितम् पञ्चत्रिंशदध्यायादारभ्याष्टात्रिंशदध्याय पर्यन्तम्।

ततः रूद्रसंहितायामन्तिमे युद्धखण्डे परिसमाप्तिपर्यन्तमशरीरिणा वाचा श्रीशङ्कराहते सम्भावी शंखचूडस्य वधो इत्युक्ते शिवशंखचूडयोइत्युत्कटयुद्धवर्णनम्। कालीभैरवनन्द्यादि-द्वारा शंखचूडसैनिकानामसंख्यानां वधः। श्रीशिवशंखचूडयोस्तुमूले युद्ध घृतनारायणकवचस्य शंखचूडवधो नारायणप्रार्थनां विना दुर्घटइत्याकाशवाण्याभिहिते शिवेन नारायणप्रार्थनं नारायणस्य वृद्धब्राह्मणरूपेण शंखचूडाद्वर्मयाच्मा शिवद्वारा शंखचूड़वधश्च। त्वं शिलाभवेति विष्णवेतु-लसीशापः तस्याश्च गण्डकीनदीरूपता तयोश्चिरकालिक खङ्गमः। पार्वतीप्रस्वेदतो अन्धकस्य जन्म पुत्रार्थं तपस्पते हिरण्याज्ञाय शिवद्वारा तस्य दानम्, हिरण्यासो भूमिपपहृत्य पाताले गते वाराहरूपिणा विष्णुनातस्वधपुरः सरं भूम्पानयनम्। हिरण्याक्षे नितेसकोपं हिरण्यकशिपो-घोरतपश्चरणं तपलोभीतदेवानां क्षीरसागरशयिविष्णुशरणगमनं तेन च तं दुष्टं दैत्यं हनिव्यापी-त्यभयदानेन कालान्तरे नृसिंहरूपेण तद्वधः। प्राप्तस्वपितृराज्यस्यान्धकस्य त्रिलोकीविद्रावण-पार्वती श्रवणसज्जाततृष्णस्य योगिरूपधारिशिवस्य पार्वतीयाञ्चार्थ दूतप्रेषणम्। शम्भोश्च तद् विपरीतोत्तरदानेनान्धकस्य युद्धो योगः। अन्धकासुरशिवसैन्ययोर्घोरयुद्धवर्णनम्। वीर भद्रादीनां युद्धे पराजयः शिवस्याधिकवलसम्पादनार्थं तपश्चरणम्। अन्धकप्रार्थनया युद्धहतवीराणां शुक्रेण सज्जीविन्योज्यवनम्। पिनापिनिदेशान्नन्दिना दैत्यगुरोर्ग्रहणं शिवद्वारा तन्निगीर्णनमघकवधसमये

कोलाहलेन शिवशुक्रद्वारा शुक्रनिःसरणं तस्मै शिवानुग्रहश्च। शिवशूलाग्रप्रोतान्धकस्य त्रिसहस्र-वर्षपर्यन्तं तपश्चरणं तत्कर्षणा प्रीतेन शिवेन तत्सैन्योजीवितप्रदानपूर्वकं तस्मै गाणपत्यपदप्रदानम्। तपस्तुष्टिशिवाच्छुक्रस्य सज्जीविनीविद्यालाभः। ऊषाचरितं शिवशिवाविहारवर्णनञ्चवाणासुरस्य गर्वोत्त्य्या विराटभुजकण्डूनिवृत्तिर्भवित्रीति शिवोक्तितः ततः श्रीगौरीप्रेषितव्या नीतानिरूद्धेन सद्येषारतिश्चित्रलेखासाहाय्येनानिरूद्धस्य पुनस्तदनतः पुरेऊषाविहारः कन्यान्तः पुरदूषकस्या-निरूद्धस्य विग्रहार्थ ससैन्यवाणासुरस्य घोरयुद्धवर्णनम्, तस्यामानुषं कर्मविलोक्य तद्वधाय स्वमान्त्रिणो निर्देशो न भोवाग्य सन्निवारणं नागपाशैस्तदबन्धनमनिरूद्धस्तेन कालया नागपाश-च्छेदो निरूद्धस्य चोषया सुखेन विहारः। अनिरूद्धेन दर्शनं यावे तन्मात्रादीनां चिन्ता नारदानुग्रहा दवगतस्यवृत्तस्य श्रीकृष्णस्य तदानयनायपातालगमनं तत्र वाणेनातिभयङ्करं युद्धम्। शम्भुसनाथस्य तस्य पराजये गोधवीर्चत्वं शिवानुग्रहातपुनस्तस्य मुपराजिकृन्तनपूर्वकं पराजयकरणं, ऊषाभिरूद्धयोर्निवाधे द्वारदकागमनञ्च रणेस्वभावभङ्गसंजाननिवेदस्य वाणासुरस्य शम्भुप्रेषित चन्दिना सान्त्वर्न वाणस्येराप्रीतशे नृत्यकरणं तत्रोदृष्टेनाशिवेनतस्मे गाणपत्यपद-प्रदानम्। महिषासुरपुत्रगजासुरस्य महेश्वरद्वारा वधस्तदाख्यया कृत्तिवासेश्वरलिंगस्थापनं तत्कृत्ति-वसनधारणञ्च। दन्दुभिनिर्ह्रदवैत्यवधाय धृतव्याघ्ररूपिणः स्मरहस्य मुनिप्रार्थनया व्याघ्रेलिंगे तत्रैवास्थानम्। गौरीद्वारा विपलोत्पलदैत्यवधवर्णनम् वर्णितं श्रीमद्भगवता वेदव्यासेन तद्यथा—

अथ सर्वे सुराः शम्भोर्वरान्प्राप्य तदाज्ञया ।
स्वधामानि ययुः प्रीतास्तथा काशीनिवासिनः ।।
साम्विकं शंकरं दृष्टवा कृताज्जलिपुटाश्च ते ।
प्रणम्य तुष्टुक्रर्भक्त्या वाग्भिरष्टाभिरादशत् ।।
साम्बिको अपि शिवो व्यास क्रीडित्वा सुविहारिणत् ।
जगाम स्वालयं प्रीतः सगणो भक्तवत्सलः ।
कन्दुकेश्वरलिंग च काश्यां दुष्टनिवर्हणम् ।
भुक्तिमुक्तिप्रदं स्वर्वकामप्रदं सर्वदा सताम् ।।[५२] इति

अथ शतरूद्र संहिता इति खण्ड विषये विचार :

अस्यां संहितायां ४२ अध्यायाः सन्ति। तत्र-शौनकस्य शिवावतार जिज्ञासायां परमभागवत श्रीव्यास-शिष्य-सूतेनेरितम् यत् कल्पे कल्पे भगवतः ब्रह्मणो कष्ट निवर्तनाय भगवतः शिवस्य अनेके वताराः सन्ति। तेषु मुख्यतमः पञ्चावतारम् वर्णितम् अस्ति। तद्यथा-ईशानः, २. पुरुषः, ३. अघोरः, ४. कामसंज्ञकः, ५. ब्रह्मसंज्ञकश्चास्ति।

तत्रैव अखिलसृष्टे युगे-युगे सर्वविध कार्य संचालनार्थ, प्रवर्तनार्थं च भगवतः शिवस्य विविधावतारेषु १. शर्वः, २. भवः, ३. रूद्रः, ४. उग्रः, ५. भीमः, ६. पशुपतिः,

७. ईशानः, ८. महादेवः, इत्यादिनामैराख्यातः शम्भोरष्टमूर्तीनामभिधानं तत्तत्कार्यप्रदर्शनञ्च दरीदृश्यते। अथ च द्वन्द्वजप्रजासिसृक्षु ब्रह्मतपश्चरणप्रीतशिवस्य शरीरादर्द्धनारीश्वर प्रादुर्भावः, शिवाज्ञया च प्रजापति संकल्प सिद्धये ब्रह्मणो भवान्या नारीसृष्टिशक्तिप्रदान पूर्वकं दक्षगृहे अवतरणं च वर्णितमस्ति। प्रथमे द्वापरे श्वेतमुनिस्वरूपेण शम्भु अवतारग्रहणं श्वेत श्वेतमशिखा-दिमुनीन्प्रतिध्यानप्रशंसा, द्वितीयादि नवद्वापरपर्यन्तम् तद्रूपेण शम्भोः विविधावतारग्रहणं, तत्तदवतारे शिवस्योपदेशपूर्वकमन्ते भद्रायुश्चरितमपि संक्षेपेण वर्णितम्। तथा च तत्रैव-मनूनां मन्वन्तराणां, वर्णनपुरस्सरं ऋषभदेव चारित्र्यमयिनिगदितम्। दशमाद्यष्टाविंशतिद्वापरपर्य्यन्तं-भृगुः, बलबन्धुः, नरामित्रं, केतुशृंगं त्रिवृत्तं शततेजा, एते व्यासशिष्याः योगमार्गप्रवर्तकाः अविनाशिनो भविष्यन्ति। ते सर्वदैव भक्ताः शिष्याः पाशुपतव्रतिनो, भस्मरूद्राक्षधारिणो त्रिपण्डिनश्च भविष्यन्ति। ते वेद वेदाङ्ग पारगाः नित्यलिङ्गार्चने रताश्च भविष्यन्ति। एवमेव दशमाद्यारभ्यअष्टाविंशतिद्वापरपर्यन्तं शिवभक्त व्यासशिष्याणाम् संख्या ११२ (द्वादशोत्तर-शतम्) भविष्यन्ति।

एकदा पुत्रकामस्य परमशैवशिलादमुनेः भगवतः शिवस्य तपश्चर्यावर्णनम्, तेन प्रीतोभगवाच्छिवेन मृत्युरहित, अयोनिज पुत्र लब्धकामा शिलादंप्रति तथास्तु इति अमोघ वरदानं प्रदाय अन्तर्हिते सति अनन्तरं च श्री शिवात्मकायोनिजनन्दीश्वर पुत्र प्राप्तिः तस्याल्पायु-र्योगज्ञान परितापे, दीर्घजीवनप्राप्त्यर्थ नन्दीश्वरस्य तपश्चर्य्यार्थं वनगमनं सुष्ठुरूपेण वर्णितमस्ति। तपश्चर्या प्रीतेन शिवेन नन्दीश्वरं अजरत्वं, अमरत्वं दुःखरहितं अविनाशित्वं, अक्षय्यं च वरं प्रदायानन्तरं नन्दीश्वरस्य गणाधिपत्वप्राप्तिर्विवाहवर्णनं च वर्णितमस्ति। परं ''अहमेव सर्वेश्वरो न कश्चिन्मतोधिक'' इति ब्रह्मगर्व नाशाय पविताख्यान युतं काल भैरवापरनामकरूद्रावतारस्य वर्णनलोकहितकारीति। अनन्तरं च भैरवावतार ग्रहणानन्तरं त्रिलोकी तीर्थ भ्रमणे अपि अनपगत विधि शिरश्छेदज ब्रह्महत्या काश्यां कपाल मोचनतीर्थे सद्यो विलयं गतेति कपालमोचन तीर्थस्य सर्वश्रेष्ठत्वं प्रदर्शितम्। ततः भगवतः नृसिंह चरितवर्णनप्रसंगे हिरण्यक-शिपुविनाशार्थं भगवान् हरिः एव कुपितो भूत्वा श्रीनृहरिस्वरूपे अवतारं गृह्य तदुग्ररूग्रज्वाला संतप्तजगत्त्रयी रक्षणोपाय प्रश्ने समागतदेवानुद्दिश्य तद् दुखोपशमाय श्रीमहादेवस्य प्रतिवचनमपि चित्रितमस्ति।

ततः भगवतः नृसिंहस्योग्रकोपप्रशमनार्थं श्रीमहादेवाज्ञया गणाग्रणी वीरभद्रस्य तदुपकण्ठ आगत्य स सामनिवेदने अपि नृसिंहगर्वानपागमात् शिवस्य कोपप्रकाशनम्। तत्रैव समुद्रमन्थन प्रसंगे अतीवमनोहारि चित्रणं कृतं विद्यते। एकदा शिवेच्छया देवानां दानवानां च कार्यसिद्ध्यर्थं सर्वेषां मनसि एतादृशी भावना समुत्पन्ना यत् समुद्रमन्थनं कर्तव्यमस्माभिः, कृतमपि तैः तेन चतुदशमहारत्नानि समुत्पन्नानि, तेषु अमृतस्योपलब्धिः संजाता। देवानां दानवानञ्च पृथक् पंक्तिविधाय अमृत-मंदिरायाश्च विभाजनं कृतम्। अमृतपानेन देवानां जयःदानवानाञ्च पराजयो

भवति। तेन सुधापानेन सन्तृप्तदृप्तदेवमदापहाराय शम्भोर्यक्षेश्वरावतारस्य वर्णनप्रसंगे शिव महापुराणे उक्तं भगवता वेद वयासेन तद्यथा। देवैरूक्तं—

यक्षेश्वरस्वरूपेण सर्वेषां नो मदोहृतः ।
कृतो मन्यामहे तत्ते अनुग्रहो हि कृपालुना ।।
अथो स यक्षनाथो नुगृह्य वै सकलान्सुरान् ।
विबोध्य विविधैर्वाक्यैर्तत्रैवान्तरधीयत ।।
इत्थं स वर्णितः शम्भोरवतारः सुखावहः ।
यक्षेश्वराख्यःसुखदः सतां तुष्टो भयंकरः ।।
इदमाख्यानममलं सर्वं गर्वापहारकम् ।
सतां सुशान्तिदं नित्यं भुक्तिमुक्तिप्रदं नृणाम् ।।[५३] इति

अथ शिवस्य-शिवायाश्च सहैव शिवशक्तिस्वरूपे दशावतारवर्णन प्रसंगे उक्तम्-सतां भुक्तिमुक्तिप्रदायकं महाकाल नामक प्रथमावतारः तत्रैव शिवस्य शक्ति (शिवा) महाकाली-नाम्ना भक्तेप्सितप्रदा। तार नामके द्वितीयावतारे शक्तिस्तत्रतारा नाम्नाख्याता। तृतीयः-भुवनेशः तत्र शिवाभुवनेशी नाम्ना। चतुर्थः श्री विद्येशः तत्र शिवा-श्रीविद्या। पंचमः भैरवा-वतारः, तत्र गिरिजा-भैरवी नाम्ना। षष्ठः छिन्नमस्तकः तत्र शिवा-छिन्नमस्तका। सप्तमः-धूमवान, शिवातत्र धूमावती अष्टमः-बगलामुखः, तत्र वै शिवा-बगलामुखीति। नवमः-मातङ्गावतारः, शिवातत्र मातङ्गीनाम्ना। दशमावतारे शिवः कमल तत्र शिवा कमला नाम्ना स्वभक्तान् पालयति,- परिपोषयति च। उक्तञ्च—

एते दशावताराहि शङ्करस्य महात्मनः ।
नाना सुख प्रदानित्यं सेवतां निर्विकारतः ।।
एतासामपि शक्तीनां अद्भुतोमहिमामुने ।
सर्व कामप्रदो ज्ञेयस्तंत्रशास्त्रादिगर्भितम् ।।[५४] इति

अनन्तरं-दैत्योपद्रुतदेवरक्षा कामकश्यप तपःपरितुष्ट सर्वतः सुररक्षायैकपाल्यादेव एकादश रूद्रावतारवर्णनप्रसंगे—

कपाली १ पिंगलो २ भीमो ३ विरूपाक्षो ४ विलोहितः ५ शास्त्रा ६ जपाद ७ हिबुध्न्यः ८ शम्भु ९ चण्डो १० भवस्तथा।।

एकादशेते रूद्रास्तु सुरभीवतनयाः स्मृताः ।
देव काय्यार्थमुत्पन्नाः शिवरूपाः सुखास्पदाः ।।
ते रूद्राः काश्यपा वीरा महाबल पराक्रमाः ।
दैत्यान् जघ्नुश्च संग्रामे देवसाहाय्यकारिणः ।।[५५] इति

अस्यामेव संहितायाम् दुर्वासादीनां चरित्र वर्णनप्रसंगे शिव-विष्णुब्रह्मादीनामंशात्

अत्रिपत्नी अनसूयीया क्रमशो ब्रह्मणोंशात् चन्द्रमा, विष्णोरंशात् दत्तात्रेयः, शिवांशात् दुर्वासामुनिशार्दूलः समजायत्। एवमेव पुत्रकामस्यात्रेः सर्वश्रेष्ठदेवतपश्चरणं ब्रह्मविष्णुशिवात्मिकाया देवत्र्यया वरं याचस्वेति तदन्तिकमागमनं तदंशेभ्यश्चन्द्रदत्तात्रेय दुर्वासा समुद्भवो। दुर्वाससो अम्बरीषादीनां धर्मपरीक्षावर्णनं वर्णितमस्ति।

अनुमदावतार कथनप्रसंगे-

एकस्मिन् समये शम्भुरद् भुतोतिकर प्रभुः ।
ददर्श मोहिनीरूपं विष्णोः सहि वै सद्गुणः ।।
चक्रे स्वं क्षुभितं शम्भुः कामवाण हतो यथा ।
स्ववीर्यं पातयामास रामकार्यार्थमीश्वरः ।।
तद्वीयं स्थापयामासुः पत्रे सप्तर्षयश्च ते ।
प्रेरिता मनसा तेन रामकार्यार्थमादरात् ।।
तैगौतमसुतायां तद्वीयं शम्भोर्महर्षिभिः ।
कर्ण द्वारा तथांजन्यां रामकार्यार्थमाहितम् ।।
ततश्च समये तस्मात् हनुमानीति नामभाक् ।
शम्भुर्यज्ञे कपितनुर्महाबल पराक्रमः ।।[५६]

एवं मोहिनीरूपमुग्धस्य हरस्यमनः क्षोभात्वीर्यच्युतिः, सप्तर्षि द्वारा गौतमसुतायामज्जन्यां कर्णद्धारा तस्याधानम्, ततश्च यथावसरं हनूमज्जनिः, हनुमतः सूर्यादध्ययनं तन्निदेशेन च तस्य सुग्रीवोपकण्ठे गमनम्, सीतान्वेषणादि श्रीरामकार्य करणादि सुष्ठुरूपेण वर्णितमस्ति।

महेशावतार कथने-एकदा प्रीतो शिवः शिवायाः अनुरोधेन भैरवं द्वारपालं नियुज्य अन्तःपुरे शिव-शिवा स्वेच्छया विहारकरणप्रसंगे, तत्रत्यः शिवा वहिर्गन्तुकामा द्वारपालेन भैरवेन कुदृष्टया वरोधितः, गिरिजया च शापितस्तम् शिवेन बहुविधआश्वास्य भैरवस्यप्रिय-करणार्थं भैरवेन सह क्षितावववतरत, शिवस्तत्र महेशः, शिवा च शारदानाम्नाख्याता भैरवो अपि वेताल योनौ जनिः।

वृषभावतारप्रसंगमपि अतीवमननेहारी चित्रितमस्ति। एकदा जयौषिणोदेवाः क्षीरनिधिं मथितुं उद्यता, किन्तु कथं मन्थनभविष्यति इति चिन्तातुरेषु देवेषु नभोवाणी संजाता—

हे देवा असुराश्चैव मन्थध्वं क्षीरसागरम् ।
मन्दरं चैवमन्थानं रज्जुं कुरुत वासुकिम् ।।[५७]

एवमेव मथ्यमानेमहोदधौ चतुर्दश रत्नानि समुत्थनानि। तद्यथा—

क्षीरोदे मथ्यमानेतु श्रीः सर्वलोकमहेश्वरी ।
समुद्भूता समुद्राच्च भृगुपुत्री हरिप्रिया ।।

धन्वन्तरिः शशांकश्च पारिजातोमहाद्रुमः ।
उच्चैः श्रवाश्च तुरगो गज ऐरावतस्तथा ।।
सुरा हरिधनु शंखो गावः कामदुधास्ततः ।
कौस्तुभारव्यो मणिश्चैव तथा पीयूषमेव च ।।
पुनश्च मध्यमाने तु कालकूटं महाविषम् ।
युगान्तानल संजातं सुरासुरभयावहम् ।।
पीयूष जन्मकाले तु बिम्बवो ये बहिर्गताः ।
तेभ्यः कान्ताः समुद्भूता वह्वयो ह्यद्भुतदर्शनाः ।।[५८]

एवम् रत्नानि समुत्पन्ने शिवाज्ञया भगवान् विष्णुः मोहिनीरूपं धृत्वा अमृतस्य-मदिरायाश्च विभाजनं देवासुराणाममध्ये कृतवान्। पीतानन्तरं तैः युद्धयोरेभे। देवानां जयः दैत्यानाञ्च पराजयो जातः। पराभवं प्राप्य अवशिष्टासुरा पाताललोकं जग्मुः। विजयदर्थ दर्पितो विष्णुः स्वान्यायुधानिगृहीत्वा पाताललोकं गत्वा रमण्यो विलोक्य च मोहात् ताभ्यः बह्वो पुत्राः अजीजनत ते पुत्राः युद्धैषिणो, तपश्चर्या चारिणो मुनीन्यपि संत्रासं उत्पादयामास। मुनयस्तु शिवभक्ताः। तेषां संरक्षणाय मोहात् विष्णुं निवारणाय च अतिशय बलिष्ठवृषभरूपं धृत्वा युद्धे उन्मत्तान् विष्णुपुत्रान् निहन्य विष्णोरपि मोहं विनाशयामास ततः विष्णुरूवाच—

देव देव महादेव करुणासागर प्रभो ।
मायया ते महेशान मोहितो अहं विमूदधीः ।।
कृतं युद्धं त्वयेशेन स्वनाथेन मया प्रभो ।
कृपां कृत्वा मयि स्वामिन्सो पराधो हि सह्यताम् ।।[५९]

इत्थं निवेद्यशिवं विष्णुः तत्रैव स्वं चक्रं परित्यज्य द्वितीयं शिवप्रसादरूपं चक्रं प्राप्य प्रचलित सन् विष्णुलोकं ययौ।

इदं पवित्रमाख्यानं यः पठेच्छिव सन्निधौ ।
शत्रुवाधाभयं नास्ति भुक्तिमुक्ति प्रदं सताम् ।।

पिप्पलादावतार चरितप्रसंगे एकदा वृत्रासुरेणपराजिता देवाः गुरुवृहस्पतिप्रेकृत्वा मुनिदधिचेः आश्रमं गताः। स्वार्थसाधकमिन्द्रं विलोक्य स महामुनिः सुवर्चा स्व भायां अन्तः सम्प्रेष्यः देवागमनमभिप्रायं विज्ञाय शिवंध्यात्वा स्व शरीरमुत्सर्जयामास। ततः देवराज इन्द्रः कामधेनुना महात्मादधीचेः अस्थीनि प्राप्य त्वष्टाज्ञया विश्वकर्माविनिर्मित सुदृढ़बज्रमादाय वृत्रं विनाशयामास। किंचित् कालानन्तरं सुवर्चावहिरागत्य, स्वपतिमविलोक्य, देवान् शशाप। परं दिव्यां चितां निर्माय तस्मिन् प्राणान् त्यक्तुकामा तां विलोक्य शिवेच्छया नभोवाणी संजाता। हे प्राज्ञे ? तव कुक्षौ महामुनेः परं तेजो विद्यते तत् सयत्नं परिपालयेति। इति श्रुत्वा सुवर्चा प्रस्तरखण्डमेकमादाय स्वगर्भं विदारयामास। तेन महादिव्य, मुनितेजः पुत्ररूपे

प्रादुर्भूतः सुवर्चा च पतिलोकम गता। स तु साक्षात् महादेव एष पुत्र रूपे आसीत्। ततः विष्णुकादिदेवाः तत्रागत्य सविधितस्य बालकस्य संस्कारं विधाय पिप्पलादेति नामकरणं चकार।

ये भक्ताः अस्य पिप्पलादावतारस्य चरित्रं श्रृणोति श्रावयति वा तस्य शनिकृत पीडानुभूतिर्नभवति।

सभार्याहुकभिल्लस्य भक्त्या तुष्टेन शिवेन पतिरूपेण परीक्षणम् परीतायै आहुकायै जन्मान्तरे त्वं विदर्भराजतनया आहुकश्च नलो हं च भवत् प्रीतिकरो भविष्यामिहंसः शिवस्य इति वृत्तान्तमपि दर्शनीयं वर्तते। स्व अवज्ञया शक्रं जिघांसोः शिवस्य प्रणिपातपुरःसरं गुरोः प्रार्थना प्रतीताच्च तस्मादर्शनपूर्वक मिष्टलाभः इन्द्रं जीवयेति गुरुनिर्बन्धन ईश्वरेण इन्द्रजीवनं गुरु वृहस्पतये च इति संज्ञा वर्णनप्रसंगे शिवस्य अवधूतेश्वर अवतारस्वरूपस्य गुरुवृहस्पतिना प्रार्थना। यथा—

देव देव महादेव शरणागत वत्सल।
प्रसन्नो भव गौरीश सर्वेश्वर नमो स्तुते।।
मायया मोहिता सर्वे ब्रह्मविष्णवादयो पिते।
त्वां न जानन्ति तत्त्वेन जानन्ति त्वदनुग्रहात्।।[६०]

इत्थं प्रार्थ्यमाने प्रसन्नोशिवः तस्मैवरमदात्—

प्रीतस्ते हं सुराचार्य ददामि वरमुत्तमम्।
इन्द्रस्य जीव दानेन जीवेति त्वं प्रथां व्रज।।[६१] इति

शिवस्य द्विजेश्वर अवतार वर्णनम्

एकदा संग्रामे विदर्भनरेशसत्यराज्ञः शत्रुभिः पराभवे जाते, अन्तर्वत्न्या तत् पत्न्या गृहान्निर्गताया मार्गे पुत्रजननान्तरं तस्या निधनं जातमात्रस्यापत्यस्य पोषणार्थं भिक्षुवर्य द्विजेश्वर-शम्भुप्रेरणया कस्याश्चित् विधवा ब्राह्मण्या सद्योआगमनम् बालकं दृष्ट्वा सन्देहवतीं तां विलोक्य यतिरुवाच—

सन्देहं कुरू नो चित्ते विप्रभामिनि माखिद्।
रक्षैनं बालकं प्रीत्या सुपवित्रं स्वपुत्रकम्।।
अनेन शिशुना श्रेयः प्राप्स्यसे न चिरात्परम्।
पुष्णीहि सर्वथा ह्येनं महातेजस्विनं शिशुम्।।[६२]

इत्यादिश्य शिवः तस्य बालकस्य सर्ववृत्तान्तं कथयति ततः सा विप्रपत्नी भिक्षुवर्य्यः साक्षात् शिवः इति ज्ञात्वा प्रणति पुरस्सरम् स्वीकरोति यथा—

त्वदाज्ञयेनं बालं हि रक्षयिष्यामि स्वपुत्रवत्।
पोक्ष्यामि नात्र सन्देहो मद्भाग्यात्वमिहागतः।।[६३]
इत्यादिप्रसंगं च भक्ताभिष्टकारिणः। इति।

शिवस्य ब्रह्मचारी अवतार वर्णनम्-

एकदा दक्षपुत्री सती पितुर्गेहे अनुष्ठितयज्ञे पतिस्थानमविलोक्य योगाग्निना तच्छरीरं परित्यज्य हिमवत्गेहे मेनाया: उदरात् पुत्रिरूपे अवतारं गृह्य अनुदिनवर्द्धमानेन विवाह योग्या संजाता। नारदेनागत्यकथिता यत् सर्वगुणसम्पन्नामस्या पति: विष्णुरेवभविष्यच्चेत् बाढ़म्। इति नारदेरितमाकर्ण्य पार्वती शिव एव ममपति: भविष्यति इति विचार्य तपस्यार्थं सख्या विजया सह वनान्तरं जगाम तत्र उग्र तपस्तप्तुमारभे। कालान्तरे शिवेन प्रेरिता सप्तर्षयो अत्रागत्य विविध विधिना तां सम्परीक्ष्य गता:। अनन्तरं च शिव: स्वयं दिव्य ब्रह्मचारिवेशं धृत्वा तत्रागत्य च पार्वतीपरीक्षणमारेभे। शिवेन पृष्टा यत् हे ? कल्याणि त्वं कासि अत्र अमनुजा रण्ये कस्य, कस्मै, किमर्थं उग्रतपं विधास्यति इति। तं ब्रह्मचारिणं विधिवत् सम्पूज्य पार्वती: सर्वं निवेदयति। ब्रह्मचारिणा तस्या: मनोरथं ज्ञात्वा-परीक्षणभावनया च ब्रह्मेन्द्र विष्ण्वादि देवानां प्रशंसा कृता। पार्वती सर्वं उपेक्ष्य शिवपतिरिच्छा व्यक्तीकृता तां श्रुत्वा पुन: ब्रह्माचारि: शिवनिन्दा, तस्य अगोत्रत्वादिकं वर्णयति।

वपुर्विरूपा क्षमलक्षजन्मता,
दिगम्बरत्वेन निवेदितं वसु ?
वरेषु यत् बालमृगाक्षि मृग्यते,
तदस्ति किं व्यस्तमपि त्रिलोचने ।।[६४]

इत्थं शिवनिन्दां श्रुत्वा ब्रह्मचारिणं अधिकार्य्य वनान्तरं गन्तुकामातां विलोक्य शिव:प्रसन्नोभूत्वा साक्षात् वास्तविक स्वरूपं धृत्वा पार्वतीं प्रति वरं ब्रूहित्यवोचत्-पार्वत्या भवान्नेव म पति: भवतु इति स्वीकार्य शिव: पार्वत्यासह हिमवत्· पार्श्वे आगत्य सविधिपाणिग्रहणं चकार।

शिवस्य अश्वथामावतारवर्णनम्-

पुत्रार्थं अत्युग्रं तपश्चरतो द्रोणाचार्यस्य पत्न्यां अश्वथामरूपेणशम्भोरवतार: एकदा पुत्र कामनया, देवर्षि वृहस्पते पुत्र: महर्षिभरद्वाज:, तस्यात्मज अयोनिजद्रोणाचार्य: आसीत्। स एव द्रोणाचार्य: पुत्रकामनया उग्रतरं तप: शिवमुद्दिश्य कृतम्, तेन प्रीतोशिव: द्रोणसम्मुखमागत्य बरं ब्रूहीति प्रावोचत्। द्रोणेनोक्तम् भवान यदि प्रसन्नो अस्ति नर्हि स्वांशेन तेज बल, बुद्धि समन्वितं पुत्रं ददस्व तथेत्युक्त्वा अन्तर्हितोशिव:। द्रोणस्तु गृहं गत्वा, पत्न्या अग्रे सर्वं कथयति। शिवेच्छया कालान्तरे द्रोणपत्निगर्भात् अश्वथाम नामकपुत्रमजीजनत्। स एव अश्वथाम: महाभारते कौरवणां सर्वविध हितसाधक:, पाण्डवानां कृते क्रूर काल: "वीराणां मध्ये सेनानायक रूपेण च प्रसिद्धो बभूव। उक्तं च-अश्वथामावतारस्ते वर्णित: शंकर प्रभो:। सर्वसिद्धिकरश्चापि भक्ताभीष्टफलं प्रद:।।[६५]

भगवत: शिवस्य किरातावतार वर्णनम्- एकदा द्यूत क्रीडायां पराभवं प्राप्यानन्तरं

पाण्डवाः द्वैतवनमागत्य तत्रैव वसितः तत्रापि पाण्डवानां अनिष्टसाधनार्थं दुर्योधनेन प्रेषितो महर्षि दुर्वासा बहुशिष्यगणैर्युक्तो अकाले तत्रागत्य भोजनार्थं इच्छाव्यक्तीकृतः। पाञ्चाल्याः श्रीकृष्णस्मरणपूर्वकम् अक्षयपात्रसः शाकपत्रमेकं कृष्णेन तेन सर्वेषां तृप्तिः कृता। श्रीकृष्ण कृपया तदुद्धारे जाते सति, भगवतः व्यासस्य पाण्डवानामन्तिकेगमनम्। पाण्डवैः सम्पूजितो व्यासः प्रसन्नो भूत्वा पाण्डवानां जयार्थं शैवास्त्र प्राप्तये चन्द्रकीलपर्वते अर्जुनं सम्प्रेष्य स्वयंगतः। अर्जुनः चन्द्र कीलपर्वतमागत्य तत्रैव निजास्त्र संधार्य अत्युग्रं तपस्तप्तुमारभे। ऊर्ध्व बाहू नभोदृष्टिः पादांगुष्णशिरोपनिः "इत्येवं रूपेण शिवपञ्चाक्षर "ॐ नमः शिवाय" इति महामन्त्रस्य जपमारेभे। किंचित् कालानन्तर दुष्टचेता दुर्योधनेन प्रेषितो मूकाख्या दैत्यः विशालकाय शूकररूपं धृत्वा भयंकर शब्द कुर्वाणा अर्जुनस्य सम्मुखमायाति। तदुग्ररूपं दृष्ट्वा शिवं स्मृत्वा अर्जुनः स्वबाणमुत्सर्जयति, शूकर पृष्ठतः स्वयं भगवाच्छिवः स्वगणेन-विभूषितः सन् शूकरे स्वकीयं बाणमपि व्यासृजत् तेन शूकरस्यैहिक लीला समाप्ता। क्षणान्तरं अन्तहितो शिवः स्वगणमेकं सम्प्रेष्य स्ववाणमानेतव्यमित्यादिशत् यदा सगणः बाणमानेतुमागतः तदा अर्जुनो अपि स्वकीयं बाणंग्रहीतुं तत्रगतः। उभयोमध्ये विवादो संजातः। अर्जुनेन पराभूतो शिवगणः शिवसमीपमागत्य यथावत् सर्वं निवेदितवान्। तच्छृत्वा अतीव प्रसन्नो शिवः स्वगणैः सह अर्जुनसमीपमागत्य किरात् स्वरूपे बहुविध उपदेशितः, किन्तु अर्जुन स्वकायरतां न स्वीकरोति। पश्चात् अर्जुनेन सह किरातवेशधारिणो गणैयुक्तो शिवस्य भीषणयुद्ध प्रारम्भो जातः। तस्मिन् अर्जुनबाणैहताः शिवगणाः इतस्ततः पलायिताः। साक्षात् स्वामिन् शिवेण सह युद्धो भवत्। पश्चात् तेन प्रीतो शिवः स्वकीयं वास्तविकं रूपं अर्जुनाग्रे प्रकटयति। तं दृष्ट्वा विस्मितेन खिन्नमनसा अर्जुनेन सब्रीडया मुहुर्मुहुः शिवं ध्यात्वा प्रणम्योचत्—

देव देव महादेव करुणाकर शङ्कर ।
ममापराधं सर्वेश क्षन्तव्यश्च त्वया पुनः ।।
किं कृतं रूपमाच्छाद्य छलितो अस्मित्वयाधुना ।
धिङ्मां समरकर्तारं स्वामिना भवता प्रभो ।।[६६]

इत्येवं अर्जुनस्य स्तुतिं श्रुत्वा-शिवेन कथितम्—

न खिद्य पार्थ भक्तो सि ममत्वं हि विशेषतः ।
परीक्षार्थं मया ते द्य कृतमेवं शुचं जहि ।।[६७]

शिवोक्तिमतां विश्रुत्य अर्जुनः शिव स्वपरमेशं हृदिनिधाय बहुविध स्तुतिं चकार—

नमस्ते देव देवाय नमः कैलासवासिने ।
सदाशिव नमस्तुभ्यं पञ्चववक्त्राय ते नमः ।।

कपर्दिने नमस्तुभ्यं त्रिनेत्राय नमो स्तुते ।
नमः प्रसन्नरूपाय सहस्रवदनाय च ।।[६८] इति

स्तुत्या प्रीतो शिवः अर्जुनम्प्रत्यवोचत्—

स्वं महास्त्रं मयादत्तं दुर्जयस्त्वं भविष्यति ।
अनेन सर्वशत्रूणां जयकृत्यमवाप्नुहि ।।
कृष्णं च कथियिष्यामि साहाय्यं ते करिष्यति ।
स वै ममात्मभूतश्च मद्‌भक्तः कार्यकारकः ।।[६९]

इत्युक्त्वा भगवाच्छिवः निजास्त्रपाशुपताख्यं अर्जुनं सम्प्रदाय अन्तर्हितो भवत्।
उक्तञ्च केनापिक विना—

उत्तुङ्गसुरनिम्नगा बलयितं नानामृगैः संकुलम्,
संकामन्मृगयुद्घुतं हिमवतः श्रृंगारन्तरम् श्रृंगतः निजास्त्रमदिशन्।।
पुष्यान्नेशपिनाकयालिखताल्लीलाकिरातः शिवः।[७०]

शिवस्य द्वादशज्योतिर्लिंगावतारवर्णनम्—

१. सोमनाथावतारः चन्द्रमसः कष्टनिवर्तनार्थ सौराष्ट्रप्रदेशे।
२. मल्लिकार्जुनावतारः सर्वेषां मुक्तिदायकः श्रीशैलपर्वते।
३. महाकालावतारः अगतिनांगतिप्रदः उज्जयिन्याम्।
४. ओंकारलिंगावतारः भक्तानामभीष्टप्रदः अमलेश्वरस्थाने।
५. केदारेश्वरावतारः दर्शनेनाभीष्टदशः केदारखण्डे।
६. भीमेशावतारः भीमनामकं दैत्यं निहन्य, कामदेशीय राज्ञः संरक्षणार्थं हिमवत् पृष्ठे डाकिन्यां।
७. विश्वेशावतारः अखिल ब्रह्माण्डभुक्तिमुक्तिदः। वाराणस्यां।
८. त्रयम्बकावतारः महर्षेगौतमस्य कामनासिद्धयर्थम्। गौतमीनामके नद्यास्तटे।
९. वैद्यनाथावतारः रावणार्थम्, भुक्तिमुक्तिप्रदायकं च। चिताभूमौ।
१०. नागेशावतारः महापातकोपपातकनिवारणार्थम्। अयोध्यायाम्।
११. रामेश्वरावतारः श्रीरामस्य कार्यसिद्धयर्थम्। सेतबन्धस्थाने।
१२. घुश्मेशावतारः घुश्मा प्रीत्यर्थेम् दक्षिणस्यांदिशि सरोवरे।

कथितञ्च शिव महापुराणे—

केदारो हिमवत् पृष्ठे डाकिन्यां भीमशंकरः ।
वाराणस्यां च विश्वेशस्त्रयम्बो गौतमीतटे ।।
सौराष्ट्रे सोमनाथं च श्रीशेलेमल्लिकार्जुनः ।
उज्जयिन्यां महाकाल ओंकारे चामरेश्वरः ।।

वैद्यनाथ श्चिताभूमौ नागेशोदारूकावने ।
सेतुबन्धे च रामेशो घुश्मेश्च शिवालये ।।
अवतार द्वादशकम् एतच्छम्भोः परमात्मनः ।
सर्वानन्दकरं पुंसां दर्शनात् स्पर्शनान्मुने ।।[७१]

अन्यच्च—

एतां ज्ज्योतिर्लिंग कथां यः पठेच्छृणुयादपि ।
मुच्यते सर्व पापेभ्यो भुक्तिं मुक्तिं च विन्दति ।।[७२] इति

अथ कोटि रूद्र संहिता इतिखण्ड विषये विचारः

अस्यां संहितायाम् ४३ अध्यायाः सन्ति। तत्र केवलं द्वादशज्योतिर्लिंगानामुपलिंगानाञ्च वर्णनमस्ति। तद्यथा—

द्वादशज्योतिर्लिंगविषये—

सौराष्ट्रे सोमनाथं च श्री शैले मल्लिकार्जुनम् ।
उज्जयिन्यां महाकालमोंकार ममलेश्वरम् ।।
केदारो हिमवत् पृष्ठे डाकिन्यां भीमशंकरः ।
वारणस्यां तु विश्वेशं त्रयम्बकं गोतमी तटे ।।
वैद्यनाथश्चिताभूमौ नागेशो दारूका वने ।
सेतुबन्धे तु रामेशं धुश्मेश्च शिवालये ।।
द्वादशज्योतिलिंगानि प्रातःसायं पठेन्नरः ।
भस्मी भवन्ति पापानि पुनर्जन्मन विद्यते ।।

अन्यच्च—

पृथ्वीसमुद्रयोः संगमे सोमेश्वरस्य उपलिंगः अन्नकेशः।
मल्लिकार्जुनस्य उपलिंगः रूद्रेश्वरः ।
महाकाललिंगस्योपलिंगः दुग्धेशः ।
केदारेश्वर लिंगस्योपलिंगः भूतेश्वरः ।
भीमशंकरस्य उपलिंगः भीमेश्वरः ।
नागेश्वरस्योपलिंगः भूतेश्वरः ।
रामेश्वरस्योपलिंगः गुप्तेश्वरः ।
घुश्मेशस्योपलिंगः व्याघ्रेश्वरः ।

अन्ये अपि अनेके उपलिंगाः सन्ति सतशो थसहस्रसः, येषां दर्शन, स्पर्शन,

पूजनमात्रेणेव जीवानां सर्वप्रकारकं भुक्तिं मुक्तिं च करतलेस्थिता एव। पतितपावनी भगवती गंगायास्तटे काश्यां भगवान विश्वेश्वरस्य, कृतिकावासेश्वरोपलिंग:।

श्वमेधस्थ तिलभाण्डेश्वर: उपलिंगश्च विद्यते ।
कौशिक्यास्तटे-भूतेश्वर: नारीश्वरश्चोपलिंगे विद्यते ।
फाल्गुनद्यास्तटे-पूरेश्वर: गाण्डवीतटे-वटुकेश्वर: ।
एतादृशमेनेके उपलिंगा: सन्ति ।

अत्रिध्वरलिंगोत्पत्तिप्रसंगे महर्षि अत्रि तथा तत्पत्नि अनसूयादेव्या: अविचल भक्ति, शिवाराधन-परमप्रभावेण गंगाया: मन्दाकिनी, शिवस्य च अत्रीश्वरोत्पत्ति: तत्रैव अनसूया तस्पस्तुष्टा गंगातदाश्रमेन्युवास-वरदित् सद्योपस्थितं शिवं प्रति भवता त्रैव स्थातव्यमिति सपत्निकात्रिवरयाचनानन्तरं गंगा तत्र मन्दाकिनी नाम्ना शिवश्च अत्रिश्वर नाम्ना अद्यापिस्थितो अस्ति।

नन्दिकेशशिवलिंग माहात्म्य वर्णने कश्चित् द्विज: पुत्राभ्यां स्वप्रियां समर्प्य काशीं प्राप्त: तत्रैव मृतश्च। कालान्तरे द्विज भार्या अपि मृत्युं सम्प्राता, ततो ज्येष्ठपुत्रो मृतमात्रास्थि काशीं प्रति निनीषन्प्रस्थितो सायंकाले कश्चित् ब्राह्मणस्य भवने वसत्। सायंकाले गृहेश ब्राह्मणेन गोदोहनकाले वत्स प्रताडनं, प्रभाते च गृहेशपुत्रेण तदाकृते सति स्व वत्सेन सह गवा गृहेश पुत्रवध: तेन कृष्णत्वमाप्तायागवा सद्य: नर्मदातटं प्राप्य तत्र स्नात्वा नन्दिकेशस्य दर्शनेन पुन: शक्लं गामवलोक्य विस्मयमानो व्रजन् ब्राह्मणपुत्र: गंगया बोधित: स्वमात्रस्थि नर्मदायां प्रक्षिप्य दिव्यरूपामम्बां स्वर्यान्तीमवलोक्य स ब्राह्मण पुत्र: नर्मदायां स्नात्वा नन्दिकेशस्य दर्शनं कृत्वा तत्स्थानस्य महिमाया: गुणगानं कुर्वन् गृहं निवृत्त:। लिंगोत्पत्ति विषये तप: प्रवृत्तां बालविधवाऋषिकन्यया तत्रैव पार्थिवलिंगं निर्माय पूजितान्यवसत्। कालान्तरे कश्चित् मूढ़नाम्नासुरेणागत्य स्मराकृष्टमनसा पीड्यमानां तां ऋषिकन्यां रिरक्षयिषु: साक्षात् शिवतस्मिन् लिंगादेव आविर्भूय दैत्यं जघान, सर्वेदेवा: गंगा च तत्र तदा समागता, पश्चात् प्रतिवर्ष वैशाखसितसप्तम्यां गंगा तत्र प्रयातीति च वर्णनम् विद्यते।

तत: गोकर्ण क्षेत्रस्थ महावलाख्य शिवलिंगमाहात्म्यवर्णने व्यभिचार त्यक्ता सौमिनी-द्विजकन्या शूद्रपत्नीभूत्वा गोवत्सं हत्वा जन्मान्तरे जन्मान्धा चाण्डालकन्या भूत्वा गोकर्ण क्षेत्रेगत्वा केनापि दत्तं बिल्वपत्रमसारतया प्रचिक्षेप-देवात् शिवलिंगे तत् पत्रपातात्, तस्या: परमपदप्राप्तिश्च। तत: गुरुशापात् राक्षसत्वमाप्तो मित्रसहोराजामुनिकिशोरमभक्षयत्, ततो हत्या विकलमभ्यर्च्य शिवपदमवाप्ति वर्णनञ्च सम्यक् वर्णितमस्ति।

उक्तं च—

य इमां श्रृणुयान्नित्यं महाबल कथां प्रियाम् ।
त्रिसप्तकुलजै: सार्धं शिवलोके व्रजत्यसौ ।।[७३]

उत्तरदिगस्य शिवलिंग वर्णने-भालचन्द्र पशुपतिलिंग वर्णन माहात्म्यप्रसंगे- श्रीसूतेनेरितं यत्-उत्तरस्यां दिशि गोकर्णक्षेत्र मस्ति, तत्र दिव्यमहाबने भालचन्द्र नामकं शिवलिंगं रावणेनानीय स्थापितः। तथैव नेपालदेशे सर्वविधमनोरथपरिपूरकःशिवस्य पशुपतिनामक ज्योतिर्लिंगमस्ति।

हाटकेश्वर ज्योतिर्लिंगवर्णनप्रसंगे—एकदा उत्तरस्यां दिशि दारूक नामके सघनवने अनेके ऋषयः ऋषिपत्न्यश्च शिवाराधन विधौ मध्यान्हे समीधामाहरणाय तस्मिन्नेव वनैकप्रदेशे गताः, तेषाभक्तिपरीक्षणाय भगवाच्छिवः स्वस्वरूपं परिवर्त्य हस्ते लिंगं गृहीत्वा ऋषिपत्नीनां पुरतो आयाति तंदृष्ट्वा ताः सर्वाः कामविवशाः संजाताः। ततः ऋषयो अपि तत्रागमन, विलोक्य तां दशां लिंगधारिणं नग्नपुरुषं शशापुः। अनन्तरं तल्लिंगं पृथिव्यां भ्रंश्य इतस्ततः भ्रमन् समेषां जीवानां भयं कष्टं ददाति। ते ऋषियः शिवमाया विमोहिता लोकगुरु ब्रह्माणं श्शरणमाजग्मुः तेषां दशां विलोक्य शिवध्यानानन्तरं ब्रह्मोवाच-स तु साक्षात् शिवः भवतां परीक्षार्थं स्वयं लिंगं हस्ते निधाय वर्तते। भवद्भिः अनुचितं कृताः, तत् शीघ्रं गत्वा भगवतीम् पार्वतीम् प्रीणातु, सा एवं कष्ट दूरीकरणेसमर्था। एवं सविधिब्रह्मणादिष्टो ऋषयः पुनः दारूकवनं आगत्य, अष्टदलकमलं निर्माय तदुपरिकलशं संस्थाप्य षोडशोपचारैः पार्वतीमावाह्य, शतरूद्रीमन्त्रेण पूजिता पार्वती सुप्रसन्नमनसा प्रकट्य लोककल्याणाय स्व योनौ बाणरूप तल्लिंगमवधारिता। एवम् ऋषिशापात् भूमिपतित शिवलिंगदह्यमान भुवनरक्षणाय ऋषिपार्थनया पार्वत्या स्व यौनौ लिंगधारणे भुवनशान्तिः हाटकेश नाम्ना ज्योतिर्लिंग प्रसिद्धिः। उक्तं च शिवमहापुराणे—

हाटेशमिति विख्यातं तच्छिवाशिवमित्यपि।
पूजनात्तस्य लोकानां सुखं भवति सर्वथा।।
इह सर्व समृद्धिः स्यान्नानासुखवहा धिका।
परत्र मरमामुक्तिर्नात्र कार्या विचारणा।।[७४] इति

सोमनायेश्वर ज्योतिर्लिंगप्रकरणे—अश्विन्यादि सप्तविंशति मायासुरोहिण्यामेवाधिक स्नेहात् अन्या भर्यानुरोधेन पितुः दक्षप्रजापतिना प्रबोधितोचन्द्रः, अबुद्धेसति शशाप—हे चन्द्र त्वं क्षयीभव इतिः चन्द्रः शप्तः ब्रह्मणोपदेशात् प्रभासक्षेत्रे षण्मासं यावत् एकासने उपविश्य दशकोटि महामृत्युंजय जपनानन्तरं शिवार्चनात् क्षयित्वं पक्षं वर्धमानत्वं च लेभे। चन्द्रानुरोधेन प्रीतो शिवः तत्रैव सोमेश्वर ज्योतिर्लिंग नाम्ना प्रसिद्धिश्चास्ति। उक्तञ्च—

प्रभासं च परिक्रम्य पृथिवीक्रमसम्भवम्।
फलं प्राप्नोति शुद्धात्मा सृतः स्वर्गे महीपते।।
सोमलिंगं नरो दृष्ट्वा सर्व पापात् प्रमुच्यते।
लब्धवाफलं मनोभीष्टं मृतः स्वर्गं समीहते।।[७५]

त्रयम्बकेश्वर ज्योतिर्लिंगवर्णने—कदाचित् अनावृष्टा तपसातुष्टः वरूणदेवेन लब्धंवर गौतमः, अनन्तरं तोयपूर्णगर्तलिप्सया ऋषयो गणेशमाराधितः, तेन गणेश्वरतो गोहत्या दोष व्याजतः सपत्नीकं गौतमं तत्रस्थः निःसारयामासुः। ततो ऋषीणामाज्ञया गौतमस्यपार्थिवार्चने प्रवृत्तिः, शिवानुग्रहतो गौतमस्य निष्पापत्वं गंगात्रयम्बकेश्वरयोः सदैव तत्र वासः, गंगाकृत गौतमद्वेषिणां ऋषीणामनादरः—कल्पभेदेन ऋषिषु गौतमकृतः शापश्च। यथा—

अशेवाः सन्तु भवतां पुत्रपौत्रादयो द्विजाः ।
पुत्रैः सहैव तिष्ठं तु भवन्तो नरके ध्रुवम् ।।
ततो भवन्तु चाण्डाला दुःखदारिद्रयपीडिताः ।
शठा निन्दाकराः सर्वे तप्तमुद्राकिंताः सदाः ।।[७६]

एवं गौतमेन शप्ताः ऋषयः शिवभक्तिविमुखाः काञ्चीनगर्य्यागताः।

सुदर्शन चक्रप्राप्ति वर्णनम्–

एकदा दैत्यपीडितानां सुराणां दुःखनिवृत्यै देवराजेन्द्रः भगवतः विष्णु सम्मुखमागत्य सर्वं निवेदितः। तेन खिन्नमनसा, शिवाराधमनसा च विष्णुः कैलासं प्राप्य तत्र वद्धासनः सहस्रसंख्याककमलपुष्पाणि सम्मुखे निधाय शिवसंहस्र नामोचारणेन सहैव क्रमशः एकैकं पुष्पाणि शिवलिंगोपरि अर्पितुमारेभे, शिवेन परीक्षार्थ एकं पुष्पं भ्रशितः, गणना क्रमेन्यूनं पुष्पमेकं विलोक्य विष्णुना सवकीयमेकं कमलाक्षं अर्पितवान् तेन प्रीतो शिवः सुराणां कार्यसाधनाय विष्णुयाचनानुरूपं तस्मैसुदर्शन चक्रमददत्। तेनैव जघानदैत्यान् विष्णुः।

शिवसहस्रनाम वर्णने प्रसंगे—देवकार्य गौरवाय भगवता महाविष्णुना एवं शिवप्रीत्यर्थं सहस्रनाम्ना शिवस्यस्तुतिं चकार। तेन प्रीतो हरः सुरकार्यार्थं दिव्यास्त्रं दिशन् अन्येषामपि रक्षणाय स्वमुखेनैवोक्ता—

अन्ये च ये पठिष्यन्ति पाठयिष्यन्ति नित्यशः ।
तेषां दुःखं न स्वप्ने अपि जायते नात्र संशयः ।।
रोग नाशकरं ह्येतद् विद्यावित्तदमुत्तमम् ।
सर्व कामप्रदं पुण्य शिवभक्ति प्रदं सदा ।।[७७]

इति अस्य शिवसहस्त्र नाम फलं ज्ञात्वा स्वस्व कार्य साधनाय सर्वे देवाः, ऋषयः, नृपादीनामपि शैवत्ववर्णनम् दरी दृश्यते शिवमहापुराणे। महाशिवरात्रि व्रतोद्यापन माहात्म्य विषये-साक्षात् शिव एवं जगज्जननीं पार्वतीं प्रति कथयति यत हे उमे-व्रतराजो यं फाल्गुन मासस्य प्रथमे पक्षे त्रयोदश्यां तिथौ भवति। अद्य ब्राह्मे मुहूर्ते उत्थाय नित्यकर्मादिकं विधाय सविधि स्थापिते देवालये गत्वा स श्रद्धया शिवं प्रणमेत् प्रार्थयेच्च।

देव देव महादेव नीलकण्ठ नमो स्तुते ।
कर्तुमिच्छाम्यहं देव शिवरात्रि व्रतं तव ।।

तव प्रभावाद् देवेश निर्विघ्नेन भवेदिति ।
कामाद्याः शश्रवो मां वैपीडां कुर्वन्तु नैव हि ।।७८

एवं शिवं ध्यात्वा षोडशोपचारै, गुरुमन्त्रेण, ॐ नमः शिवाय इति मन्त्रेण, वा शतरूद्रीमन्त्रेण विधिवत् सम्पूज्य तद्दिने निराहारं व्रतमाचरेत्। द्वितीयेन्हि प्रभाते उत्थाय नित्य क्रियादि सम्पाद्य सुपक्वान्नैः शिवसमर्पणबुद्ध्या स्मरणपूर्वकं यथाशक्ति ब्राह्मणान् भोजयेत्, तेभ्यो भक्तिपूर्वक गो आदि दानं दक्षिणादिकं दत्वा शिवं प्रणमेत् यथा—

देव देव महादेव शरणागतवत्सल ।
व्रतेनानेन देवेश कृपां कुरु ममोपरि ।।
मया भक्त्यनुसारेण व्रतमेतत्कृतं शिव ।
न्यूनं सम्पूर्णतां यातु प्रसादात् तवशंकर ।।७९

इति सम्पार्थ्य स्वयमपि शिवप्रसादरूप पारणम् कृत्वा शिवंस्मरणीयम् माहात्म्य प्रसंगे उपाख्यानमेकं प्रचलितः—एकदा कस्मिश्चिद् ग्रामे एको भिल्लः प्रतिवसति। स अनुदिनं अपकर्माचरन् निर्दोषान् पशून हत्वा तेभ्यो कुटुम्बं पुपोष। कदाचित् क्षुत् क्षाम पीडित मात्रा, पित्रा, स्त्रिया प्रार्थितः सन् स वनान्तरे गत्वा, मृगादि पशूनाम् आखेटार्थं तत्रैव स्थितः। दैवात् तद्दिने महाशिवरात्रिव्रतासीत्, अत एव तदुपरि शिवकृपावशात् किमपि न प्राप्तम्। सूर्यास्तं गते स विल्ववृक्षोपरि आरुह्य तस्मिन् स्थाने स्थितसरोवरे जलपानाय अवश्यमेव मृगाः आगमिष्यन्ति इति चिन्तापरोएकस्य विल्ववृक्षस्य शाखायां स्थितः सन् प्रतीक्षारतो जातः। दैवात् तेन त्रुटितानि, पतितानि विल्वपत्राणि अद्यः स्थितः शिवलिंगोपरि निक्षिप्ताः। एवमेव रात्रौ—प्रथम, द्वितीय, तृतीय, चतुर्थ यामे अपि भवति विल्व पत्राणां विक्षेपः तेन शिवपूजनम् जातम्। तस्मिन् समये एकामृगी जलपानार्थम् तत्रागता, तां विलोक्य स व्याघः वधार्थं शरचाप संधानं कृतम्। व्याघमपकारिणं दृष्ट्वा मृगीकथयति। हे व्याघ त्वं किंकर्तुमिच्छसि व्याघेनोक्तम् त्वद् वधानन्तरम् मान्सेन कुटुम्बं परिपालयामिति। सा व्रवीत्—हे व्याधराज शपथपूर्वकं कथयामि यत् बालकान् प्रबुध्य स्वयमागमिष्यामि, इदानीं तत्र गन्तुकामस्मि, आदिशतु। व्याघे नादिष्टा सामग्री गता। द्वितीया अपि तथैवागता प्रतिज्ञापूर्वक सा विगता। एवं तृतीयो मृगो अपि आगतः, तदपि प्रतिज्ञाय गतः। अनन्तरं उभेमृग्यौ, मृगो अपि तत्रागच्छन्ति-उक्तानि च तैः हे व्याघराज ? अस्माकं वधं कृत्वा स्व कुटुम्बं परिपालय, येन वयं कृतकृत्या भवेम्। इति तेषां वचनं श्रुत्वा व्याघो चिन्तयत्-यत् एते धन्याः, अहमेव दुष्टचित्तः। अस्तु—अद्यारभ्य नाहं अपकार्यें करिष्यामीति प्रतिज्ञाकृतः तेन प्रीतोः शिव तत् सम्मुखमागत्य वरमदात्—

श्रृणु व्याधाद्य भोगास्त्वं भुंक्ष्वदिव्यान्यथोप्सितान् ।
राजधानीं समाश्रित्य श्रृंगवेर पुरे पराम् ।।

अनपाया वंशवृद्धिः श्लाघनीयः सुरैरपि ।
गृहे रामस्तव व्याघ समायास्यतिनिश्चितम् ।।
करिष्यति त्वया मैत्रीं मद्भक्तसहकारक ।
मत्सेवासक्त चेतास्त्वं मुक्तिं यास्यसि दुर्लभाम् ।।[८०]

एवं शिवेनादिष्टोव्याघः शिवसम्मुखे स्वकीयं अपकर्मादिकं प्रकाशयन् प्रावोचत्- देव? कथं भवद् दर्शन मया प्राप्तंशिवेनोक्तम् हे व्याघराज एतत् सर्वं व्रतराज महाशिवरात्रेः प्रभावात्। ततः शिवं भूयो-भूयो सम्पार्थ्य-स व्याघः स्व राजधानीं प्रति गत। अतः परं-ज्ञान निरूपण प्रसंगे-शिवस्य सगुण-निर्गुण भेदानां वर्णनं कृत्वा भगवता वेदव्यासेन कथिता—

इयं हि संहिता पुण्या कोटिरूद्राह्वदया परा ।
चतुर्थी शिवपुराणस्य कथतामे मुदावहा ।।
एतां यः श्रृणुयात् भक्त्या श्रावयेद् वा समाहितः ।
स भुक्त्वेहाखिलान्भोगानं ते परगतिं लभेत् ।।[८१]

अथ उमासंहिता इति खण्डविषये विचारः

अस्यां संहितायाम् ५१ (एक पञ्चाशत्) अध्यायाः सन्ति। तत्र पुत्रार्थं एकदा भगवान् श्रीकृष्णः भगवतः शिवस्य सन्निधौ कैलासमगमत् तत्रत्यः कियद्दूरे महर्षे उपमन्योः दर्शनम् भवति। तेनैव महर्षिणा बहुविध कथानकैकरूपाध्यानतो श्रीकृष्ण सम्बोध्य शिवभक्ति निरूपणम् कृता। तेन तुष्टो श्रीकृष्णः कैलासस्यैक देशे शिवस्मरणपूर्वक दुष्करं तपस्तप्तुमारेभे। ऊर्ध्ववाहुः नभोदृष्टिः पादावनि शिरोमुखम् कृत्वा, जटीमुण्डी वेशं च घृत्वा षोडशमसिपर्यन्तं तपश्चकार। तेन उत्युग्रतपसा प्रसन्नो शिवः कृष्णं प्रत्युवाच—

कृष्ण जानामि भक्तं त्वां मयिनित्यं दृढ़ व्रतम् ।
वृणीष्व त्वं वरान्मत्तः पुण्यांस्त्रैलोक्य दुर्लभान् ।।[८२]

इत्थं प्रसन्नं शिवं ज्ञात्वा मुहुर्मुहुः प्रणम्य कृष्णेनोक्तम्—

देव महादेव याचे हं ह्युत्तमान् वरान् ।
त्वत्तो षटप्रमितान्नाथ त्वयोद्दिष्टान्महेश्वरः ।।
तव धर्मेमतिर्नित्यं यशश्चाप्रचलं महत् ।
त्वत् सामीप्य स्थिराभक्तिस्त्वयिनित्यममास्त्विति ।।
पुत्राश्चते दशाद्यानां पुत्राणां मम सन्तु वै ।
वध्याश्चरिपवः सर्वे संग्रामे बलदर्पिता ।।
अपमानो भवेन्नैव क्वचिन्मे शत्रुतः प्रभो ।
योगिनामपि सर्वेषां भवेयमतिवल्लभः ।।

सुप्रसन्नेन शिवेन तथास्त्विवति कथनान्तरं पार्वत्युवाच—

वासुदेवमहाबुद्धे कृष्णतुष्टामिते नघ ।
गृहाणमत्तश्च वशन् मनोज्ञान् भुविदुर्लभान् ।।८४
एवं देवीवचनं श्रुत्वा कृष्णः प्रोवाचत्–
देवि त्वं परितुष्टासि चेद्ददाति वरान्हि मे ।
तपसान्येन सत्येन ब्राह्मणान्प्रति मास्मभूत् ।।
द्वेषं कदाचित् भद्रं तु पूजयेयं द्विजान्सदा ।
तुष्टौ मातापितरौ भवेतां मम सर्वदा ।।
देवि भार्यासहस्त्राणां भवेयं प्राणवल्लभः ।
अक्षीणा काम्यता तासु प्रसाद् तवशांकरि ।।८५

देविरपि तथास्तु इति उक्त्वा पार्वतीपरमेश्वरौ तत्रैवान्तरधीयत्। ततः श्रीकृष्णः स्वराजधानीमागत्य तथैवाचरितम्। अतःपरं शिवमाया प्रभाववर्णनं, सनत्कुमारेण व्यासं प्रतिमहापातकोपपातकानां वर्णनम्, पापभेदनिरूपणम्, यमलोकमार्गवर्णनम्, यमदूतस्वरूप-वर्णनम्, नरकभेद निरूपणं नरकयातनाभेदनिरूपणम्, नरक विशेष दुःखवर्णनादिकं च सर्व सुष्ठुरूपेण वर्णितमस्ति।

ततः विविधप्रकारकदानप्रभाववर्णनम्, तेन यमपुरदुःखाभाव वर्णनम्, अन्नदानविशेष-फलमाहात्म्य वर्णनपुरःस्सरम् जीव तर्पणमाहात्म्यं, तपो माहात्म्यवर्णेनञ्च दर्शनीयम्। पुराण-माहात्म्यवर्णनम् दानमाहात्म्यभेदनिरूपणम्, ब्रह्माण्डवर्णेनप्रसंगे पाताललोकवर्णनम् अपि दर्शनीयम् वर्तते।

अस्मिन्नेवप्रसंगे—केन केन कर्मणा कस्मिन्कस्मिन्नरकेवासः इति निरूपणम्, पाप-प्रायश्चित् वर्णनम्, ब्रह्माण्ड वर्णने जम्बूद्वीपवर्ष निरूपणम्, भारतवर्ष वर्णनानन्तरप्लक्षादि सप्तद्वीपानां वर्णनम्, सूर्यादिनवग्रहाणां स्थिति निरूपणानन्तर-भूभुर्वः जनादिलोक वर्णनम् शिवाराधनादेव शिवलोकप्राप्ति वर्णनम्, सात्विक-राजस-तामसादि वर्णनपुरस्सरम् मानव-जन्म प्राशात्य वर्णनम्, विविधकर्मभिः अनेकानेन विविधयोनौ जन्मनिरूपणपूर्वक संग्रामफल-निरूपणम्, शरीरोत्पत्ति वर्णनपूर्वकं देहिनां देहे शुचित्वं, बालत्वं, युवात्वम्, वार्द्धक्यादि अवस्थाजन्य दुःखवर्णनम् अवलोकनीयम्। अतः परम् नारदं प्रति पंचचूडया पुश्चल्या कृत, साहसः, अनृतं, चापल्य, विवधामाया, भयं, अविवेक अशुचिः दयाहीनत्वादिकञ्चस्त्रीस्व-भाववर्णनान्ते नारदस्य मोहभंगः तत नारदे वैराग्योत्पत्तिः।

गतायुः पुरुषाणामन्तकाले मृत्योः विविधलक्षणानां सम्यक् विवेचनं विवेचितमस्ति। योगिनां, यतीनां, ऋषीणां महर्षिणाम् कृते मृत्युकालबन्धनप्रसंगे शब्दब्रह्मणः ध्यानं, गायत्र्या-दिमन्त्राणां अनुष्ठानादि प्रसंगे शब्द ब्रह्मणोस्वरूपमपि वर्णितमस्ति। तद्यथा—घोषं१, कांस्यं तथा श्रृंग३, घण्टां४, वीणा५, दिवंशजान् दुन्दुभि७, शंख८, शब्दं तु नवमं मेघगर्जितम्९।।८६

एवं—घोषं आत्मशुद्धिकारकम्, सर्वव्याधिहरम् च।

कांस्यं=प्राणिनां गतिस्तम्भनायद्विविष, भूतादि ग्रहाणां बाधानिवृत्तये।

शृङ्गं=अभिचारकर्मणि, उच्चाटने, शत्रूणां मारणे च प्रयोजयेत्।

घण्टां=मानवानां, देवानाञ्च आकर्षणाय प्रयुज्यते।

वीणा=वीणायाः, देव सिद्धौ अदृष्टदर्शन, अश्रुत श्रवणभवति।

वंशनाद=वंशनादेन सर्वेषां तत्त्वानं परिज्ञानं भवति।

दुन्दुभि=जरामृत्यु विनशनपूर्वकमजरत्वममरत्वञ्च प्राप्यते।

शंख=शंख शब्देन-इच्छारूपं प्राप्यते।

मेघनादं=एतेन विपत्तिसंगमो कदापि न प्रभवति।

अस्मिन्नेव कालवञ्चनप्रकरणे—ये सिद्धमहापुरुषाः, योगिनः, ऋषयश्च सन्ति तेषां विमला मतिः शिवभक्तौ-स्थिता भवति। क्षिति जलपावक गगनसमीरादिना निर्मितं पाञ्चभौतिकं यच्छरीरं तं परमात्मनि शिवे सम्यक्रूपेण नियोज्य ते शिवलोके सायुज्यं प्राप्नुवन्ति नात्र संदेहः। आदि सर्ग वर्णने ब्रह्मणा विविधा प्रजाः सिसृक्षुः। तेनैव समग्रा पृथिवीप्लाविता इत्यस्य वर्णनं विद्यते। ततः स्वायम्भुवादि चतुर्दशमन्वतराणां वर्णनं सर्गवर्णनप्रसंगे दक्षा-प्रजापतेः पुत्रान् भिक्षुवर्यान् विलोक्य दक्षप्रजापतिश्च इदं नारदस्यैव कृत्यम् इति विज्ञाय त्वं स्वापि स्थितिं मालभस्व तव सान्निध्यात् कलहः स्यादिति नारदाय दक्षस्य शापवर्णनं महतोत्पत्तिः, भूसर्गादिवर्णनम्, भूतसर्गादिवर्णनविधौतत्तज्ञानौ समुत्पन्ना मुख्यान् तत्तद्राज्य-पदप्रतिष्ठापनं वर्तते। भास्कर तेजो सहमाना संज्ञा स्वीकीयां छायां सजीवीकृत्य पति सन्निधौ नियुज्य, पितुःगृहं गता तत्र अपमानत्वात् बड़वाभूत्वा अरण्यं जगाम। छाया च तत्पुत्रतः स्वपुत्रे अधिकं प्रेमं दृष्ट्वा प्रसन्ना सति तया भास्करेण सर्वमवलोक्य प्रताड्य च तां, योगदृष्ट्या संज्ञां बडवारूपे अरण्ये विहरणमाना सूर्यो भ्वाभूत्वा संज्ञां ययाम। ततो अश्विनी कुमारोत्पत्ति वर्णनमिति वैचित्र्यामस्ति।

मनोः नवपुत्राणां वंशवर्णनम्, इक्ष्वाक्वादि मनुवंशवर्णनं, सत्यव्रतराजर्षेः, त्रिशंकु सगरादीनां उत्पत्तिं निरूप्य तेषां चरित्रवर्णनम्, पितृश्राद्धप्रभाव वर्णनम्, साक्षात् व्यासस्वस्वरूप आचार्यपूजनविधिः अपि सुष्ठुविवेचितम्।

व्यासोत्पत्तिप्रसंगे—एकदा इतस्ततः परिभ्रमन भगवान पराशरः यमुनातटमधिगतः पारं गन्तुकामा तं विलोक्य धीवरेणादिष्टातत्पुत्र्या पारं नीता। सहसा तत्स्वरूपं विलोक्य पराशरः कामवशं जातः, तत्पश्चात् तस्या, धीवरपुत्र्याः दक्षिणहस्तं गृहीतं, तया बहुप्रार्थ्य-माना, मोहितो पराशरेण स्वकीय योगबलेन मायाविस्तार्य अन्धकारं कृत्वा तया सह समागमोकृतः। तत्पश्चात् तस्याः नामकरणं सत्यवतीति कृत्वा, अति तेजस्वीजगत विख्यात, विपुलकीर्तिमान्, सर्वगुणसम्पन्न पुत्रप्राप्त्यर्थ, वरं दत्वा तत्रत्यः प्रचलितः। ततः सा सत्यवती

यथाकाले सर्वगुणसम्पन्न अतितेजस्वीपुत्र सुषुवे उत्पत्तिकाले एव स दिव्यपुत्रः मातुः प्रणम्य इच्छामात्रेण स्वकीयागमन, मात्रा निवेदय तपःकरणार्थ वनं जगाम् तत्र बहुकाल पर्यन्तं तपस्तप्तत्वा वेदानां शाखा-प्रशाखा चकार। तेनैव ''वेद व्यासेति नामप्रसिद्धिं गतः। स एव व्यासदेवः तीर्थाटनं कुर्वन् काशीं गत्वा मध्यमेश्वरं (व्यासेश्वरं) शिवलिंगं संस्थाप्य, मध्यमेश्वरानुग्रहात् दिव्यां शक्तिं प्राप्य अष्टादशपुराणानि उप पुराणानि च निर्ममे। तत्र अष्टादशपुराणेषु—

ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा ।
भविष्यं नारदीयं च मार्कण्डेय मतः परम् ।।
आग्नेयं ब्रह्मवैवर्तम् लैंगं वाराह मेव च ।
वामनाख्यं ततः कौर्मं मात्स्यं गारूड़मेव च ।।
स्कान्दं तथैव ब्रह्माण्डाख्यं पुराणं च कीर्तितम् ।
यशस्यं पुण्यदं नृणां श्रोतॄणां शांकरं यशः ।।
इदं रहस्यं परमं यः शृणोति पठत्यपि ।
स सर्वपाप निर्मुक्तः ऋषिलोके महीयते ।।[८७]

ततः मधुकैटभादि असुराणां वधार्थं देवी चरित वर्णनेसुरथराजसमाधि वैश्याभ्यां अरिजित् राज्य दारादिनिःसारित तयोः कथं न मोहभंगः, इति पृष्ठेन मेधा नामकेन ऋषिणा मधुकैटभमार्यमाणविधिना स्तुता महाकालीप्रादुर्भूय दर्शनमदात्। ततः क्षीरोदधौ सुप्त्या विष्णुकर्ण मलोद्भूतौ तौ (मधुकैटभौ) ब्रह्माणं हन्तुमुद्यतौ। ततः ब्रह्मणाप्रर्थ्यमाना स्वयं विष्णुना तत्रागत्य तौ मोहयित्वा ताभ्यां वरेलब्धे अजलस्थाने स्वकीये जघ्ने तौ हताविति च सम्यक् रूपेण मार्कण्डेयपुराणे तथा च—

शिवपुराणे अपि वर्णितमस्ति ।
तत्र देवी महाकालीन नाम्नाख्याता ।

महालक्ष्मी विषये—महिषासुर पीड़ित देवानां ब्रह्मपरिहराणां च महता प्रार्थनया प्रादुर्भूय महालक्ष्मीः देवेभ्यो विविधानि भूषणानि आयुधानि च गृहीत्वा महिषं संजधान्य देवान् तुतोष।

महा सरस्वती समुद्‌भावे—महाबली शुम्भ-निशुम्भ पीडितादेवा हिमवति बहुकालपर्यन्तम्, देवीम़स्तुवन्, तेन प्रीता भगवती देवान् प्रति अवोचत् का स्तूयते भवद्भिरितिगौर्योचते गौरीतनोरूत्पद्य कौशिकी इति मे स्तुतिः क्रियत इत्युचे। यः कार्यं साधयिष्ये इत्युक्त्वा अन्तरधदे। ततः इन्द्रादि देवानां स्तुत्या प्रसन्ना च सा भगवती हुं कृता तं श्रुत्वा चण्डमुण्ड देव्या ग्रहणाय शुम्भ निशुम्भ प्रेषित धूम्रलोचन चण्ड-मुण्ड रक्तबीजादीनाम् वधो अप्यवर्णितमस्ति ततः महासरस्वतीदेव्या समो शुम्भं निशुम्भो ससेना वधानिषाताम्।

उमा प्रादुर्भवाप्रसंगे—एकदा देव्याः प्रसादात् देवानां जयः असुराणां पराभवो जातः। तेन देवा=सगर्वाः संजाताः। अनन्तरं कूपात् एकः दिव्य ज्योतिपुञ्जः उत्थितः, क्षणान्तरं स अतिविशालकायं भयंकरं च समपद्यत तं ज्योतिपुञ्जं ज्ञातुमिच्छया देवराजइन्द्रेण प्रथमं वायुं

सम्प्रेषितः। तेनज्योति पुज्जेन तृणखण्डमेकं वायोः सम्मुखे निक्षिप्य तद्विनष्टे आदिष्टवान्, अक्षमोवायुः इन्द्रसमीपं जगाम्। ततः अग्निः ततः स्वयं देवराजइन्द्रः तत्र गत्वा जिज्ञासमानासीत् ततः स दिव्य पुज्जः सहसा अन्तर्हितः। विस्मितेनमनसा इन्द्रेण देवीं स्तुतः तेन प्रीता भगवती अम्बिका साक्षात् "उमा" रूपे वतीर्य स्वकीयं वास्तविकं रूपं दर्शयित्वा देवानां गर्वं समाप्य पुनः अनहंकारायादिष्य अन्तर्धानमगमत्। उक्तञ्च—

सगुणं निर्गुणं चेति मद्रूपं द्विविध मतम् ।
मायाशवलितं चैकं द्वितीयं तदनाश्रितम् ।।
ततः प्रभृति ते देवा हित्वा गर्व समाहिताः ।
उमा माराधयामासु यथापूर्वं यथाविधि ।।[८८]

कर्मयोग निरूपणप्रसंगे—पुराणानां कर्ता भगवता द्वैपायनवेदव्यासेन शिवमहापुराणे त्रिविध योगानां विवेचन विवेचितम् यथा—

ज्ञान योगः क्रियायोगो भक्तियोगस्तथैव च ।
त्रयोमार्गाः समाख्याताः श्रीमातुर्भुक्तिमुक्तिदा ।।
ज्ञान योगस्तु संयोगश्चित्तस्यैवात्मनातु यः ।
यस्तु बाह्यार्थ संयोगः क्रियायोगः स उच्यते ।।
भक्तियोगो मतो देव्या आत्मनश्चैक्य भावनम् ।
त्रयाणांमपि योगानां क्रिया योगः स उच्यते ।।[८९]

इत्थं त्रिविधयोग समन्वित देव्याः आख्यानं, चरित्रं च ये श्रृण्वन्ति ते मोक्षभागिनो भवन्ति। ये देवालयं निर्माति, तस्मिन्, देव्यास्थापनं करोति, अनुदिनं "उमा" "उमा" इति जपन धूपदीपनैवेद्यादि उपकरणैः ये देवीं यजन्ति प्रणमन्ति तथा श्रीसूक्तेन, देवी सूक्तेन च स्तौति पुष्पादिकमर्पयन्ति उमायाः प्रसादं भक्षन्ति ते निर्धूत पापाः देव्या सन्निधौ गणरूपेण विराजन्ते। विशेष चैत्रशुक्ल नवरात्र तथा आश्विन शुक्ल नवरात्रस्य व्रतमाचरन्ति ते "चिरथ" पुत्रसुरथवत् अपहृत राज्य, कोष, गृह, पुत्रदारादि पुनः प्राप्नुवन्ति नात्र शंकायाः अवसरः। साक्षात् मंगलादेवी "उमा" नाम्ना सर्वेषां कल्याणकारिणी भवति। उक्तञ्च—

संहिते ये महापुण्या शिवभक्ति विवर्द्धिनी ।
नानाख्यान समायुक्ता भुक्तिमुक्ति प्रदाशिवा ।।
य एनां श्रृणुयात् भक्त्या श्रावयेत् वा समाहितः ।
पठे द्वा पाठये द्वापि स याति परमां गतिम् ।।[९०] इति

अथ कैलास संहिता इति खण्डविषये विचारः

अस्यां संहितायां २३ अध्यायाः सन्ति। कैलाससंहितायां प्रवृत्ति हेतु कथनानन्तरं

हिमवति तपश्चर्तुं काशीदर्शनकामनया गतानां मुनीनां प्रति भगवता वेदव्यासेन प्रणवशब्दार्थः, प्रकाश इति सम्यक् व्याख्यातम्।

ततः—एकदा दाक्षायणी सती पितुः दक्षयज्ञे गत्वा शिव निन्दां च श्रुत्वा स्व कलेवर त्यागानन्तरं हिमवतः गृहे पार्वतीनाम्ना अजनि। नारदोपदेशात् शिवं पतिरूपे प्राप्त्यर्थं तपमकारि। ततः हिमवता सविधिशिवेन सह विवाहिता देवी। एकदा मन्त्रदीक्षा-तत्त्वार्थप्रार्थ्यमाना देवीं कैलास शिखरे नीता। तत्र प्रणवमन्त्रेण दीक्षिता देवी शिवेनपृष्टायत्—

कथं प्रणव उत्पन्नः कथं वेदादिरूच्यते।
मात्रा कति समाख्याताः कथं वेदादिरूच्यते।।
देवताः कति च प्रोक्ताः कथं वेदादि भावना।
क्रिया कतिविधाः प्रोक्ता व्याप्यव्यापकता कथम्।।[११]

इत्याद्यनेके प्रश्नाः कृताः। अस्योत्तरे—ओंकार स्वरूप कथनानन्तरं ओंकारं तथा ॐ मन्त्रदीक्षाग्रहणे विरजा होमादि विधि कथनं दीक्षा सम्पन्नस्य, पूजास्थानगमनानन्तर दैनिका-चारव्यवहार कथनं, पूजास्थाने मण्डलविरचन् प्रकार कथनं आसन प्राणायामादि विधान विवरणम्, ध्यानावाहन अर्घ्यआचमनादि विधानपूर्वक शिवस्य विविधप्रकारक पूजाविधिवर्णनं पंचावरणपूजनक्रम वर्णनं, संन्यास मण्डलविधि, संन्यास पद्धति विषये प्रणवस्यैव सर्व मान्यता इति प्रसंगे उक्तम्—

प्रणवस्य ऋषिर्ब्रह्मा देवी गायत्रीमीरितम्।
छन्दो त्र देवता हं वै परमात्मा सदाशिवः।।
अकारो बीजमाख्यात मुकारः शक्तिरूच्यते।
मकारः कीलकं प्रोक्तं मोक्षार्थे विनियुज्यते।।[१२]

अनेन प्रकारेण प्रणवस्य सर्वमान्यत्वं विवेचितमस्ति।

प्रणवपद्धतिविषये-शिवस्य नित्यप्रतिपादकः अष्टसु नामसु शिवः, महेश्वरः रूद्रः, पितामहः, संसारवैद्यः, सर्वज्ञः, परमात्माचेति। उपाधिनिवृत्तौ-शिवः शंकरः, महादेव-एव साक्षात् शिवरूप एवास्ति। इत्थं सार्थ शिवनामाष्टककथनं, पूजोत्तरं प्रणवोपदेशग्रहणविधान-कथनं, ततः लिंगपूजाविधिनिरूपणं, प्रणवग्रहणप्रकार श्रवणानन्तरं देव्याः आत्मतुष्टिवर्णनम् ततः सूतस्य तीर्थाटनवर्णितमस्ति। सूतविरहाजातदुःखानां काशीस्थ ऋषिणां सूतस्य पुनः दर्शनअभिलाषावर्णनम्, सम्वत्सरान्ते सूतागमनमणि तेन समेषां ऋषीणां परमाह्लाद वर्णनम्। भगवता वामदेवेन "ॐ"कारार्थ प्रकाशविषयकः प्रश्ने वामदेवोक्त स्कन्दस्तोत्रं, ततः स्कन्दादेव वामदेवस्य प्रणवार्थप्राप्ति वर्णने उक्तम् यथा—

ॐ नमः प्रणवार्थाया प्रणवार्थ विधायिने।
प्रणवाक्षर वीजाय प्रणवायनमोनमः।।

वेदान्तार्थ स्वरूपाय वेदान्तार्थ विधायिने ।
वेदान्तार्थ विदे नित्यं विदितायनमोनमः ।।[२]

इत्थं प्रणवार्थं विधाय शिवस्तुति विषये—

ब्रह्मादिदेव मुनिकिन्नर गीयमान,
गाथाविशेषशुचिचिन्तितकीर्तिधाम्ने ।
वृन्दारकामल किरीट विभूषणस्त्रक,
पूज्याभिराम पदपंकज ते नमोनमः ।।[१२]

सर्वमेतत् प्रणवशब्दार्थ प्रभावात् परमेश्वर वाचकः पशुपतिः पापमपाकरोति। प्रणवजपाधिकार कथनप्रसंगे-ओंकारार्थकथनम्, नान्दी श्राद्ध, ब्रह्मयज्ञादि विधिवर्णनम्, प्रणवार्थश्च साक्षात् शिव इति विविच्य प्रणवजपाधिकारार्थे विरजाहोमप्रकारकथनं, रात्रौ गायत्री जपविधानवर्णनम्, संन्यासविधेः विवेचनप्रसंगे—

यो गुरुः स शिवः प्रोक्तो यः शिव स गुरुः स्मृतः।

इति वाक्यानुसारि शिवस्मरणपूर्वकं सर्वत्रैव ब्राह्मणानांप्रशंसा तेषा माहात्म्यमपि सुष्ठुरूपेण दर्शनीयम्। यथा—

समस्त सम्पत्समवाप्ति हेतवः,
समुत्थितापत्कूलधूमकेतवः ।
अपार संसारसमुद्रसेतवेः,
पुनन्तु मां ब्राह्मणपादरेणवः ।।
आपद्धनध्वान्त सहस्रभानवः,
सतीहितार्थार्पण कामधेनवः ।
समस्त तीर्थाम्बु पवित्र मूर्तयो
पुनन्तु मां ब्राह्मण पादपांसवः ।।[१३]

इति ब्राह्मणान् संस्तूय श्रुतिस्मृति, वेदादिसंमत स्व वर्णाश्रमधर्मानुसारि शिवं सम्पूज्य सायुज्यता प्राप्तिदर्शनीयम्। षट्प्रकारक "ॐ" प्रणवरूप साक्षात् शिव एव। इत्यस्मिन् प्रसंगे वामदेवोक्तिः—

षड्विधार्थपरिज्ञानमिष्टदंकिमुदाहृतम् ।
के तत्र षड्विधा अर्थाः परिज्ञानं च किं प्रभो ।।
प्रतिपाद्यश्च कस्तस्य परिज्ञाने च किं फलम् ।
एतत् सर्वं समाचक्ष्व यद्यत्पृष्टं महागुहम् ।।[१४]

इति वामदेवप्रश्नोत्तरे श्री सुब्रह्मण्येनोक्तम्—

प्रथमो मंत्ररूपः स्यात् द्वितीयो मंत्रभावितः ।
देवतार्थस्तृतीयो अर्थः प्रपञ्चार्थस्ततः परम् ।।

चतुर्थः पञ्चमार्थः स्यात् गुरुरूप प्रदर्शकः ।
षष्ठशिष्यात्मरूपो अर्थः षड्विधार्थाः प्रकीर्तिताः ।।[९५]

एवं प्रणवस्य षड्धार्थप्रतिपाद्य तदुपासनार्थं शिवात्सृष्टेः उत्पत्ति वर्णनम्, सगुण शिवस्वरूप-निरूपणं सृष्टिउपक्रमः, संहारस्यापि प्रकार कथनम्, आब्रह्मादि स्थावरान्तसृष्टेः कारणं शिव एवास्ति शक्तिर्वा इति वामदेव प्रश्नोत्तरे "ॐ"कार एव सृष्टेः साधारणयोकारणः मुख्यश्च शिवशक्ति समवेतः। शिव शक्त्या सम्पृक्तो भूत्वा सृष्टि करणे पूर्णसमर्थाः। उक्तञ्च—

शिवशक्ति समायोगः परमात्मेति निश्चितम् ।
पराशक्ते स्तु संजाता चित्शक्तिस्तु तदुद्भवा ।।[९६]

एवं शिवशक्त्योः स्वरूप समवेत् वर्णनावसरे शिवस्योत्कृष्टत्वं (उपरिस्थत्वं) प्रकृतेः अधः स्थत्वं इति कथने सर्वसंशयपरिहाराय वामदेवस्य शिवस्य अद्वैतज्ञानोपदेशाय स्वामिकार्तिकेय कृत तत्वसृष्टिप्रकथने—

स्त्रीपुंरूपमिदं विश्वं शिवशक्त्यात्मकं बुधैः ।
भवाद्शैरूपास्यं स्यात् शिवज्ञान विशारदैः ।।
सर्व ब्रह्मेत्युपासीत् सर्वं वै रूद्र इत्यपि ।
श्रुतिराह मुने तस्मात् प्रपञ्चात्मा सदाशिवः ।।[९७]

एवं शिवस्य अद्वैतस्वरूपं वर्णितमस्ति—

अतः परम् यतीनां गुरुत्वकारण, संन्यास पद्धत्या शिष्य करणप्रसंगे भगवता वामदेवेनोक्तम् यत् प्रथमः भूशुद्धि आत्मशुद्धिं च विधाय अष्टदल कमलोपरि कलशस्थापनं कृत्वा, सप्तमृतिकया, पंचरत्नादिना कलशं विभूष्य तदुपरि नारिकेलं संस्थाप्य "ग्लूम" उच्चारणपूर्वकं शिवस्वरूपं गुरुमुखात् प्रणवोच्चारण पूर्वकं "हंसः सो हं" अस्य मन्त्रस्योपदेशं स्वीकरोतु। ततः गुरुः परोक्षरूपेण भष्मविधान पूर्वकं २२ नामभि "योगपट्ट" विधि वर्णयति तद्यथा—(महावाक्यानि) १. प्रज्ञान ब्रह्म, २. अहं ब्रह्मास्मि, ३. तत्त्वमसि, ४. अयमात्माब्रह्म, ५. ईशावास्यमिदं सर्वम्, ६. प्राणो अस्मि, ७. प्रज्ञानात्मा, ८. यदेवेह तदमुत्रतदन्विह, ९. अन्यदेवतद्विदितादथो अविदितादपि, १०. एव त आत्मान्तर्याम्यमृतः, ११. स यश्चायं पुरुषो यश्चासावादित्ये स एकः, १२. अहमस्मि परं ब्रह्म तदेवाहं न संशयः, १३. वेदशास्त्र गुरुत्वात्तु स्वयमानन्दलक्षणम्, १४. अहमस्मि परं ब्रह्म परं परपरात्परम्, १५. तत्त्वस्य प्राणो अस्मि पृथिव्याः प्राणोहमस्मि। १६. अपां च पाणो हमस्मि तेजश्च प्राणो हमस्मि, १७. वायोश्च प्राणो हमस्मि आकाशस्य प्राणो मस्मि, १८. त्रिगुणस्य प्राणा हमस्मि, १९. सवो हं सर्वात्मको हं, २०. सर्वखल्विदं ब्रह्म, २१. सर्वो हं विमुक्तो हं, २२. यो सौ सो हं हंसः सो हमस्मि। इति महावाक्यानि। ततः यतीनां क्षौर स्नानादि आचारविधि वर्णनम् कृतम्। यतीनां दाह निषेधात् खनन विधानं, तत्प्रकारवर्णनोत्तरं दशाहान्त कर्म वर्णन प्रसंगे उक्तम्

यत् यतीनां सर्वकर्मणि शिवाश्रयपराभवति। प्राणवायोः निर्गमनान्तरं, कौपीनादिनि संत्यज्य, नवीनानि संधार्य, सर्वांगे भस्मलेपं, त्रिपुण्डं विरच्य, शंखस्य शुद्धोदकेन शुद्धिं विधाय, सुगंधकुसुममाल्यैरलंकृत्य, प्रणवपूर्वक पंचगव्य करणं तेन अनिषिच्य, गर्ते योगासने प्राङ्मुखःसंस्थाप्य, द्वादशावृत्या प्रणवोच्चारणपूर्वकं प्रणमेत्। अथ यतीनां एकादशाह कृत्यम्-एकादशे न्हि गोमयलिप्तायां भूमौ पूर्वे पंचमण्डलानि विरच्य तदुपरि शिवध्यान पूर्वकं देवेश्वर्यादि पंचदेवीनावाह्य "ॐ भूर्भुवः स्वः" इति मन्त्रेण धूपदीयादिनि निवेद्य प्रार्थयेत्। ततः चतुःब्राह्मणानाहूय पाद प्रक्षालनपूर्वक श्रद्धया शिवसन्निधौ तान् भोजयेत् दक्षिणामपि दापयेत्। ततः नारायणबलिं कुर्यात्। कुशोपरि पायसबलिं दद्यात्। शिवं प्रार्थयेच्च।

अथ द्वादशाह विधानम्—द्वादशे न्हि आन्हिक कृत्यं सम्पाद्य ब्राह्मणानाहूय सम्पूज्य च मध्यान्हे शिवरूपं ध्यायान् सुस्वादु भोजनैः भोजयेत्। ततः तेभ्यो दक्षिणा, छत्रं, उपानहः,, कमण्डलुं, वेणुदण्डं च दापयेत्। ब्राह्मणेभ्यः आशीषं गृह्णीयात्। ततः द्वारस्थ, यतीन् शिवभक्तान् दीनानाथान् भोजयेत्। ततः शिवरूपं गुरुं ध्यायन् स्व शास्त्रविहित कर्मणि संलग्नो भवेत्। इत्थं यतीनां शिवलोक प्राप्तिर्भवति।

अथ वायवीय संहितायां पूर्वभागे इति खण्ड विषये विचार :

अस्यां संहितायां द्वौ भागौ स्तः। तत्र पूर्वभागः उत्तरभागश्चेति। तत्र पूर्वभागे ३५ अध्यायाः सन्ति।

नमः शिवाय सोमाय सगणाय ससूनवे ।
प्रधान पुरुषेशाय सर्गस्थित्यन्त हेतवे ।।

पूर्वं तावत् वेदादि चतुर्दश विद्या कथनम्-चत्वारोः वेदाः=ऋक् यजुः साम, अथर्वाः। षड्ङ्गानि=शिक्षा कल्प-निरुक्त-ज्योति-छन्द व्याकरणानि। मीमांसान्याय-पुराणानि। अष्टादशपुराणानि। उक्तञ्च—

अंगानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्याश्चेता चतुर्दश ।।[९८]

पुराणलक्षणप्रसंगे—

सर्गश्च प्रतिसर्गश्च वंशोमन्वन्तराणि च ।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ।।[९९]

अर्थात्-सर्ग-प्रतिसर्ग-वंशः, मन्वन्तर-वंशानुकथनम् हमानि पुराण्लक्षणानि। पुराणनामानि-अष्टादशविभागे विभक्तेषु पुराणेषु—

१. ब्रह्म, २. पद्म, ३. विष्णु, ४. शिव, ५. भागवत् ६. भविष्य, ७. नारद, ८. मार्कण्डेय, ९. अग्नि १०. ब्रह्मवैवर्त ११. लिंग १२. वाराह १३. स्कन्द १४. वामन १५. कूर्म १६. मत्स्य १७. गरूड़ १८. ब्रह्माण्ड इमानि अष्टादशपुराणानि सन्ति।

ततः एकदा ऋषीणाम् मध्ये ''कः परात्पर ब्रह्मेति'' विषये विवादो जातः। विवदमाना ऋषयः ब्रह्माणं सकाशम् गताः। ब्रह्मणा च शिवध्यानपूर्वक मुक्तम् यत् सर्वदेवाधिदेव असिलसृष्टेः मूलकारणम् साक्षात् परात्परब्रह्म ''सदाशिव'' इति। तेनैव संचालित निखिलं जगत्। अस्मिन्नेव प्रसंगे नैमिषारण्य वर्णन तन्नामकरणविषये ब्रह्मणोक्ति-ब्रह्मणा ऋषीन् प्रति कथितम् यत् हे तत्त्ववेत्तारः अहमिदानीं मनोमय चक्रम् त्यजामि अस्य नेमि यत्र त्रुटिता-भविष्यति तत्रैव पुण्यस्थले युष्माभिः सदाशिव प्रीत्यर्थं शिव यज्ञायोजनं कर्तव्यम्। एवमुक्ता ब्रह्मा स्वकीयं मनोमय चक्रं विससर्ज। ऋषयो अपि तत्पश्चात् प्रचलिताः। ततः एकस्मिन्न-रण्ये शिला खण्डात् अवरुध्य तस्य चक्रस्य नेमि त्रुटिता। तत्रैव सर्वे ऋषयः परमात्म तत्त्व प्राप्तिकामः यक्षा योजनं कृत्वा शिवं तुतोष। ततः सत्रसमात्युत्तरं वायोः आगमनं। ऋषीणा-मनुरोधेन च वायोः शिवैश्वर्य कथम्, शिवस्यापर नाम पशुपतिः इति शब्दे विवादो जातः, समाधाने च शिव एवेति कथनम्।

यथा—

तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम् ।
पति पतीनां परमं परस्तात् विदामदेवं भुवनेश्वरेश्वरम् ।।[१००]

एवं शिवस्यापर तत्त्व जिज्ञासमाना ऋषीणां प्रति वायोः शिवतत्त्वकथनम्। यथा-कालः शिवाद् भिन्नो नास्ति, अपितु शिवेच्छया एव। क्रीडा निमित्त एव शिवस्य अखिला-सृष्टिर्भवति। अखिल ब्रह्माण्डोत्पत्तिः, मन्वन्तराः कल्प प्रतिकल्प भेदाः, सर्ग प्रतिसर्गोद्-भावाश्चापि शिवेच्छयैव।

कल्पभेदेन च ब्रह्मविष्णुरूद्रादीनामन्योन्य प्रादुर्भावः। प्रतिकल्पे ब्रह्मणः सकाशात् रूद्रोत्पत्तिः, अर्धनारीश्वर रूपेण प्रादुर्भूतात् शिवात् ब्रह्मणोमैथुनीसृष्टि कल्पना तत्प्रसंगे विधिदेहार्धात् मनुशतरूपोत्पत्तिः दक्षादीनां चोत्पत्तिः संजातेति। ततः निखिलसृष्टिरूत्पत्तिः वर्णितमस्ति शिवमहापुराणे। ततः भगवती शिवायाः सतीनाम्ना दक्षप्रजापतिगृहे अवतारः भगवता शिवेन सह विवाहः, गते कैलासपर्वते दक्षे अनवधानतया दक्षस्य क्रोधः तस्मात् स्वकीये यज्ञ महोत्सवे द्वेषात् सतीशिवस्य च अनामन्त्रणम्, कैलासे भगवतानारदेन सर्व ज्ञात्वा, अतिशयअनुरोधात् शिवेनाज्ञाप्ता पितुः यज्ञमहोत्सवे गमनम्, तत्र अवमानत्वात् सती सत्याः देहत्यागः नारदेनैव-पुनर्ज्ञात्वा शिवेन वीरभद्रोत्पत्तिः, सगणस्य वीरभद्रस्य दक्ष यज्ञस्थाने गमनम् तत्कृत दक्षमखविध्वनम्, यज्ञ स्थानात् विण्वादीनां गमनम्, अग्न्यादीनां च पलायनम्, दक्ष पक्ष पात् वशात्, वीरभद्र-देवयोर्मध्ये दारूणसंग्रामः, वीरभद्रकृत् देवादीनांविरूपकरणम् पराभूतदेवैः कृतया स्तुत्या प्रसन्नात् शिवात् देवसान्त्वनादि सर्वं प्रसंग शिवमहापुराणस्य वायवीय संहितायां सुविस्तृत रूपेण विवित्तस्ति।

ततो अपत्नीकेन शिवेन तपस्तप्तुं मन्दराचले गमनम् अत्रान्तरे शुम्भ-निशुम्भ

दैत्ययोः उत्पत्तिः, तयो उत्पात् करणं विधिप्रार्थनया च प्रवृत्तयोः शिवयो विचित्रलीला प्रपञ्चनम् यथा—

एवमध्यर्थितो धात्रा भगवान्नीललोहितः ।
कालीत्याह रहस्यम्बां निन्दयन्निव सस्मितः ।।
ततः कुद्धातदादेवी सुवर्णा वर्ण कारणात् ।
स्मयन्ती चाह भर्तारभ्समाधेयया गिरा ।।[१०१]

एवं निगदिते महाकालीं प्रति त्व गौरीति ब्रह्माकथनानन्तरं काली गौरी भूत्वा सखिभिः साकं ससिहेन दृप्तेन च निशुम्भ शुम्भ दैत्याभ्याम् सह तुमुलं युद्धमजायत्। तत्र देव्या महाकाल्या तौ निहन्तौ जातौ।

उक्तञ्च—

निहन्तौ च तया तत्र समरे दैत्य पुंगवौ ।
तद्बाणैः काम बाणैश्च छिन्नभिन्नांगमानसौ ।।[१०२]

एवं पराम्वा जगदम्बायाः महाकाली स्वरूप वर्णनमस्ति। षडध्व निरूपणप्रसंगे-षड् संख्यावाची ६-तथा ऊध्व=मार्ग। अर्थात् योगिनां यतीनां परमशिव भक्तानां कृते या पराशक्ति सैव महामाया कुण्डलनी नाम्नाख्याता। सति प्राप्तौ तस्या षड्मार्गाः शात्रे विहितमस्ति। या पराशक्तिः सा शिवा इति अर्थात् शिवे या शिवत्वं तत्सवं शिवारूपात्मिका शक्तिरिति। षड्ध्वे=मन्त्र, पद वर्ण एतेशब्दात्मकाः। कला, भुवन, तत्त्व एते अर्थात्मकरूपाः। यथा—

मन्त्राध्वा च पदाध्वा च वर्णाध्वा चेति शब्दतः ।
भुवनाध्वा च तत्वाध्वा कलाध्वा चार्थत क्रमात् ।।[१०३]

एषां वर्णनम् शिवपुराणे "वागर्था विव समाख्याता—

त्रिविधाकार्य भेदेन सा प्रसूते षडध्वनः ।
स वागर्थमयश्चाध्वा षड्विधो निखिलं जगत ।।[१०४]

शिवस्य सगुण-निर्गुण भेदाख्यान पुरःसरम् विचित्र चरित्रश्रवणं नास्तिक्यप्रवृत्तबुद्धिप्रवाहस्य निवर्तनक्षम शिवतत्त्वविषयमनेके ऋषि प्रश्न प्रपञ्चने वायुना प्रोक्त अनेक दृष्टान्तैः विशुद्ध-शिवतत्वस्य व्याख्यानम् दर्शनीयम्। अयं तु मोक्ष प्रापक समेषु धर्मेषु सर्वश्रेष्ठमस्ति। अस्मिन्नेव प्रकरणे द्वादशसु मासेषु क्रमेण विभिन्न धातृनां लिंगं स्थापन पूर्वकं शिवार्चन वर्णितमस्ति। यथा—

वैशाखमासे—हीरकलिंगं, ज्येष्ठे=मरकतमणेः, आषाढ़े मुक्तालिंगं, श्रावणे नीलममणेः भाद्रपदमासे पद्मरागमणेः लिंगं—(आसोज आश्विन) मासे गोमेदमणेः कात्रिके मूंगायाः, मार्गशीर्षे-वैदूर्यमणेः पाषमासे पुखराजमणेः, मार्घेसूर्यकान्तमणेः, फाल्गुने चन्द्रकान्तमणेः चैत्रमासे रत्नानां अधिकमासे (मलमासे) च स्वर्ण लिंगं संस्थाप्य कृते शिवार्चने अवश्यमेव

भुक्तिं मुक्तिं च विन्दन्तिमानवाः। ततः सविस्तरं पाशपत व्रतकथनम्, भस्मधारणमहिमा च विवेचितमस्ति।

प्रश्नानुरोधेन शिशुत्वे उपमन्योः शैवागमतत्त्वज्ञानम् तस्य पूर्वजन्म वृत्त कथनम्, भगवतः शिवस्य कृपया बालक भक्त उपमन्योः परमविभूति लाभश्च। ततः मातुरादेशात् उपमन्युतपस्तप्ता देवाः शिवसन्निधौ प्राप्ताः। तदा देवराज इनुरूपशिवेन उपमन्युसमीपं गत्वा ''वरं ब्रूहि'' इति कथनानन्तरं बालकेन उपमन्युना उक्तं यत् शिवभक्तिं विना मम किमपि नेष्टं तदा शक्ररूपधरी शिवः शिवनिन्दामकरोत्तां श्रुत्वा उपमन्युः तं शप्तुं प्रवृत्तस्तदा शिवस्वरूपेण तस्य कामवरं दत्वा शिवः स्वकीयं कैलासं प्रतिगते सति बालकेन शिवध्यान स्मरणपूर्वकं ''ॐ नमः शिवायेति'' मन्त्रस्य जपं कुर्वन् मातुः सकाशं प्राप्तः। उक्तम् च—

उपमन्युः प्रसन्नात्मा प्राप्यतस्मात् वराद्वरान् ।
जगाम जननीस्थानं सुखं प्रापाधिकं च सः ।।[१०५]

वायवीय संहितायां उत्तरभागः।

अस्याः संहितायाः उत्तरभागे ४। अध्यायाः सन्ति। तत्र यथाक्रमानुरोधेन एकदा पुत्रप्राप्तिकामनया शिव सन्निधिं गतस्य भगवतः श्रीकृष्णस्य उपमन्योर्लब्धात् पाशपताख्य वार्षिकव्रतानुष्ठानेन जाम्बवत्याः साम्बनामकपुत्रप्राप्तिः संजाता। पाशुपत व्रतविषये ऋषीणा-मनुरोधेन वायुकृत व्रतविधान कथनप्रसंगे पशुपतिं विना कस्यापिपशोः (जीवस्य) तृण छेदने शक्त्य भावात् पशुपति स्वरूपाच्छिवादिष्टं संसार चक्रस्यापि वर्णन विद्यते। शिव एव निखिलं जगत, रचयति परिपालयति, विनक्ष्यति च। यथा—

तेनादौ क्रियते विश्वं तेन संह्रियते पुनः ।
न तन्नियन्ता कश्चितस्यात्तेनं सर्वं निवस्यते ।।[१०६]

ततः ''सर्वं शिवमयं जगत'' इति सर्वस्यास्य जगतः शिवमयत्वात् सर्वेषामभय-दानात्सर्वोपकारणकरणाच्च पुत्रपौत्रादिप्रीत्या पितृसंतोषः। परमशिव तत्त्वविषये श्रीकृष्ण कृतप्रश्नस्योत्तरत्वेन ''चन्द्र चन्द्रिकानिभमिदं विश्वम्'' इति गौरीशंकराधिष्ठितं सर्वं जगत इत्यादि अनेकैरूपाख्यानैः उपमन्युकृतवर्णनम्। अस्य समग्र विश्वस्य वस्तुतः शिवरूपत्वे ''एकं सद् तं विप्राः बहुधा वदन्ति'' इति महावाक्यस्य उपमन्युकृतविधिवत् विवेचन प्रसंगे—

वाच्यमित्यपरे प्राहुरवाच्यमिति चापरे ।
शब्दात्मकं परे प्राहुः शब्दातीतमथापरे ।।
केचिच्चिन्तामयं प्राहुश्चिंतया रहितं परे ।
ज्ञानात्मकं परे प्राहुर्विज्ञानमिति चापरे ।।
केचिज्ज्ञेयमिति प्राहुरज्ञेयमिति केचन ।
परमेके तमेवाहु रपरं च तथा परे ।।[१०७]

शिवतत्त्व प्रपञ्चते यथा सकाशात् अनेके स्फुलिंग उत्पद्यन्ते, लीयन्ते तथा अग्नेः शिवात् अनन्ताः शक्तयः उत्पद्यन्ते विलयं च प्राप्नुवन्ति एवं प्रकारेण शक्तिस्वरूप कथनं, तासां सम्यक् ज्ञानात् शिवभक्त्या च शिवस्य परमतत्त्वज्ञानं प्राप्नुवन्ति येन संसारिजीवाः संसारसागरस्य पारं गच्छन्ति, गमिष्यन्ति च। युगे युगे शिवस्य योगावतर वर्णनम्, गौरींप्रति ससाधनायाः शिवभक्तः तत्स्वरूप कथनम्, ब्राह्मणानां, ब्राह्मणेत्तरभक्तानाञ्च अधिकारधर्म-प्रपञ्चनं वर्णितमस्ति।

"ॐ नमः शिवाय" इति पञ्चाक्षरमहामन्त्रस्य माहात्म्यं सम्यक् रूपेण विवेचितमस्ति। कलिकलुषित कालो अपि सश्रद्धया पञ्चाक्षर महामन्त्रस्यानुष्ठानेर्न शिवसालोक्य सारूप्य प्राप्तिर्भवति। पञ्चाक्षरमन्त्रस्य जप अनुष्ठान विधिः तथा शिवदीक्षा शिष्यसंस्कार विधिः गुरोशिष्य योग्यताविवरणायां षडध्वविज्ञानविचारणा वश्यं कर्तव्यमिति अभिधाय तत्प्रसंगे षडध्वलक्षण प्रपञ्चनम् दीक्षादान प्रकारविधाने पूर्वं आन्हिक कृत्यं सम्पाद्य शुभासने प्राङ्मुखः उपविष्य गोमयोदकेनोपलिप्तायां भूमौ गुरुशिष्यो पंचकलशान्धृत्वा आवहयेत् पूजयेच्च। ततः चतुः सेटक परिमितं हव्यं निर्माय-अर्ध शिवं निवेदयेत् अर्धेन च हवनं कारयेत्। ततः "ॐ हुं नमः शिवाय" स्वाहा इति मन्त्रेण वारत्रयं हवनं कृत्वा गुरुः शिष्य शिखाया अविवाहिताकन्यया निर्मितं सूर्यबघ्नीयात्। अनन्तरं वागीश्वरीं ध्यायन् मन्त्रपूत कर्तरिणा (कैंची) शिखाछेदन कुर्यात् अनन्तरं षडध्वज शुद्धिं विधाय प्रार्थयेत् यथा—

पुनः सम्पूज्य देवेशं यन्मया समनुष्ठितम्।
सुकृतं कुरु तत्सर्वं इति विज्ञापयेत् शिवम्।।[१०८]

ततः साधकानां संस्कार, मन्त्रमाहात्म्य निरूपणम् तत्र मन्त्रग्रहणविधिः, जपप्रकारः तत्फलानिविषये विधिवत् विवेचनम् शिवमहापुराणे अस्ति। नित्य, नैमित्तिक कर्मानुष्ठान तन्त्रसूर्यपूजा पञ्चयज्ञ प्रकार वर्णने असि शक्ति पुत्रो शिवएव सर्वं इति मत्वा शिवस्यैव ध्यानादिकं वर्णितमस्ति। यथा—

ध्यायेत देवं च देवीं च प्राङ्मुखो वाप्युदङ्मुखः।
श्वेतादीन्नकुलीशास्तांस्तच्छिन्यान्प्रणमेद गुरुम्।।
पुनर्देवं शिवं नत्वा ततो नामाष्टकं जपेत्।
शिवो महेश्वरश्चैव रूद्रोविष्णुः पितामहः।।
संसार वैद्यः सर्वज्ञः परमात्मेति चाष्टकम्।
अथवा शिवमेवैकं जपित्वैकादशाधिकम्।।[१०९]

ततः न्यास प्रकार कथनं तत्र मात्रिकान्यास षडंगन्यास प्रपञ्चनः, शैवगमोक्तपूजा विधि कथनम्, शैवानां कृते लिंगपूजा विधि कथनम्, तत् प्रसंगे महोग्रपापपातकी कृत

शिवलिंगपूजायाः प्रभावेण पापनाशो भवति अतः सर्वेषां साङ्गोपाङ्गलिंगपूजा कर्तव्यम्। तस्मिन् कर्मणि सर्वेषामधिकारः। सर्वाभीष्टसिद्धिश्च भवति। उक्तञ्च—

शिवपूजाविधिं कुर्यात् यदीच्छेत् शिवमात्मनः।
त्वरितं जीवितं याति त्वरितं याति यौवनम् ।।
त्वरितं व्याधिरयेति तस्मात् पूज्य पिनाकधृक् ।
यावन्नायाति मरणं यावन्नाक्रमते जरा ।।
यावन्नैन्द्रियवैकल्पं तावत् पूजय शंकरम् ।
न शिवार्चन तुल्यो अस्ति धर्मो अन्योभुवनत्रये ।।[११०]

एवं शिवलिंग पूजनेनैव सर्वार्थसिद्धिर्भव त तदा सर्वेषां श्रेयमिच्छतां अवश्यमे अनुदिनं स श्रद्धया सांगोपांगं शिवलिंगपूजा करणीयम् वर्तते। लिंगपूजनान्ते हवनं कर्तव्यम्। तत्र अग्निकार्ये कुण्डप्रकार कथनम्, हवनीय द्रव्य विधान तत्प्रमाण कथनम्, शैवानां नित्य नैमित्तिककर्म कथनम्, शैवशास्त्रोक्त ऐहिकामुष्मिककाम्य कर्म कथनम्, शैवशास्त्रोक्त ऐहिका-मुष्मिककाम्यकर्म कथनम्, आवरणपूजाविधिवर्णनम्, नित्यादि कर्मणाम् लिंगवेरप्रतिष्ठया सिद्धितत्प्रतिष्ठाविधि वर्णने भगवता श्रीकृष्णेन उपमन्युं प्रति प्रावोचत् यत्—

किमिदं लिंगमाख्यातम् कथं लिंगीमहेश्वरः ।
कथं च लिंगभावो अस्य कस्मादस्मिन् शिवेर्चयेत् ।।[१११]

अस्योत्तरे उपमन्युना कथितम् यत्—

अव्यक्तं लिंगमाख्यातम् त्रिगुण प्रभवाप्ययम् ।
अनाद्यनन्तं विश्वस्य यदुपादानकारणम् ।।
तदेव मूलप्रकृतिर्माया च गगनात्मिका ।
तत एव समुत्पन्नं जगदेतच्चराचरम् ।।[११२]

अनेनैव लिंगवेर प्रतिष्ठाया, पूजायाश्चप्रभावेण ब्रह्मासृष्टिं रचयति, विष्णु परिपालयति स्वयं रूद्रो विनाशयति। ब्रह्मविष्णु मोहन प्रसंगे—एकदा क्षीरसागरसुप्तस्य विष्णोः नाभिपंकजेन ब्रह्मणोत्पत्तिः एकाकी निर्जनस्थाने सवकीयं मत्वा क्रोधात् ब्रह्मणा हू कृतम्। तेन विष्णुरागतः तं दृष्टवा को असि इति ब्रह्म कथनानन्तरं पुत्र इति सम्बोधनवाक्यैरभिहितेन शिवमाया विमोहितेन तयो परस्परं बाहूप्रणआरम्भो जातः। ततः सहसा तत्रैव दिव्यलिंगस्य प्रादुर्भावो भवत्। को यं इति विजिगिशया हंस रूपे ब्रह्मा उपरिभागे, नीलवाराहरूपे विष्णुश्चाधोभागे गतौ। सहस्रपरिवत्सरानन्तरमपि आद्यन्ताज्ञाने तौ तत्रैवागत्य ''अयमात्मा ब्रह्मेति'' मत्वा शिवस्तुतिं चक्रतुः। तेन प्रीती शिवाज्ञया ओंकार नादस्य श्रवणं जातम्। पश्चात् अनेनैव चतुर्णां वेदानां उत्पत्तिः समजनि। ऋग्वेदेनोक्तम् भवन्तौ परस्परं मा विवद। अखिलसृष्टेः तथा ब्रह्म विष्वादीनामपि कर्ता साक्षात् शिव एव। तत तद्वचनं श्रुत्वा शिवमायाविमोहितौ तौ

सविधि लिंगपूजनोत्तर स्तुतिं कृतम् तेन प्रीतो शिवः साक्षात् लिंगाद्युत्पद्य तौ सम्बोधितम् तेन मायारहितौ तौ शिवं ध्यात्वा स्वलोकं ययौ।

ततः योगमार्गनिरूपणम्, शिवध्यान वर्णनम्, ध्यानस्वरूप तद् भेदानां कथनम्, ततः नैमिषारण्य जिवासि ऋषिणां तत्रत्यः प्रस्थानम् तत काशी आगमनम्, काश्यां आकाशात् तेज पुञ्जप्रवेशः, तत्तेजपुञ्जदर्शनेन सभयै ऋषिवर्यैः ब्रह्मसकाशाद्गत्वा तस्मिन् विषये नेके प्रश्नाः प्रश्नानुसारि ऋषीन् सम्बोध्य "तत् शैवं तेजो" इति कथयित्वा, भवतामेवाभीष्टसाधनार्थं भगवाच्छिव काश्यां स्वराजधानीं करिष्यतित्यवोचत। ततः ब्रह्मवचनमुररीकृत्य ऋषयो स्कन्दसरसि समागत्यतत्र सविधिः स्नात्वा तत्रस्थानां अन्येषाञ्चज्ञानं दत्वा शिवसन्निधौ जग्मुः। ततः शिवमहापुराणमहिमाप्रसंगम् वर्णितमस्ति। यथा—

एतच्छ्रुत्वा ह्येकवारं भवेत्पापं हिमस्मसात् ।
अभक्तो भक्तिमाप्नोति भक्तोभक्तिसमृद्धिभाक् ।।
पुनः श्रुते च सद्भक्तिः मुक्तिः स्याच्चश्रुते पुनः ।
तस्मात् पुनः पुनश्चैव श्रोतव्य चमुमुक्षुभिः ।।
पंचावृत्तिः प्रकर्तव्या पुराणस्यास्य सद्धिया ।
परं फलं समुद्दिश्य तत्प्राप्नोति न संशयः ।।
पुरातनाश्च राजानो विप्रावैश्याश्च सत्तमाः ।
सप्तकृत्वस्तदावृत्या लभन्त शिवदर्शनम् ।।
श्रोष्यत्यथापि यश्चेदं मानवोभक्ति तत्परः ।
इह भुक्त्वाखिलान् भोगानन्ते मुक्तिं लभेच्च सः।।
एतत् शिवपुराणं हि शिवसयापि प्रियं परम् ।
भुक्तिमुक्तिप्रदं ब्रह्मसम्मितं भक्तिदर्शनम् ।।
एतत् शिवपुराणस्य वक्तुः श्रोतुश्च सर्वदा ।
स गणः ससुतः साम्बः शं करोतु च शङ्करः ।।[११३]

एवं सपतम्यां वायवीय संहितायाम् शैवतन्त्र सम्बद्धाया उपासनापद्धतेर्विशदं विवेचनमस्ति। शैवागम सिद्धान्तां निरूपणम्, शैवतान्त्रिकाणां मनसो विनोदाय परमं साधनमुपयोगि च वर्तते।

एवं शिवपुराणे तान्त्रिकतायाः पूर्णप्रभावोलक्ष्यते। शिवस्य प्रतियुगं शिवावतारवर्णनम्, शैवावरणपूजायाः क्रमः, पञ्चाक्षरमन्त्रजपे विधिः, सपरिकर शिवलिंग पूजा प्रतिष्ठापनविधानम् शैवागमोक्तायाः पूजापद्धतेश्च विवेचनं सम्यगस्ति।

ऋषिभ्यः शैवं ज्ञानं दत्वा शिवसन्निधि गमनादिवर्णनम्, शिवभक्तानाम् महानुल्लास करोविद्यते। शिवपुराणस्याश्रयः सर्वेषां प्राणिनां महानुपकारी शिवभक्ति साधकः सकलतापवारकश्चेतिसिद्धान्तितम्।

अन्ते च—

शैवं पुराणमिदमात्मविदांवरिष्ठं,
सेव्यं सदा परमवस्तु सतां समर्च्यम् ।
तापत्रयाभिशमनं, सुखदं सदैव,
प्राणप्रियं विधिहरीश मुखामराणाम् ।।

सन्दर्भ

४७. शि०पु०रू०सं० यु०ख० अ० १०, श्लोक ३८, ३९
४८. वही, अ० १४, श्लोकाः ३३, ३४, ३५
४९. वही, अ० २२, श्लोक ४०, ४१
५०. वही, अ० २५, श्लोक ३२, ३३
५१. वही, अ० ३०, श्लोक २७, २८, २९
५२. वही, अ० ५९, तमे ३०, ३१, ३२, ३३
५३. शि० म०पु० शतरूद्रसंहितायां १६/३८, ३९, ४०, ४१ श्लोकः।
५४. वही, १७/१२, १४, श्लोकौ।
५५. वही, १८/२६, २७, २८
५६. वही, २०/३, ४, ५, ६, ७
५७. वही, २३/६
५८. वही, २२/१६, १७, १८, १९, २०
५९. वही, २३/१५, १६
६०. वही, ३०/२२, २३
६१. वही, ३०/३४
६२. वही, ३१/२७, २८
६३. वही, ३१/३०
६४. कुमार समभव
६५. शि०म०प्र०श०रू०सं०, ३६/४३
६६. वही, ४१/२१, २२
६७. वही, ४१/२५
६८. वही, ४१/३४, ३५
६९. वही, ४१/५६, ५७
७०. छत्रपति साम्राज्ये मंगल श्लोकः।

७१. शि०म०प्र०श०रू०सं०, ४२/२, ३, ४, ५
७२. वही, ४२/५८
७३. शि०पु०को०रू०सं०, १०/५०
७४. शि०म०प्र०श०रू०सं०, १२/५३, ५४
७५. वही, १४/५६, ५७
७६. शि०म०प्र०श०रू०सं०, २७/४२, ४३
७७. शि०पु०को०रू०सं०, ३६/२१, २३
७८. वही, ३८/२८, २९
७९. वही, ४०/१९, २०
८०. वही, ४०/९०, ९१, ९२
८१. वही, ४३/५८, ५९
८२. शि०पु०उमा०सं० ३/२०
८३. वही, ३/२२, २३, २४, २५
८४. वही, ३/३२
८५. वही, ३/३५, ३९
८६. वही, २६/४०
८७. वही, ४४/१२०, १२१, १२२, १४० श्लोकाः।
८८. वही, ४९/३८, ४२, श्लोकौ।
८९. वही, ५१/७, ८, ९
९०. शि०पु०उमा०सं० ५१/८४, ८५
९१. शि०पु०कै०सं० २/२२, २३
९२. वही, ६/६१, ६२
९३. वही, ११/२२, २३
९४. वही, ११/३३
९५. वही, १२/४४-४५
९६. वही, १४/२, ३
९७. वही, १४/१०, ११
९८. वही, १६/५४
९९. वही, १७/३३, ३४
१००. शि०म०पु०वा०सं० पूर्वभागे १/२५
१०१. वही, १/४१

१०२. वही, ६/५८
१०३. वही, २४/३१, ३२
१०४. वही, २५/४७
१०५. वही, २९/१२
१०६. वही, २९/३६
१०७. वही, ३५/६५
१०८. वही, उत्तरभागे २/५९
१०९. वही, ५/३१, ३२, ३३
११०. वही, १८/६०
१११. शि०म०पु०वा०सं० २६/२१, २२, २३
११२. वही, ३४/६
११३. वही, ३४/७, ८
११४. वही, ४१/४५ से ५१ श्लोकाः।

तृतीयो अध्याय

तन्त्र शब्द निरुक्तिः

यद्यपि प्राक्तनाचार्यपरम्पराषु तन्त्रागमशब्दयोरपार्थक्येन प्रायो बोधो भवति। परं साम्प्रतिकेषु कश्चित् तयोवर्तते सूक्ष्मोभेदः। तदनुसारेण शिवपरकं शास्त्रमागमः, शक्तिपरकञ्च तन्त्रमिति। अतो धुना अन्यागमानां व्यवच्छेदाय शैवशाक्तयोर्दयोर्नाम्नोर्ग्रहणमागमेनाख्यायते।

तत्र तनादि गणपठितात् "तनुविस्तारे" इति धातोः औणादिकात् सर्वधातुभ्यष्ट्रन् इति पाणिनिसूत्रात् अष्टन् प्रत्यये कृते सति तन्त्र शब्दो निष्पद्यते। तनोति तन्यते वा अनेनेति तन्त्रम्।

अथवा कुटुम्बधारणापोषणार्थक "तत्रि" पु० धातोर्भावादौ घञ् प्रत्यये कृते तन्त्रशब्द सिद्धिः। तन्त्रणं तन्त्र्येत् यद् येन यत्र वेति व्युत्पत्तिः। अतः सृष्टि परकस्य विश्वविस्तारस्य सूक्ष्मतत्त्वस्य वा निरूपणं ज्ञानं वा तन्त्र शब्देन सङ्गच्छते। इमा व्युत्पत्ती भावा वा आश्रित्य अजितागमे उक्तम्—

तनोति विपुलानार्थास्तत्त्व (तन्त्र) मन्त्र समाश्रितान् ।
त्राणं च कुरुते पुंसां तेन तन्त्रमिति स्मृतम् ।।[१] इति।

तन्त्रं प्रधानं सिद्धान्ते सूत्रवायेपरिच्छते। इति।

वाचस्पते च—

सर्गश्च प्रतिसर्गश्च मन्त्र निर्णय एव च ।
देवतानां च संस्थानं तीर्थानां चैव वर्णनम् ।।
तथैवाश्रम धर्मश्च विप्रसंस्थान मेव च ।
संस्थानं चैव भूतानां यन्त्राणां चैव निर्णयाः ।।

अपि च—

राजधर्मो दान धर्मो युगधर्मस्तथैव च ।
व्यवहारः कथ्यते यत्र तथा चाध्यात्मवर्णनम् ।।

इत्यादिलक्षणैर्युक्तं तन्त्रमित्यभिधीयते।।[२] इत्युक्तम्।

शाङ्ख्यशास्त्रे च—

"कृत्स्नस्य षष्ठितन्त्रस्य"[३] विस्तरत्वात् षष्ठितन्त्रस्य संक्षिप्तरुचिसत्त्वानुग्रहार्थं संज्ञा तमभिधीयते इत्युक्तम्।

ज्योतिषशास्त्रे वराहमिहिरस्तु—

"स्कन्धे अस्मिन् गणितेन या ग्रहगतिस्तन्त्रभिधानात्वसौ"[४] इत्युक्तम्। आयुर्वेदे सुश्रुतसंहितायाम्—

"इत्यष्टाङ्ग मिदं तन्त्रागमादिदेवं प्रकाशितम्। इत्युपदिष्टम्। शाङ्करभाष्ये शङ्करणपादेन च—

"स्मृतिश्च तन्त्राख्या परमर्षिप्रणीता शिष्टपरिगृहीता" इत्युक्त्या स्मृतेरेव तन्त्रपदेन व्यवहारं कृतम्।

पुरा राजनीतावपि तन्त्र पदस्य दृश्यते व्यवहारो यथा—पंचतन्त्रमिति। शासन व्यवस्थायामपि तन्त्रशब्दो व्यवहार पथमायाति, यथा—प्रजातन्त्रम्, लोकतन्त्रम्, राजतन्त्र-मित्यादयः। एवं हि—

लौकिकं वैदिकं सांख्यं योगादिपाञ्चरात्रकम् ।
बौद्धार्ह तन्यायशास्त्रं पदार्थक्रमतन्त्रगम् ।।
सिद्धान्त तन्त्रशाक्तादि सर्वं ब्रह्मोद् भवं यतः ।
श्रीस्वच्छन्दादिषु प्रोक्तं सद्योजातादि भेदतः ।।[५]

इत्याद्युक्तम् तन्त्र शब्द व्याख्यायाम्।
एवं च नानार्थको अपि तन्त्रशब्दः। साम्प्रतं शैवशाक्तदर्शने रूढ़िमापन्न तात्पर्यग्राहकश्चेति। तथा च—

तन्त्रशास्त्रस्य महत्वमाकल्यैव तत्र तत्र शास्त्रेषु प्रशंसापराणि बहूनि वाक्यानि दृश्यन्ते। तथाहि—

नदीनाञ्च यथा गङ्गा पर्वतानां हिमालयः ।
अश्वत्थः सर्ववृक्षाणां राज्ञामिन्द्रो यथा वरः ।।
देवीनाञ्च यथा दुर्गा वर्णानां ब्राह्मणो यथा ।
तथा समस्त शास्त्राणां तन्त्रशास्त्रमनुत्तमम् ।। इति

महानिर्वाणतन्त्रे च—

किं तस्य तीर्थभ्रमणै किं यज्ञैअपि साधनैः ।
जानन्नेव महातन्त्रं कर्मपाशैर्विमुच्यते ।। इति।

तन्त्र शास्त्रस्य क्षेत्रमतीव विस्तृतं व्यापकं च। अस्यान्तर्गतं दर्शनं, विज्ञानम्, व्यवहारः, कला, साहित्यादिकश्चानेके विषया आयान्ति। अत्र शास्त्रे सर्वविध भौतिकाध्यात्मिक-सम्पदः, अपूर्वसिद्धिनामर्जनस्य चोपाया सन्ति निर्दिष्टाः। दार्शनिकतत्वान्यत्र सूक्ष्मातिसूक्ष्मपद्धत्त्या षट्त्रिंशत् तत्वात्मकानि सनिनिरूपितानि।
अपि च—

प्रमाणेन निरन्तरं विस्तारार्थक विशेषार्थकतत्त्व मन्त्रसमन्वितत्राणकर्मता तन्त्रस्य

सिद्धयति। एवञ्च तन्त्रागम ग्रन्थ जातं यत् तं सर्वं ज्ञानराशिम् विस्तृणाति विस्तरेण प्रकटयति, तदनुसारि कुटुम्बसमूहं विभर्तितत् तन्त्रम्। ज्ञानराशीनां विस्तरेण प्रतिपादयतां ग्रन्थानां च विषयभेदात् भवति पारस्परिको भेदः। नास्ति किञ्चित् यत् कश्चन ज्ञानगोचरो नास्ति। तथा च यः कश्चनापि ग्रन्थो यं कश्चन् ज्ञानविषयं विस्तरतः प्रतिपादयन् तन्त्र शब्देन वक्तुं शक्यते। किं चास्माकं भारतवर्षस्य शासनपद्धतिः प्रजातान्त्रिकी अस्ति। ये नोद्युद्धते भारतं प्रजातन्त्रराष्ट्रमिति। अस्य व्युत्पत्तिस्तु-प्रजा तनुते शासननियमान् यत्र प्रजया तन्यते विस्तार्यते शासनपद्धतिर्यत्र, प्रजयातन्त्रयते ध्रियते स्वसमूहो यत्र।

एवं च भारतं तद्राष्ट्रं यस्मिन् प्रजैव राष्ट्रनियमास्तथैव तनुते विस्तारयति संशोधन-परिष्करणादिभिर्यथा तन्तुवायस्तन्तून् यत्र प्रजैवैभिः नियमैः स्वात्मानं धारयति, पोषयति च। यत्र प्रजा एव राष्ट्रचिन्तां कुर्वन्ति।

यथा च समस्तसुरगणगीयमान प्रकर्षे भारतवर्षे सकलसाधक कामपूरणकल्पद्रुमभिव को न जानाति नाम तन्त्र शास्त्रम्। विशेषतः शाक्ताः तन्त्रानुगामिनो प्यागमप्रवेत्तारो बहवः शैवाः वैष्णवाः सौरा, गाणपत्याश्च। अतः परमेश्वरोपासनायाः साधनभूतानां उपकरणानां हि तन्त्रसंज्ञा प्रतिष्ठते।

भारतीयायाः संस्कृतेः भारतस्याचारपरम्परायाश्च चत्वारि मुख्योपजीव्यानि। श्रुतिः, स्मृतिः, पुराणं, तन्त्रञ्च। एषु चतुस्मेष्वेव समग्राभारतीयासंस्कृतिः अवस्थिता। अद्यत्वे च तन्त्रशास्त्रस्य महानुपयोगः।

यतो हि—

कृते श्रुत्युक्त आचारस्त्रेतायां स्मृति सम्भवः ।
द्वापरे तु पुराणोक्तः कलौ आगम सम्मतः ।।[६] इति वचनात्

अद्यत्वे विविधघटनासंकुले लोकव्यवस्थितिगर्भे भारतवर्षे पाश्चात्य सभ्यता सम्पर्कोत्तरयुगे यदा वांशिकी मर्यादा प्रतिपदमवधीर्यते, भक्ष्याभक्ष्ययोर्विवेको सभ्यताविभाव्यते। स्पृश्यास्पृश्य विचारो निराक्रियते, वर्णाश्रमव्यवस्था युगधर्मानुकूलेति प्रतिपाद्यते, परमेश्वरे, परलोके, पुनर्जन्मनि चास्तिक्यबुद्धेः विभ्रम इति संगिरन्ते, तदा भारतीयचिरन्तन संस्कृतेः संस्कारस्य ज्ञानस्य च यद्यस्ति कश्चित संरक्षणोपायस्तर्हि तन्त्रमित्येव युक्तमुत्तरम्।

एवं हि तन्त्र ज्ञान शून्या केचनतन्त्रस्याभिप्रायः मन्त्र यन्त्रसाधनं पुरश्चरणं, उच्चारणं, मारणादिकं च मन्यन्ते, परमिदृशं तन्त्ररसाज्ञानग्रस्ता एवोच्यन्ते। एतद्विपरीतं च तन्त्र ग्रन्थेषु सर्वात्मिकाया भौतिक्याःसमृद्धेः सर्वविधाया आध्यात्मतास्पदः वह्वीनां विस्मयावहानां सिद्धीनाश्चार्जनस्य च पन्थानः निर्दिष्टा सन्ति। तन्त्रेषु दार्शनिकविचाराणामतिगहनं समीक्षणमपि जातम्।

अद्यत्वे समग्रे भारते व्यवहारे शास्त्रे च तन्त्रसंस्कृतेः प्रभावाः परीक्ष्यताम्। शैव,

शाक्त, वैष्णव, सौर गाणपत्यादयो सर्वेपन्थानः तात्रिकीरीतिमनुसरन्ति। कस्य देवस्य कथमुपासना कर्तव्या कि यदुपासनायाः कियत् फलमित्यादयो विषयाः तान्त्रिकाः। ग्रामे-ग्रामे, नगरे-नगरे गृहे गृहे अपि तन्त्रोक्तदेवानां देवीनाञ्चोपासना प्रचलति। अतः भारतीयजीवनपद्धत्या तन्त्रस्याभेदसम्बन्धः। तन्त्रशास्त्रे सर्ववर्णानां नराणाम् नारीणाञ्चाधिकारादस्य शास्त्रस्य लोकोपयोगितासहैव क्रियालाघवात् युगधर्मिता अपि सिद्ध्यति। अतः अद्यत्वे सम्भारलाघवादाशुसिद्धिसत्वात् सर्वेषाञ्चाधिकारात् तन्त्रोक्त पन्थाः एव समीचीनमिति न विस्मर्तव्यम् नीरक्षीरविवेकिभिः। इत्यलम्।

आगम शब्द विचारः

भारतीयासंस्कृतिः निगमागममूलिका। निगमोवेदः आगमश्च वेदौपथिक स्मृत्युनुमोदितलोककल्याणकरः पन्थाः। आगमस्यैवापरनामतन्त्रमिति, तन्त्रागमस्य परम्पराभेदेन प्रायःसर्वत्रशास्त्रे व्यवहारः। अतः शास्त्रे अत्र "विषयमप्यमृतायते" भोगो अपि योगायते। कुतश्चैतदित्याकांक्षायामस्य शास्त्रस्य प्रवक्ता साक्षात् शिवः, श्रोत्रीपराम्वासर्वानुग्रहकर्त्री पार्वती, विषयश्च साक्षात् वासुदेवः। एवं भूत्वेहपरलोकानायासेन साधनक्षमो गममार्गः। उक्तञ्च—

आगतं शिववक्त्रेभ्यो गतं च गिरिजानने ।
मतं च वासुदेवस्य तस्मादागम उच्यते ।।

आगमतन्त्राणां प्रवक्तरि भगवति शिवे विषामृतयो सम्मेलनम्। मूलतस्तयोः सामरस्यमपि विस्पष्टं परिलक्ष्यते। तथाहि—

यच्छम्भोरहित भूषणं शिरसि वा कण्ठे भृशं राजते,
तत्पाशेन विषं गले च विधृतं गोपायिता स्वर्धुनी ।
विज्ञानं नयतामृतेन हि पथा भालेन्दुमूर्ध्वं मृते-
गङ्गाविष्णुपदोद्भवां किमितरद् येनाहिराशीविषः ।।[७]

अयम्भावः—शिरसि कण्ठे वा अहिर्भूषणमपि पाशरूपो भूत्वा विषं शङ्करगले विधारयति। तेनैव पाशेन जटाकलापोषु गोपायितास्वर्धुनी। सम्यग् योगक्षेमाय तदेव विज्ञानं समाश्रयणीयं लोकैर्यदृतेन पथामृतेरूर्ध्वं सुधासन्दोहसारं श्रीशङ्करभालेन्दुमेव जयति, जटामात्रेषु गोपायितां गङ्गामपि, या गङ्गा सत्यपि स्वयं विष्णुपादोद्भवा तद्विष्णोः परमं पद्म तस्य ध्रुवैकपथप्रदर्शिनी भवति। शिववक्त्रेभ्यो विनिःसृता या आगमवाणी सेयमध्यात्मगङ्गा। सैवपुनः शिवशक्तिसामरस्य विज्ञानप्रसूर्जननी। किमन्येन विज्ञानेन, येन अहिराशीविष एव भवेल्लोकानां भयाय क्षयाय च। अनेनागमविज्ञानस्य जडविज्ञानावादिभ्यो विलक्षणतापि सूचिता। उभयतः प्रयोगविधानसामान्ये अपि प्रयोगतन्त्रभेद लक्षितव्यास्यार्थस्यापि भेद इति विचारणीयम्। एतद् भेदद्वयवशादे केनामृतत्वस्य सनातनः पन्थाः प्रवर्त्तितः, अपरस्मिन्

वाह्येन्द्रियभोगोपकरणबाहुल्यसृष्टिसामर्थ्यगौरवे सत्यपि लोकानां महाविनष्टरेव भयकर्मवर्धमानम्। प्रयोगविज्ञानेषु वाह्यभोग्यसंग्रह सौविध्यं न वा परीक्षालब्धथ्यतत्त्वादीनां चमत्कारित्वं तेषामुपादेयत्वप्रतिपादनायालम्, मुख्यपुरुषार्थनिर्वहणत्वेनैव सर्वेषां प्रयोगाणामर्थप्रतिपत्ति व्यवस्थापनात् (व्यवस्थापनात्)। तथापि तन्त्र प्रयोगेषु समीक्षा परीक्षा जन्यप्रत्ययस्यापि प्रामाण्यगौरवमस्त्येवेत्यत्रागमविज्ञानस्याधुनिक बहिर्विज्ञानादिना सह साजात्यम्, यथा सम्भवं पारस्परिकोपकारकत्वमपि सुधीभिर्नापेक्षितव्यम्।

भारतीयाया: संस्कृते: भारतस्याचारपरम्परायाश्च चत्वारिमुख्योपजीव्यानि श्रुति:, स्मृति:, पुराणं, तन्त्रञ्च। एषु चतुस्तम्भेष्वेव समग्राभारतीया संस्कृति: अवस्थिता। अद्यत्वे च आगमशास्त्रस्य महानुपयोग:। यतो हि—

कृते श्रुत्युक्त आचारस्त्रेतायां स्मृतिसम्भवः ।
द्वापरे तु पुराणोक्तः कलौ आगमसम्भवतः ।।[८] इति

अर्थात् सत्ययुगे श्रुतिसिद्धान्तानुरोधेन सर्वाणि कार्याणि व्यवह्रितानि परमर्षिभि:। तदेव त्रेतायाम् विविधस्मृति-प्रदर्शित शास्त्रसम्मत धर्मानुकूल आचाराण्यभवत्। द्वापरयुगे तु विविधमहापुराणोपपुराणे वर्णितानि साक्षात् नारायणवचनानुसारि वेदवचन सम्मतानि तत्पथ-प्रदर्शितानि पुराणवचनान्येव आधारीकृत्य सर्वाणि वयवहाराणि कृतानि धर्मानुरागिभि:। साम्प्रतं तु श्रुति-स्मृति-पुराण समन्वित आदिष्ट धर्मयुक्त, नीतियुक्तादि वचनान्याधारी कृत्य समस्त धर्मकर्मादि भवन्ति।

भारतीयचिरन्तन संस्कृते: संस्कारस्य ज्ञानस्य च यद्यस्ति कश्चित् संरक्षणोपायस्तर्हि आगममित्यैव युक्तमुत्तरम्—तथा चोक्तम् निर्वाणतन्त्रे—

विनात्यागम मार्गेण कलौनास्तिगतिः प्रिये।।[९] इति।

आगमप्रामाण्याभ्युपगन्तृत्वात् पुराणानामपि प्रामाण्यम्। भारतीयजीवनस्य निखिला क्रियाजन्याशोभापुराणेष्वेवाप्यते।

एवं ह्यत्र पुराणे शिवार्चनस्य विविधविधय: निर्दिष्टावर्तन्ते तत्तद् पुराणेषु तत्तत्प्रभावस्य च विपुलं निरूपणं दृश्यते। तत्र च लिङ्गपुराणे शैवानां वैशिष्ट्यं सर्वातिश्रेष्ठतरमिति प्रतिपाद्यमानमिदमुच्यते—

अन्य भक्त सहस्त्रेभ्यो-विष्णुभक्तः विशिष्यते ।
विष्णुभक्त सहस्त्रेभ्यो रूद्रभक्तो विशिष्यते ।
रूद्रभक्तात्परतरो नास्ति लोके न संशयः ।।[१०] इति।

इत्थं विचारणायाम् सम्यक् प्रतिभाति यत् पुराणेषु आगमस्य भूयस्त्वेन विमर्श: कृतो विद्यते। विविधाख्यानै:, कथाप्रकल्पै: प्रतीकैश्च शैवागमतत्त्वस्य यन्निरूपण जातं पुराणेषु तदुपेक्ष्य आगमतत्त्वस्य विमर्श: तत् प्रक्रिया अतीव रमणीया प्रतियोगिनी च सेत्स्यति।

पुराणेष यादृशं एतत् तत्त्वभिहितं तन्त्रग्रन्थेषु तदेव महता समारोहेण निरूपितमस्ति। पुराणानामेवेदंवैशिष्ट्यम् यद् तस्य रचनाः अद्यापि शैवागमस्य गौरवं वर्द्धयन्ति। तस्य काव्यादि मंगलैः तदेव स्वरूपं दृश्यते यस्य निरूपणं अधुना अपि तन्त्रे शैवागमे च दृश्यते। इत्यलम्।

तन्त्रागमे शाक्त शैव दर्शनानां निष्पत्ति :

धर्मसूत्रवदेव गृह्यसूत्रेष्वपि रूद्राण्याः रूद्रपुत्राणाञ्चोल्लेखः समभवत् परन्त्वत्रायमेवा-विशेषो यत् रूद्रस्य मूर्तिपूजा अपि गृह्यसूत्रकाले प्रादुरभूत्। बौधायनगृह्यसूत्रे ज्येष्ठापूजा प्रसङ्गे देवागार इति शब्दस्योल्लेखः समजनि। अतः देवागारेषु मूर्तिपूजाभवति स्म, मूर्तिपूजा-सार्द्धमेव लिङ्गपूजा अपि प्रचलिता सीत् इति। सा च पूजा मानवाकृतिमूर्तिवदेव फल-पुष्पाक्षत धूपदीप-नैवेद्यादिना सम्पद्यते स्म इत्यत्र नास्ति शङ्कालेशः।

गृह्यसूत्रेषु रूद्रपत्न्याः शक्तेः स्वातन्त्रेणाप्युपासना समारभत्। तत्र रूद्र=शिव स्थापन-विधिना सहैव स्त्रीदेवता चैनं निर्दिष्टम्, दुर्गा इति संज्ञया च सा देवी अत्र प्राथम्येन निर्दिष्टा। तद्यथा—

आपोहिष्ठामयो भुवः इति तिसृभिः, हिरण्यवर्णाः इति चतसृभिः पवमानाः इत्येतेनानुवादेन मार्जयित्वा आर्यायै रौद्रायै, महाकाल्यै महायोगिन्यै, सुवर्णपुष्ट्ये, देवसंकीर्त्यै, महायज्ञै, महावैष्णव्यै, महापृथिव्यै, मनोगम्यै, शङ्खधारिण्यै नमः इति सावित्र्यै, भगवत्यै, दुर्गादेव्यै हविर्निवेदयामि इति। हविर्निवेद्य शेषम्। एकादशनामधेये हुत्वा पञ्चदुर्गा जपेद्, दशस्वस्ति जपेत्[११] इत्यादयः।

गृहसूत्रकालं यावत् देव्याहाराधनं वैशिष्ट्येन सम्पद्यतेस्म। उपनिषदा शक्त्या अस्याः अभेदः प्रतीयते। अस्यासनं सिंहस्थे आसीत् यथा चोदाहरणम् बौधायन गृहसूत्रे—

यस्यास्सिंहारथे युक्ता व्याघ्रश्चाप्यनुगामिनः ।
तामिमां पुण्डरीकाक्षीं ज्येष्ठामावाहयाभ्यहम् ।।[१२] इति

वैदिककालादाराभ्य सूत्रसाहित्यकालं यावत्, रूद्रस्वरूपं शैवधर्मस्य स्थितिश्च विमृष्टम्, पुनरीदानीं साक्षात् तन्त्रागम स्वरूपे रामायणे, महाभारते च शिवशक्ति भक्तिधारायाः शैव-शक्तिपरम्पराया समासेन विमर्शः प्रस्तूयते। अत्र साहित्ये प्राचीनार्वाचीन शैवधर्मस्य उभे रूपे प्राप्येते। महाभारतापेक्षया रामायणे शिवस्य प्राचीन स्वरूपं दृश्यते। अतः तावत्प्राथक्येन रामायणमाश्रित्यैव विविच्यते किञ्चित्।

रामायणे सूत्रग्रन्थेभ्यो रूद्रस्वरूपं भूयस्त्वेन प्रकृष्टतरं लभ्यते। अत्र रूद्र इति नामापेक्षया स सामान्येन शिवेति निगद्यते। महादेव, महेश्वर, शंकर त्रयम्बक तथा अन्येषां नाम्ना अत्र पूर्वापेक्षयाधिक्येन प्रयोगाः भवन्ति। अत्रत्यः शिवः रूद्रापेक्षया महाकल्याण-

कारित्वेनोपतिष्ठते। रामायणे भक्तिपक्षस्य मुख्याधारयोः शिवविष्णवोः द्वेरूपे निरूपिते तत्र शिवः समग्रजीवलोकस्य कल्याणाकारित्वेनायाति स वर प्रदाता आशुतोषः, दयानिधिश्चास्ति। अतः स महादेवपदमलङ्करोति। उपनिषत्सु रूद्रः दार्शनिकदृष्ट्या परब्रह्मत्वेनाङ्गीक्रियते, भक्तिवादस्य उत्थापनेन सह रामायणे शिवस्यापि तथा रूपं प्रतिफलति। रामायणे प्राचीनदेवमण्डलस्थाने प्रायः-ब्रह्मा-विष्णु-शिवः एवावशिष्यन्ते त्रयोदेवाः। तत्रापि ब्रह्मा प्रायः विष्णुशिवापेक्षया किञ्चिन्न्यून-त्वमेवावहति। तथा च—

यदिहोत्पद्यते भूतं कस्तत् प्रातिसहिष्यति।
अभिगम्य सुराः सर्वे प्राणिपत्येदमब्रुवन्॥
देव देव महादेव लोकस्यास्य हिते रतः।
सुराणां प्रणि पातेन प्रसादं कर्तुमर्हसि॥
न लोका धारयिष्यन्ति तव तेजः सुरोत्तम।
ब्राह्मेण तपसायुक्तौ देव्या सह तपश्चर॥[१३]

शिवस्यामश्लोके अपि भवति उपासना, स च देवानामपि देवः। तथाहि विषपान प्रसङ्गे—

अथ देवा महादेवं शङ्करं शरणार्थिनः।
जग्मु पशुपतिं रूद्रं त्राहि त्राहीतितुष्टुवुः॥
एवमुक्तस्ततो देवैर्देवदेवेश्वरः प्रभुः॥[१४] इति

विश्वामित्रेण शिवाराधनप्रसङ्गे च—

स गत्वा हिमवत्पार्श्वे किन्नरोरगसेविते।
महादेवप्रसादार्थं तपस्तेपे महातपाः॥[१५] इति

भगवान् शिवः लोकगुरुः, निग्रहानुग्रहकर्ता च। स हि सर्ग स्वलीलया आदिर्भावयति स्वेच्छया चोपहरति (संहरति)।

स सर्वलोकाधारोप्यस्ति। स चाव्ययः, अक्षरः अमरश्चास्ति। शिवोपासनायाः लोक-प्रचलितस्य स्वरूपस्य सर्वातिशायिज्ञानं रामायणादेवलभ्यते स्माभिः। रामायणे कल्याण कर्तुः शिवस्योपस्थिति दृश्यते, स हि भार्यासहैव प्रायः उपतिष्ठते, तस्यापि स्वातन्त्रयेणा-स्तित्वं सम्पन्नम्। अस्यानाम उमा इति केनोपनिषदि उमा हैमवती सत्वादियं हिमालयस्य पुत्रसी सिद्धयति। हिमवतासम्बद्धत्वेनाप्यस्य पार्वती नाम अप्याजगाम, यच्चाग्रे समागत्य सर्वाधिक प्रचार भूमौ समागच्छत्। तथा च—

ततो वृषभमास्थाय पार्वत्या सहितः शिवः।
वायुमार्गेण गच्छन् वै शुश्रावरूदितस्वनम्॥[१६] इति

रूद्रस्य स्त्री सत्वात् पार्वत्याः रूद्राणी इत्यभिनाम अनेकबारं रामायणे पृथक्-पृथक् स्थलेषु दृश्यते। तथा च—

कान्वेषेति महाराज न खल्वन्येन हेतुना ।
रूपं चानुपमं कृत्वा रूद्राणि तव तिष्ठति ।।[१७]

परं भवानी इति नाम परिहृत्य रूद्रस्ये स्त्री लिङ्गं नाम्नो व्यवहारः उत्तरोत्तरं स्वल्पतर एव जातः। सामान्यतश्चास्या शक्तिदेवतायाः उत्तरोत्तरं स्वातन्त्रेयणापि व्यवहारः प्रादुर्वभूव। संहारशक्त्या सदा संयुक्ता अपि काली शनैः शनैः कलापदवीका सती अपि सर्वोपकार करणाय सदार्द्रचिन्ता सम्वृत्ता। साम्यमूर्ति सत्त्वातस्या देवीति नाम समजनि। तस्या महत्वं चराचरं जगतवेत्ति। तथाहि—

दृष्टवां च भगवान देवीं मैथुनायोपचक्रमे।[१८] इति।

यस्या कामनायाः सिद्धिः शिवोपासनया सिद्धयति तस्या एव सिद्धिः देव्याराधनेनापि। अतः वेदोत्तरकालादारभ्य रामायणकालं यावत् इदमेवमहदन्तरं यद् शिवायाः शिवेण साहचर्यं तस्याः स्वतन्त्र्यं लोकोत्तरगुणाश्चतस्याः क्रमशः वृद्धिपदमारूढाः संलक्ष्यन्ते। उक्तञ्च रामायणे—

स गत्वा तप आतिष्ठत्पार्श्वं · तस्योत्तरे गिरेः ।
हिमवत्प्रभवे श्रृंगे सह देव्या महेश्वरः ।।१९ इति।

शिवस्वरूपस्य उपासनायाश्च विषये रामायणादधिकं माहात्म्यं प्राप्यते महाभारते शिवस्य। स परब्रह्म, असीमः, अचिन्त्यः विश्वस्त्रष्टा, आत्मनि विश्वंसमाकलितः अस्ति। परमतत्त्वेन स एवोद्गीयते नहि तद्रहितं किञ्चिद् स महाभूतानामधिष्ठाता, आधारः, नित्यः कारणञ्चास्ति।

अयमेव भावः द्रोणपर्वणि द्रष्टव्यः—

नमो भवाय शर्वाय रूद्राय वरदाय च ।
पशूनां पतयेनित्यमुग्राय च कपर्दिने ।।
कुमार गुरवे नित्यं नीलग्रीवाय वेधते ।
क्लिोहिताय धूम्राय व्याल यज्ञोपवीतिने ।।
महादेवाय भीमाय त्र्यम्बकाय शिवाय च ।
ईशानाय नरवध्नाय नमो स्त्वन्धकघातिने ।।
अचिन्त्या याम्बिकामत्रें सर्वदेव स्तुताय च ।
वृषध्वजाय मुण्डाय जटिने ब्रह्मचारिणे ।।
तपसे तप्यमानाय ब्रह्मणायामिताय च ।
विश्वात्मने विश्वसृजे विश्वमावृत्यतिष्ठते ।।

नमः सहस्रशिरसे सहस्रभुजमन्वये ।
सहस्रनेत्र पादाय नमो संख्येय कर्मणे ।।
नमो हिरण्यवर्णाय हिरण्य कवचाय च ।
नमो स्तु देवदेवाय महाभूतधराय च ।।
भक्ता नुकम्पिने नित्यं सिद्ध्यतां नो वरः प्रभो ।।[२०] इत्यादयः

एवं हि विष्णुरूपः कृष्णः स्वाराध्यत्वेन भगवन्तं शिवं स्तौति। एतेन शिवस्य व्यापकत्वं सर्वाराध्यत्वं च सिद्ध्यति। भगवानशिवः स्व स्वभावेनाशुतोषः, सर्वविघ्नच्छिदः मूर्तिरूपेण लिङ्गरूपेणवार्चनीयः। निराकाररूपेण, साकाररूपेणचाराधनीयः इति तत्र-तत्र महाभारतानुशीलनेन सिद्ध्ययति। अतः समग्रे पूर्वोत्तरपश्चिमदक्षिणभारते शिवभक्तिः विविध-रूपेण बहु प्राक्तन कालादेव प्रचलितासीदिति। नास्त्य शङ्काक्लङ्कलेशावसरः।

स च शिवः भक्त्या वशीकर्तव्यः, इति वनपर्वपर्यालोचनेनावगम्यते। तथा च—

तपसाराधितः शम्भुर्भगवान लोकभावनः।।[२१] इति

महाभारते भगवतः तपसाराध्यस्य शिवस्य प्रसन्नतायै पाशुपतव्रतस्याचरणं तदानी-न्तनं भारतवर्षे जनाः कुर्वन्ति स्म। व्रतकर्तुः कार्यदृष्ट्या तत्स्थितेः अनुसारेणास्य व्रतस्य द्वादशदिनानि द्वादशाब्दा वा नुष्ठानं विधीयते स्म जनैः। अस्य व्रतस्या संक्षेपेणान्वाख्यानं कर्णपर्वणि जातम्। तत्र हि—

यो वः पशुपतेश्चर्याः चरिष्यति स मोक्ष्यते ।
पशुत्वादिति सत्यं वः प्रति जाने समागमे ।।
ये चान्ये पि चरिष्यन्ति व्रतं मोक्ष्यन्ते ते प्युत ।
नैष्ठिकं द्वादशाब्दं वा यो ब्दमर्धम् ऋतुत्रयम् ।।
मासं द्वादशरात्रं वा स पशुत्वाद्विमुच्यते ।।
तस्माद् परमिदं गुह्यं व्रतं दिव्यं चरिष्यथ ।।[२२] इति

कैलाशे ति आनन्देनोमयासहितस्य शिवस्याराधनं प्रायः समग्रे भारते तदानीन्तन-समयादारभ्य साम्प्रतं यावत् स्वभावेन कर्मणा च शिवस्यानुवर्तनं विदधती अपि पराम्बा पार्वती दया, करुणा, वात्सल्य प्रभृति मातृ मुख्येषु गुणेषु शिवादपि अधिकां प्रतिष्ठां प्राप्नोति। महाभारते मानवसुलभ गुणेषु शिवादपि अधिकां प्रतिष्ठां प्राप्नोति। महाभारते मानव-सुलभ शुभगुणानां समाहारः सपत्नीकस्य शिवस्य दृश्यते। इयञ्च कल्पना सर्वथा सार्थक्यं भजन्ती मानवसमूहस्य कल्याणकारिणी सम्पद्यते। अतः अस्यानुकरणं द्रोणानुशासन प्रभृति पर्वसु दृश्यते।

एवं रामायणे महाभारते शिवस्य भृशं निरूपणात् समग्रे भारते, विशेषतश्चोत्तरभारते शैवधर्मस्य प्रचुरः प्रभावः परिकल्प्यते। दक्षिणभारते गुड्डीमल्लम्, स्थाने लिङ्गमूर्तिलाभात्,

यस्य प्राप्तिकालः खीष्टाब्दीतः पूर्वम् द्विशतवर्षाणि प्राग्निर्धार्य्यन्ते। तदतिरिक्तं "भीता" नाम्निस्थाने ईशातः प्रथमशताब्धाः पूर्वं एका अन्या लिङ्गमूर्तिः प्राता। अस्यां पञ्चमुखस्य मनुष्याकारस्याशिवस्याकारः खचितः।

आगमोपजीव्यः रूद्रः शनैः शनैः शिवपदवीमधिरूढः सन् सर्वत्रोपासना विषयो जातः, शैवधर्मः शैवसंस्कृतिश्चानुदिनं सर्वत्र प्राचलद् प्रासरच्च। निगमागमप्रामाण्याभ्युपगन्तृत्वात् पुराणानामपि प्रामाण्यम्। भारतीजीवनस्य समग्रा सुषमा पुराणेष्वेवाप्यते। तत्र शिवमुद्दिश्य "विष्णुपुराणम्" इत्यादयो संगच्छन्ते। एवं तत्तद् पुराणेषु तेषां-तेषां देवानां स्वरूपनिरूपणञ्च वर्तते एव अन्येषां देवानामपेक्षया तस्य वैशिष्ट्यमपि तत्र-तत्र साधितम्। भगवतः लोकगुरोः परमकारुणिकस्य शिवस्य विषपानं श्रूयते। अस्याख्यानस्य विवेचनं प्रायः बहुषु पुराणेषु दृश्यते। तथा चाग्निपुराणे उक्तम्—

क्षराब्धेर्मथ्यमानाच्च विषं हालाहलं ह्यभूत् ।
हरेण धारितं कण्ठे नीलकण्ठस्ततो भवत् ।।[२३] इति

शिवोपासनायाः फलमपि तन्त्रागमे वर्ण्यते। तथा च—

सर्वावस्थांगतो वापिमुक्तो यं सर्वं पातकैः ।
शिवध्यानान्न संदेशो यथा रूद्रस्तथा स्वयम् ।।
हत्वा भीत्वा च भूतानि मुक्त्वा चान्यतो अपि वा ।
शिवमेकं सकृद् स्मृत्वा सर्व पापैः प्रमुच्यते ।।[२४] इति

इत्थं विचारणायां सम्यक् प्रतिभाति यत् पुराणेषु शैवागमस्य भूयस्त्वे न विमर्शः कृतो वर्तते। विविधाख्यानैः कथाप्रकल्पैः प्रतीकैश्च शिवतत्त्वस्य यन्निरूपणं जातं पुराणेषु तदुपेक्ष्य रूद्रस्वरूप विमर्शप्रक्रियारमणीय प्रतियोगिनी सेत्स्यतीति। पुराणेषु यादृशं एतत्तत्वमभिहितं तन्त्रग्रन्थेषु तदेव महतासमारोहेण निरूपितमस्ति। पुराणानामेवेदं वैशिष्ट्य यद् नार्यः शिवानुरूपमजरामरं मृत्युजयिनं पतिं कामयन्ते नराश्च समस्त शुभ्रगुणसम्पन्नां निग्रहानुग्रह समर्था समस्तसाधकलासामग्रीसम्पन्नां पार्वती सन्निभां नारीं कामयन्ते, चिरजीवी पतिस्स्यादेतदर्थं शिवाराधनं कर्तव्यमिति कर्तव्यता सिद्धयति स्त्रीणामिति।

काव्यपरम्परायाः खीष्टाब्दयाः प्रथमेशतके आविर्भावं मन्यन्ते आधुनिकाः ऐतिह्यविदः। काले अस्मिन् बौद्धकवरे अश्वघोस्य नामप्राथम्येन दृष्टिपथमवतरति। "बुद्धचरितम्" नामकाव्यं भगवन्तं बुद्धिमधिकृत्य प्रकाशितम् उल्लिखितञ्च वर्तते। राज्ञः कनिष्कस्यायं कालः। अत्र काव्ये भगवतः शिवस्य वहुवारं नामसमागतम्।

तथाहि—

भवनमथ विगाह्य शाक्यराजो, भवहवषणमुखजन्मना प्रतीतः ।
विसिस्मिये तत्र जनस्तदानींस्थाणु व्रतस्येव वृषभध्वजस्य ।।[२५]

एतेन ज्ञायते यद् तदानीं शैवपरम्परा शिवस्यरूपञ्च सामान्यतः तादृशमेवासीद् यादृशं रामायण, महाभारतकाले सीदिति।

भारतीय जीवने स कालो तीवरमणीयः यस्मिन् सरस्वत्या वाग्विलासः कविकुलगुरोर्कालिदासस्याविर्भावः समजनि। नाम्ना कर्मणा च कालिदासः शैव एवासीत्। तस्य रचनाः अद्यापि शैवागमस्य गौरवं वर्द्धयन्ति तस्य काव्यादि मङ्गलैः नाटकेषु नान्दीभिश्च शिवः एव स्तुतः। कालिदासरचनासु शिवस्यतदेवरूपं दृश्यते यस्य निरूपणं अधुना तन्त्रे-आगमे च दृश्यते। "रघुवंशमहाकाव्यं" श्रीरामचन्द्रमुद्दिश्यप्रक्रान्तम्। श्रीरामस्य विष्णोरवतारः। वैष्णवे चात्रक्रमे शिवशक्तिस्तुत्यैव ग्रन्थारम्भः तच्च[२६]—

वागर्थाविव　सम्पृक्तौ　वागर्थप्रतिपत्तये ।
जगतः　पितरौवन्दे　पार्वती　परमेश्वरौ ।।२७ इति

लघुकलेवरे श्लोके अस्मिन् समासतः यन्निगदितं तस्य शैवागमएवोपजीव्यभूतः। अत्र श्लोके जगतः कारणत्वेन शिवः पार्वती च जनकः जननीत्वेन स्तुतौ। वागर्थयोस्तादाम्यसम्बन्धः। शब्दातिरिक्तमर्थस्य कल्पनमेव न स्यात्। अर्थ विरहितः न को अपि शब्दः स्थास्यति। यथा—

न सो अस्ति प्रात्ययो लोक यः शब्दानुगमादृते" इति हरिवचनात् शब्दार्थयोर्यादृशं तादाम्यं कालिदासस्येष्टं तादृशमेवागमशास्त्रेस्वीकृतमिति कालिदासस्यपूर्ण शैवत्वं साधयति।

विक्रमोर्वशीये नान्दीपाठे शिवः पुरुषरूपेण निरूपितः। स वेदान्तस्य ब्रह्म इव पृथिव्यां दिवि च व्याप्तः, मोक्षार्थिनः तं ध्यानेन योगेन च प्राप्तुं समीहन्ते। परं स भक्तियोगेन अनायासेन लभ्यः। तथाहि—

वेदान्तरेषु　यमाहुरेकपुरुषं　व्याप्यस्थितं　रोदसि,
यस्मिनीश्वरइत्यनन्यविषयः　शब्दोयथार्थाक्षरः ।
अन्तर्यश्च　मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते,
सस्थाणुः　स्थिरभक्तियोगसुलभोनिः　श्रेयसायास्तुवः ।।[२८]

अत्र वेदान्तशब्दोल्लेखस्य विशेषार्थः। अतोह्येकेश्वरवादिशैवागमः तच्छिद्धान्तानुकूलः। अयमेव पन्थाः कालिदासस्यापीष्टः आसीदित्यत्र विसंवादावकाशो नास्ति।

"अभिज्ञान शाकुन्तलम्" नामके काव्ये अपि मङ्गलश्लोकः निर्दिशति तद्यथा—

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिताव्याप्यविश्वम् ।
यामाहुः सर्वबीज प्रकृतिरिति यया प्राणिनः प्राणवन्तः,
प्रत्यक्षाभिप्रपन्नस्तनुभिरवतुवस्ताभिरष्टाभिरीशः　।।[२९] इति

अत्र श्लोके शिवस्याष्टमूर्तयः मूर्तरूपेण निरूपिताः। ईशपरमेश्वरः परमकारूणिकः

सृष्ट्युपयोगि प्रकाशाख्यो शिवः पृथिव्यप्तेजोवाय्वाकाश सूर्यसोमहोतृ रूपेणानुदिनं विश्वं रक्षति स्वस्यापि रक्षकः सस्थादिति तं सतोति कविः। वस्तु तस्तु शिवः स्वयमेव प्रत्यक्ष विषयः द्रव्य चक्षुषा न द्रष्टुं शक्यते। स एभिः मूर्ताष्टद्रव्यैः अस्माकं सर्वेषां कृते प्रत्यक्ष गोचरतां याति।

शैवधर्मस्य लोकविख्यातस्यरूपस्य दर्शनम् कुमारसम्भवे, मेघदूते ग्रन्थे चावाप्यते। कुमारसंभवे शिवपार्वती विवाहः मदनदहनं स्कन्दोद् भवस्य चाख्यानं साङ्गोपाङ्गरूपेण दृश्यते। एभिराख्यानैः अतीवकमनीयम् महाकाव्यम् कविना ग्रथितम् कुमारसम्भवन्नाम। काव्ये अस्मिन् लोकाभिरामं शिवस्वरूपस्य वर्णनम जातम्। अत्र भगवान् शिवः शिवया सह कैलासे अमन्दानन्देनानुदिनंनिवसति अस्मिन् काव्ये शृंगारस्य भक्तिभावनायाश्चानुपमं सामज्जस्यम् दृश्यते यत्र सहृदयानां हृदयं आनन्दभरेणान्दोल्यते। कहाकविकालिदासः—

अस्त्युत्तरस्यां दिशि देवतात्मा, हिमालयो नामनगाधिराजः।

इति उपक्रमेण हिमालयस्य स्वरूपं समुपस्थाप्य ततः स्ववर्ण्यविषयं प्रादुर्भावयति।

मेघदूतकाव्ये अपि शिवः कैलासवासी चित्रितः। अत्र काव्ये उज्जयिन्यां महाकाल-कालेश्वरस्य विश्वमिश्रुतमन्दिरं विद्यते। तस्य चमहाकालस्य कथा संक्षेपतः निरूपिता विद्यते। तत्र सन्ध्यारार्तिक्यकाले नृत्याङ्गनाः समागत्य स्वनृत्यं प्रदर्शयन्ति स्म।

यक्षेण मेघमार्गनिर्देनप्रकरणे पथः वक्रत्वे सत्यपि उज्जयिनीं गत्वा तत्र भगवतः शिवस्य दिवसावसानिक संध्यायां मृदुगर्जनेन मृदङ्गतालेषु स्वतालसम्मेलनम् शिवार्चनम् सम्पाद्य पुरस्कारस्वरूपेण तत्रत्यनृत्याङ्गनानां कृतशतामयैः कटाक्षैः आनन्दसन्दोहं प्राप्नुहि इति कथा वर्णिता। तथा च—

अप्यस्मिन् जलधर महाकालमासाद्यकाले,
स्थातव्यं ते नयन यावदत्येति भानुः।
कुर्वन संध्यावलि षटहतां शूलिनः श्लाघनीया-
मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम्।

पादन्यासैः क्वणितरसनास्तत्र लीलावधूतैः—

रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः।
वेश्यास्त्वत्तोनखपदसुखान् प्राप्यवषाग्रबिन्दून्,
आमोक्ष्यन्ते त्वयिमधुकर श्रेणिदीर्घान् कटाक्षान्।।[३०] इति

भारतीयनाट्यशास्त्रे शिवस्योपजीव्यता स्वीकृता। ग्रन्थदादावेव ग्रन्थकृता ब्रह्मणः शिवस्य च सहैव स्तुतिः कृता। सा च—

प्रणम्य शिरसादेवौ पितामहमहेश्वरौ।
नाट्यशास्त्रं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम्।।[३१] इति

नटराजः शिवः अत्र ग्रन्थे प्रमुखः, स च नृत्यकलायाः महानाचार्यः कौशिकीवृत्तिमाश्रित्य तिष्ठति इत्युक्तम् नाट्यशास्त्रे—

दृष्ट्वा मया भगवतो नीलकण्ठस्य नृत्यतः ।
कौशिकीश्लक्षण नेपथ्या श्रृंगार रस सम्भवो ।।[३२] इति

तन्त्रागम सिद्धान्तानुरोधेन शिवस्वरूप विमर्शः

निगमागममूलक मिदं संस्कृत वाङ्मयम्। निगमपदेन वेदाः आगमपदेन शिवात्समधिगत्य शक्त्या प्रवर्तितं यच्छास्त्रं तदागम पदेनावगम्यते आप्तैः। उक्तञ्च तन्त्रसाहित्ये—

आगतं शिववक्त्रेभ्यो गतं च गिरिजामुखे ।
मतं च वासुदेवस्य तस्मादासगम उच्यते ।। इति।

इमौ चागममूलकौशक्तिशिवौ निगममूलक एवेति तत्र तत्र वैदिकसाहित्यानुशीलनेनावगम्यते। वेदेषु रूद्र रूपेण कीर्तिता देव एव परवर्ति साहित्ये काले च शिवपदवीमधिजगाम्, स चैव हि शक्त्याभिन्न इति विचारविषयिको निखिलशास्त्रप्रकाशकः परमगुरु पदवीमलञ्चकार। अस्यैव परमभट्टारकस्य शिवभिन्नस्य निग्रहानुग्रह शक्तस्यपरमप्रकाशक परमस्वतन्त्रस्याद्वयत्त्वस्य रूद्र-शिव-काल प्रभृत्यनैकैः परश्शतैः शब्दैः शास्त्रेषु निरूपितो विद्यते। वेदेषु ब्राह्मणेषु उपनिषत्सु, रामायणे, महाभारते, पुराणेषु, साहित्यग्रन्थेषु तन्त्रग्रन्थेषु शिलालेख प्रभृतिषु च सर्वत्र स्वयम् शिववेशकलितस्याप्यन्यस्यकृते अन्तरतो वाह्यश्चानन्द भुक्ति-मुक्ति प्रदायकत्वेन शिवो निरूपितो विद्यते। अस्यैव तत्त्वस्य मौलिकस्वरूपेषु केचन विचाराः प्रभावसम्मतयश्चाग्रे विविच्यन्ते अत्र प्रकरणे।

वेदेषु शिवः रूद्रशब्देन प्रायः उपस्थापितो विद्यते। ऋग्वेदे शिवस्य स्वरूपविषये त्रीणि एव समग्राणि परिपूर्णानि च सूक्तानि समुपलभ्यन्ते। तानि च प्रथममण्डले यथा—

इमारुद्राय तवसे क्पर्दिने क्षयद्वीराय प्रभरामहेमतीः ।
यथा शमसद् द्विपदे चतुष्पदे, विश्वंपुष्टं ग्रामे अस्मिन्नातुरम् ।।[३३]

अपि च—

अवो चाम नमो अस्मा अवस्यवः श्रृणोतु नौ हवं रूद्रो मरुत्वान् ।
तन्नो मित्रो वरुणो मामहन्ताम् अदितिः सिन्धुः पृथिवीउतद्यौः ।।

द्वितीयमण्डले च—

जाते पितुर्मरूतां सुम्नम् ऐतुमानः सूर्यस्य संरशो युयोधा ।
अभिनोर्वारो अर्वति क्षमेतप्रजायेमहिरुद्र प्रजाभिः ।।[३४] इति

सप्तमे मण्डलेच—

इमा रुद्राय स्थिरधन्विने गिरः क्षिप्रेषवे देवाय स्वधाब्ने ।
अषाल्हाय सहमानाय वेधसे तिग्मायुधाय भरताश्रृणोतु नः ।।[३५] इति

एतदतिरिक्तन्त्रान्यत्र रूद्रसोमयोश्चैकस्मिन् एव सूक्ते स्तुतिः विद्यते। तत्राद्येषु षट्सु मन्त्रेषु रूद्रस्य अन्ते त्रिषु सोमस्य च।[३६]

अन्यत्र चापि रुद्र सोमयोस्सहैव स्तवनं दृश्यते।[३७] एवं हि अन्यत्र देवैः सार्द्धमपि रुद्रस्य वहूत्र स्तुतिः दृश्यते वेदे। यथाहि—

त्वमग्ने रुद्रो असुरो महो दिवस्त्वं शर्वोमारुतं पृक्ष ईशिषे।
त्वं वातैररुणैर्यासि शंगयरुत्वं पूषा विधतः पासिनुत्मना ।।[३८] इति

अग्नेः रुद्रत्वेन ऋग्वेदे बहूत्र स्तवनं विद्यते। यथा—

अग्निं सुम्नाय दधिरे पुरोजना वाजश्रवसमिह वृक्तबर्हिषः।
यतस्रवः पुरुषे विश्वेदेव्यं रुद्रं यज्ञानां साधद् इष्टिमयसाम् ।।[३९]

पञ्चममण्डले विविधरूपेषु रुद्रस्य निरुपणं जातं। तत्र हि स क्वचिद् संहारकत्वेन क्वचिच्च स्वस्तिकर्तृत्वेन च स्तुतौ विद्यते—

तमु अष्टुहि यः स्विषुः सुधन्वा योविश्वस्य क्षयति भेषजस्य।
यक्ष्वामहे सौमनसाय रुद्रं नमोभिर्देवम् असुरं दुवस्य ।।[४०]
विश्वेदेवानो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये।
देवा अवन्तृभवः स्वस्तये स्वस्ति नोरूद्रः पात्वहंसः ।।[४१]
पातं नो रूद्रा पायुभिरुत त्रायेथां सुमात्रा तुर्यामदस्यूनतनुभिः।[४२]
भुवनस्य पितरं गिर्भिराभिरूद्रं दिवावधया रुद्रभवतौ।
वृहन्तं मृष्वमजरं सुषुम्नमृधग्धुवेमकविनेषितासः ।।[४३] इत्यादयः।

एवं अष्टममण्डले चापि प्रभूतात् रूद्रस्यस्तुतिः स्वतन्त्रतया वाक् सूक्तादिषु च प्रसृता वर्तते। तद्यथा—

अहं रूद्राय धनुरातनोमि, ब्रह्म द्विषे शरवे हन्त वा उत।

अपि च—

मयोभुवातो अभिवातग्राः ऊर्जस्वती रोषधीरारिषन्ताम्।
पीवस्वती जींवधन्याः पिबन्त्ववसाय पद्धते रुद्र मूल ।।[४१] इति

तैत्तिरीय संहितायाम् कृष्णयजुर्वेदे च रुद्रस्य विविधरूपास्तृतयः दृश्यन्ते तत्र रुद्रस्य कुत्रचिदग्निना, कुत्रचित् सूर्येण, कुत्रचिद्त्र्यम्बकहोमेन शतरुद्रियरूपेण, शिवरूपेण, पशुपतिरुपेण, च वर्णनम् समुपलभ्यते। ततश्चादाय केचनमन्त्रः उदध्रियन्ते रुद्रस्येति। यथा—

भावः स्तेन ईशत् मा द्यशंसो रुद्रस्यहेतिः परिणोवृणक्तु ध्रुवा।
अस्मिन् गोपतौः स्यात् बह्वी यजमास्य पशून् पाहि ।।[४५]

रुद्रस्य सूर्येण सम्बन्धः यथा—

रुद्रस्य त्वा वर्तयतु मित्रस्य यथा ।।

अग्निः रुद्रेण तदात्म्यम् यथा—

देवासुराः संयता आसन्ते देवा विजयमुपयन्तो अग्नौ वामं वसुसो रोदीघदरोदीत्तद् रूद्रस्य रूद्रत्वम् इति त्रयम्बक होम विषयकम् स्तवनं जातं तत्रैव प्रथमे काण्डे पशूनां शर्मासि शर्म यजमानस्य शर्म मे यच्छक एव रुद्रो न द्वितीयायतस्थ। इति।

वाजसनेयि संहितायाम् षोडशा अध्याये प्रथमसूक्ते षट्षष्ठिमन्त्रेषु रूद्रस्य विभिन्नै-र्नामभिः स्तुतिः कृता विद्यते।

पशुपतित्वेन रुद्रः तत्रैव वाजसनेयि संहितायां चतुर्विंशाध्याये तृतीयमन्त्रे स्तुतः यथा—

रुद्रायपशुपतये कर्णायामा वलिप्ता रौद्रा नभो रूपा पार्जन्याः। इति एकोनवत्वारिंशा-ध्याये नवममन्त्रे च उग्रं लौहितेन मित्रं सौव्रत्येन रुद्रं दौव्रत्येनेन्द्रं प्रकीडेन मरुतो बलेन साध्यात् प्रमुदा। भवस्य कण्ठ्यं रुद्रास्यानतःपार्श्व्यं महादेवस्य यकृच्छवस्य वनिष्ठुः पशुपतेः पुरीतत्। इति एषु मूलेषु रूद्रस्य यद्रूपं निहितं तस्य कियन्तो विधयः कस्य च प्रातीकत्वेन तस्य निरूपणं इति विषयमवलम्ब्य बहवः कल्पना कलिता। रूद्रस्य नाम्नः सार्थक्येन, मरुतां साहचर्येण, तस्य बभ्रु वर्णेन प्रायः क्रूरकर्मणा च रूद्रं केचन संहारकत्वेनामनन्ति। प्रमाणार्थम् शर्मन् (जर्मन) देशीय विदुषः बेबरमहोदयस्य विचाराः मर्शणीयाः। स स्वग्रन्थे रूद्रं झंझावातस्य विध्वंसक स्वरूपस्य च रूद्ररूपस्य परिकल्पनं चकार।[४६] भारतीय पाश्चात्य विद्वान् श्री भण्डारकरमहाभागस्तु प्रकृतेः विध्वंसक शक्तीनां स्वरूपेण रूद्रं परिकल्पयति।[४७]

पाश्चात्य विद्वान् डॉ. मैकडोनल महोदयस्तु रुद्राग्नयोः. साम्यं परिलक्ष्य नैव झंझावातस्यापितु विनाशकताः विद्युः रूपे झंझावातस्य विध्वंसक स्वरूपवत् रुद्ररूपं निर्धारयति।[४८]

आङ्ग्ल विदुषःम्यूरह महोदयस्यमपीत्थमेव सम्मतिः।[४९]

केचन विद्वासश्चाग्निरुद्रयोः साम्यं विभाव्य तं अग्नेरेव कस्यचिद्रूपस्य प्रातीकमित्या-मनन्ति। ऋग्वेदस्य स्वानुदित भूमिकायां आङ्लविद्वानविल्सनमहोदयः अग्नेः इन्द्रस्यैकरूपेणैव रूद्रं व्यवस्थापयति।[५०] एवं हि अन्ये अपि पाश्चात्यदेशीयविद्वान्सः इतिहासवेत्तारश्च संहारक-रूपेणैव रूद्रं उपस्थापयन्ति कल्पयन्ति च।

परं वयं भारतीयाः मंगलामंगलविरुद्ध धार्मिकनिखिलसंसर्ग समन्वित शिवा-शिवसिता-सितासि दूराति सन्निधि निग्रहानुग्रहकरणान्य व्याकरणसमर्थ सर्वाभीष्टदः तत्त्वातीतो नतीतश्च कश्चिद् विलक्षण समस्त-वैलक्षण्य. गुणगणानामेकाक्यः क्वचिदीश्वरः, गुरुः ज्ञानरूप एव रुद्रः, शिव पदमलंकारोतीति मन्यामहे।

स एव विचित्रासनाशनशयनवाहनास्त्रशस्त्राभूषणपरिवेशावाद्यवृन्दपुत्र-कलत्रादिमण्डितः। अशिवदेशस्थितो अपि शिवरूपः कालजयी, अजः शिवः, महादेवपदवीकः, समस्तविरो-धानां समाहर्ता, विषंपीत्वा प्यमृतः, पिण्डमूर्तिः, विविधरूपेणाराध्यः, आशुतोषः, रुद्रः समस्तशास्त्रोप्यमृतः, पिण्डमूर्तिः, विविधरूपेणराध्यः अनाख्येयो अपि तत्त्वज्ञैराख्येयः, प्रकाशः शिव इति मन्यामहे।

एवं हि ऋग्वेदे, यजुर्वेदे च रुद्रस्य विविधरूपाणि प्रदर्शितानि। तत्रत्यालो नविमर्शेनेदं परिज्ञायते यत् सान्द्रेषुमेघेषु चपलायमानया सौदामिन्या सार्द्धमेवामन्दमेघनिघोषं महावृष्टिश्च प्रवृत्तेः यत्तत्वं तदेव रूपपदेनाभिधीयते।

रूद्रशब्द निरुक्तिः

रुद्रशब्दस्य को अर्थः इत्यभिधायकोशकाव्यादिषु यन्निरुपितम् तज्ज्ञात्वारुद्रशब्दस्य काश्चन निरुक्तयोग्रे प्रद्रक्ष्यन्तो। रुदिर अश्रुविमोचने इत्यस्माद्धातोः औणादिके रक् प्रत्यये कृते सतिरुद्रशब्दस्य निष्पत्तिः सम्पद्यते।

यथा रोदनात् इतिरुद्रः।

अपरञ्च-रुधिर आवरणे इत्यस्माद्धातोः सम्पदादित्वात् भावेक्विप् प्रत्यये सति स्त्रीत्वविवक्षायां रोधनं रुदतां रुधम् राति=ददाति इति रुद्रः। अन्यच्च=रवणं रुत् रुतम् रवं राति=ददाति इति रुद्रः (झलांजशो अन्ते) वाचस्पत्यादित्यादिकोषग्रन्थेषु च—पुरोदिति रुद्रः-रक्। शिवमूर्ति भेदेनयो रोदति-वदरोदीत् तत् रुद्रस्य रुद्रत्वम् श्रुत्युक्ते। २. वह्नौ च। अजैकपादहिर्बघ्नौ विरुपाक्ष सुरेश्वरः।

अयन्तो बहुरूपस्य त्र्यम्बककोप्यपराजितः ।
वैवश्वतश्च सावित्री हरो रुद्रा इति स्मृता ।। इति

इत्युक्तेषु एकादशेषु शिवमूर्तिभेदेषु शुक्ल यजुर्वेद संहितायाम् १६ अध्याये-नमस्ते रुद्रमन्वये "इत्यादिषु" रुद्रवुणेषु च। एकादशसंख्यायाम्। आदिनक्षत्रे इत्याद्युक्तम्।

अत्र प्रत्यभिज्ञादर्शनसम्प्रदाये-निष्कलं, परमस्वतन्त्रम्, परशिवाद्वैतत्त्वमेव परमार्थेना-वशिष्टम्, शक्त्यादीनां तत्रैव परशिवतत्त्वेलयः। अत्र तत्त्वे-विच्छक्ति, आनन्दशक्ति, इच्छाशक्ति ज्ञानशक्ति, क्रियाशक्ति इति पञ्चभेदाः शक्तिः अवतिष्ठते। शक्ति प्रभावादेवाभासरूपस्य जगतः उत्पत्तिः भवति। अयञ्चाभासः अद्वैतवेदान्तस्य विवर्तवाद इव संगच्छते। परमत्रकेवल-मिदमेव वैशिष्ट्यम् यदायं विश्वप्रपञ्चः परमशिवसम्बन्धात सन्नेव। वेदान्ते च पारमार्थिका-वस्थायामिदमसन्निति। यतोहि-जीवः तत्त्वतः शिवांश एव। परमशिवः काल-नियति-राग-विद्या-कला इति पञ्चविधबन्धनैः आत्मानं निष्कलं, स्वतन्त्रस्वरूपं सम्प्रबाध्य सृष्टिजन्य उपयोगित्वं सम्पादयति। अन्ते ज्ञानदशायामयं जीवः समस्त मलानपहाय स्वरूप बोधनपरः सन् "शिवो हमिति" भावापन्नः शिवरूपतां भजते। एतत् सर्वं अद्वैतवेदान्तदर्शनवज्ज्ञेयमिति।

स्मृतावपिशिवस्वरूपशैव धर्मपरम्परायाः प्रचुरः प्रभावोवर्तते। यथा—

एतद्देश प्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ।। इति।

मनूक्त वचनात् भारतीयज्ञानस्यातिप्राचीनकालादेवगौरवातत्रत्या जनाः विभिन्न देशेषु

गत्वा जीवलोकानां हितकामनया स्वधर्मस्य प्रचारमकुर्वन्। वैदिक रामायण, महाभारतादि सभ्यतायाः इतः सुदूरस्थितेषु देशेषु पुष्कलः प्रचारः अजायत। इति तत्र-तत्र अभिलेखैः शिलालेखैर्वावगम्यते। भारतवर्षस्यान्य सुदूरवर्तिभिः यूरप-अमरीका प्रभृतिद्वीपैस्सर्द्धमेव विशेषतः पूर्वदिक्स्थितेर्देशेः उत्तरदिगस्थदेशैश्चीनादिभिश्च संश्लिष्टोव्यापारसम्बन्धः आसीदिति जानन्त्ये-वैतिहासिकाः।

किञ्च पूर्ववर्तिदेशेषु प्राक्तनकालादेव प्रवासिभारतीयानां संख्याप्रवाह इव गच्छतिस्म। तत्र-तत्र हिन्ददेशीया, मलयेशिया, ब्रह्मा, थाईलैण्ड, सिंगापुरम्, जावा प्रभृतिदेशेषु ते गत्वा तत्रैवान्यवसन्। एषां देशानां भारतवर्षेणगहनसम्बन्धत्वातत्र भारतीयसंस्कृतेः दर्शनस्य च प्रभावाः निपतिताः। एषु प्रभावेषु तत्र विविधशिवस्वरूपस्य, शैवधर्मस्य च प्रभावोप्यजायत।

भारतवर्षेण सम्पृक्ताः नेपाल, तिब्बत, सिंहलद्वीप प्रभृतिषु पूर्ववर्तिदेशेषु अशोक कलादेव एतद्देशप्रभावात् बौद्धधर्मप्रधानाः अजायन्त। तत्र नेपालदेशं परिहृत्य यत्र च पुनः ब्राह्मण (वैदिक) धर्मस्य प्रभावो प्यजायत। नेपालदेशे वैष्णव-शैव-महायान-बौद्धसम्प्रदायाश्च दीर्घकालं यावतत्र प्रचलिताः अभूवन्। परं शनैः शनैः शैव वैष्णवमतानां प्रभावादेवस्थितः बौद्धधर्मश्चततो पगतः। शाक्तमतस्यापि तत्र नेपाले शैव मत प्रसरकालादेव प्रभावः समापतितः। अद्यत्वे नेपालदेशे देव्या बहूनि मन्दिराण्यवाप्यन्ते। तेषु भाटग्रामस्थ "देवीभवानी" इत्याख्यं मन्दिरमतीव मनोहरं वर्तते। तिब्बते भूयसा शिवमन्दिराण्येव प्राप्यन्ते, तथा च तत्र शिंव-बुद्ध मन्दिराग्रेषु गणेशमूर्लयः अपि लभन्ते। इमानि च प्रमाणानि शिलालेखेष्वपि प्राप्यन्ते।

सर्वतो अधिकानि प्रमाणानि हिन्दचीनभागस्य चम्पाकम्बोज देशेषु ईशा ख्रीष्टाब्द्या प्रथमशतकादारभ्यैवलभ्यन्ते।

हिन्दचीनप्रान्ते शैवमतस्योल्लेखः सर्वस्यादौ चम्पाप्रान्ते चोहिन्दशिलालेखे दृश्यते। तथा च स शिलालेखः—

नमो देवाय भद्रेश्वरस्वामीप्रसादात् अतनये त्वा जुष्टं करिष्यामि धर्ममहाराज श्रीभद्र-वर्मणो यावच्चन्द्रादित्यौ तावत्।।[५१] इति

चतुश्शतख्रीष्टाब्दकालं यावदत्र प्रान्ते शैवधर्मस्य दृढ़तरो प्रचारः अजायतो तदानीन्त-शासको अपि तद्धर्मस्यानुयायि आसीत्। अत्र विशेषतः अवधेयमिदमेव यदत्र शिलालेखे उपासनायाः यद्रूपं निरूपितं तत्र पौराणिकम् न वा रामायणीयं, महाभारतीयञ्च किन्तु वैदिकं तत्।

भारते धर्मस्वरूपपरिवर्तनस्य प्रभावः सुदूर वर्तिषु एषु देशेषु अपि निपतितः अत्रैव चम्पाप्रदेशस्यैकस्मिन् शिलालेखे भगवन्तं शिवं भगवतीं शिवां च महेश्वर शब्देन उमाशब्देन च व्यवहृतवान्। शिलालेखकारः अत्रैव शिलालेखे ब्रह्माविष्णवोश्चोल्लेख्यो जायत। तथाहि—

सिद्धं नमो महेश्वरम् उमां च प्र.........
ब्रह्माणं विष्णुमेव च ।।[५२]

खीष्टाब्दस्य पञ्चमान्तशतकादारभ्य षष्ठशतकस्यारम्भकाले शम्भुवर्मणः माहसोन शिलालेखे शिवं जगतः कारण-पालक-संहर्तृत्वेनैकम् शुद्धं सर्वश्रेष्ठं सर्वज्ञञ्च निरूपितवान्। यादृशं हि पुराणेषु स्वरूप वर्णनम् तादृशमेवहि इदमपि वर्णनम्। यथा—

स्थित्युत्पत्ति प्रलयवशिनः शूलिनः स्मराणां...
कृत्स्नंवेति त्रिभुवन गुरु कारणं स्थाणुरेव ।।[५३]

षष्ठशतकस्योत्तरार्द्धे प्राकाशवर्मणः अनेकैः शिलालेखैः प्रतीयते यद् तद्देशे तत् काले लिङ्गोपासनायाः भूयस्त्वेन प्रचारो जातः। राजाप्येकस्मिन् शिवमन्दिर शिवलिंगस्य प्रतिष्ठां चक्रे। अस्यराज्ञः शिलालेखे शिवः पत्ब्रह्मस्वरूपेण दृश्यमान जगतश्च कारणत्वेन निरूपितः तथाहि—

स्वाः शक्तिः प्रतियोग्यतामुपगतः क्षित्यादयोमृर्तयो,
लोकस्थित्युदपादिकार्यपरता ताभिर्विनानास्ति हि ।
यो ब्रह्माविष्णुत्रिदशाधिपादिसुरासुरब्रह्मनृपर्णिमान्यः ।
तथापि भूत्यैजगतां नृत्यच्छ्मशानभूमावतिचित्रमेतत् ।[५४]

अत्र भगवतः शिवः कपालिरूपं निरूपितम्। यो हि भगवान् परमेशः ब्रह्मविष्णु प्रभृतिभिर्देवैवनयमान्यः स कथन्नामाशिववेशं दधाति। अत्रापि परमेशितुः शिवस्य शिवात्मिका लोकमंगलकारिणी इच्छैव।

यवद्वीपे अपि शैवमत प्रचारस्य शिवस्वरूप प्राप्तेश्च सुपुष्टप्रमाणं—

"दिएंगउच्चसमस्थले" स्थानेसप्तमशतकस्यानेकानिशिवमन्दिराणि सन्ति। तेषां स्वरूपः दक्षिण भारतीय "पागोड़ा" इव सन्ति। एषु चण्डी श्रीखण्डी मनिदरस्य मूर्तिषु शिव-ब्रह्म-विष्णु मूर्तिनामांकनम् जातम्। एतत्कालं यावदत्र गणेयासनायाः प्रचलनमप्यजायत्। अस्मिन्नेव देवालये अगस्तस्य महर्षेः प्रतिमैका अस्ति। यस्या नामकरणं कल्पान्तरे "शिवगुरुः" इति पदेनाभवत्, यवद्वीपे अयमेव शैवधर्मस्यप्रचारमकरोदिति मान्यता प्रतिफलति।

ब्राह्मणग्रन्थोत्तरकालः उपनिषदां, तदुत्तरकालश्च सूत्रसाहित्यस्य तत्र श्रौत-धर्म-गृह्य-सूत्रेषु शिवस्वरूपस्य तदुपासनायाश्च का प्रक्रिया किं स्वरूपं आसीदित्यनुपदमेव विविच्यते।

यथा—उपनिषदामुत्तरकालेन सहैव सूत्रेष्वपि शिवार्चनस्य क्रमः शनैः-शनैः प्रचलितो भूत्। अयञ्चार्चन क्रमः कर्मकाण्डपथमुत्सृज्य भावपथमलङ्करोति। अस्मिन्काले अनेकेषु देवेषु स एक एव शिवोदेवः विभिन्नस्वरूपाभिः नामभिश्च विभूषितः आराधना धारः। स भवः रूद्रः, शर्वः प्रभृत्युपाधिभिः विभूषितः। महादेवः, पशुपतिः, भूतपतिः प्रभृतीनि गुणकर्मानु-रोधीनि नामानि रक्षयति। यथा च शांखायन श्रौत्रसूत्रे—

"वेदे पितरं वेदमातरं, द्यौस्तेपिता पृथ्वीमातातस्मैते देवभवायशर्वायपशुपतये उग्राय देवाय महतेदेवाय रुद्रायेशानायाश्नयेस्वाहेति।[५५]

"भूपते: भुवपते, भुवनपते, भूतानांपते महतोभूतस्यपते स मृत्वनौ द्वपदे चतुष्पदे च पशवे मूल नश्च द्विपदश्च चतुष्पदश्च पशून, यो स्मान् द्वेष्ठि यं च वयं द्विष्मो दुरापूरो सि सच्छायो धिनामेन।[५६] इत्यादयश्च। एवं हि शांखायने[५७], लाटायन[५८], आश्वलायन[५९] सूत्रेष्वपि संहितापद् त्र्यम्बक नाम्ना तस्मै विशेष हविर्दानम्, स च रूगृहरमौषधीनां दाता, मनुष्य पश्वादीनां च त्राता इति ज्ञायते।

विशेषत: शांखायन श्रौत्रसूत्रे शिवसहचर्या: स्त्रीदेवताया: भवानीशर्वायी, ईशानी, रूद्राणी, आग्नेयी प्रभृतिनामरूपाभि: स्तुत:। समकालिकेषु धर्मसूत्रेष्वपि श्रौत्रसूत्र इव शिवोपासनया: निर्देशो निर्दिष्टा। बोधायन धर्मसूत्रे शिवसहचरीस्त्रीदेवताया: कृते अनेकेषां तर्पणकर्मणान्निर्देशो विद्यते, एतस्या स्त्रीदेवताया: स्पष्टरूपेण रूद्रपत्नीत्वेनाप्यत्र निर्देश: सम्प्राप्यते। तथाहि—

ॐ भवं देवं तर्पयामि। ॐ शिवं देवं तर्पयामि। ॐ ईशानं ॐ ईशानं—ॐ पशुपतिं ॐ रूद्रं, ॐ मुग्रं—ॐ भीमं—ॐ महान्तम्—ॐ भवस्य देवस्य पत्नीं तर्पयामि।[६०] इत्यादय:।

सामान्यजनानां धार्मिकविचार चाराणां स्वरूपज्ञानाय गृह्यसूत्राणि सन्ति परमोपयोगीनि। गृहस्थजीवनेन सह गृह्यसूत्रस्थ सम्बद्धतया तत्र हि शिवोपासनाविधे: वाहुल्येन निरूपणात् सामान्य जीवनेन शिवस्य सम्बन्ध: इदानीं यावत् सम्पन्न इति तत्र-तत्र गृह्यसूत्रानुशीलनेनावगम्यते। निर्विघ्नता सिद्ध्यर्थं सुखसमृद्धिप्राप्यर्थं च आश्वलायनगृह्यसूत्रे शिवं समुद्दिश्य होमैक: प्रदर्शित:। स च—

"आश्वयुज्याम आश्वयुजीकर्म। निवेशनं अलंकृत्यस्नाता: शुचिवासस: पशुपतये-स्थालीपाकं निरूप्य जुहुयु:। पशुपतये शिवाय शंकराय पृषातकाय स्वाहा।[६१] इति

शिव: सामान्यत: वृक्षेषु चत्वरेषु, पुण्यतीर्थेशु, श्मशानेषु च एकाकी एव रमते। तत्र-तत्र जनानां अनिष्ट: सम्भवति, तस्मादेव रक्षणार्थं शिवाराधनं भवति स्म।[६२]

अन्यदपि शिवस्य स्वरूपाणि नामानि च शास्त्रेषु समुपलभ्यन्ते। यथा—परब्रह्म, असीम:, अचिन्त्य:, विश्वस्त्रष्टा, आत्मनि विश्वसमाकलिता, आशुतोष सर्वविघ्नच्छिद:, कालजयी, अज:, शिव:, महादेवपदवीक:, रूद्र: सर्वशास्त्रोपजीव्य:, अनाख्येय:, ईश्वर:, गुरु:, ज्ञानरूप:, इत्यादय:।

शुभेच्छु भक्ता: शिवभक्ताश्च परमकल्याणाकरित्वेन जगत: पितरौ भगवत: शिवस्य, पराम्बाशिवाया: तद् भक्तांश्च सर्वतोभावेन आद्रियन्ते। यथा—

माता च पार्वतीदेवी पिता देवो महेश्वर: ।
बान्धवा: शिवभक्ताश्च स्वदेशो भुवनत्रयम् ।।[६३] इति शम।

तन्त्रागम शब्दानां विवेचनम् :

तनु विस्तारे इत्यस्मात्तनादिगणपठितांद्धातोः "सर्वधातुभ्यष्ट्रन्" इत्यौणादिक सूत्रानुसारं ष्ट्रन् प्रत्ययान्तः, तनोति तन्यते अनेनेति व्युत्पत्त्यानुसारं, यद्वा कुटुम्बधारणपोषणार्थकात् तन्त्रिधातोः "भावे" (३।३।१८) इति अष्टाध्यायी सूत्रानुसारं घञ् प्रत्ययान्तः, तन्त्रणं तन्त्र्यते यद् येन यत्र वेति व्युत्पत्त्यानुसारं तन्त्रशब्दः सिध्यति।

किञ्च-प्रमाणमपियमाश्रित्य प्रमाणं भवति। तस्य प्रमाणस्य तदधीनशरीरप्रणनीलसुखा-दिवेद्यं चातिशय सदाभासमानस्य वेदैकरूपस्य सर्वप्रमितिभाजः सिद्धौ अभिनवार्थपकाशस्य प्रमाणवराकस्य कश्चनोपयोगः। एवञ्च शब्दराशिमयपूर्णाहन्तापरापरामर्शसारत्वात् परमशिव एव षट्त्रिंशत् तत्त्वात्मकः प्रपञ्चः तथा च षट्त्रिंशत्-तत्त्वानि—

१. शिव २. शक्ति ३. सदाशिव ४. ईश्वर ५. शुद्धविद्या ६. माया ७. कला ८. विद्या ९. राग १०. काल ११. नियति १२. पुरुष १३. प्रकृति १४. बुद्धि १५. अहंकार १६. मनः १७. श्रोत्र १८. त्वक् १९. चक्षुः २०. जिह्वा २१. घ्राण २२. वाक् २३. पाणि २४. पाद २५. पायु २६. उपस्थ २७. शब्द २८. स्पर्श २९. रूप ३०. रस ३१. गन्ध ३२. आकाश ३३. वायु ३४. बन्हि ३५. सलिल ३६. भूमयः इत्येतानि। एतत् सर्वं तन्त्र पथः एवानुकरोति। यतश्च—

यथा न्यग्रोधबीजस्थः शक्तिरूपो महाद्रुमः ।
तथा हृदयबीजस्थं विश्वमेत्तच्चराचरम् ।।[१४] इति

तथा च—

तनोतिविपुलानर्थान् तन्त्र-मन्त्रसमन्वितान् ।
त्राणं च कुरुते यस्मात् तन्त्रमित्यभिधीयते ।।[१५] इति

प्रमाणेन निरन्तरं विस्तारार्थक विशेषार्थक तन्त्र-मन्त्र समन्वित त्राणकर्मता तन्त्रस्य सिद्धयति। एवञ्च तन्त्र ग्रन्थ जातं यत् तं सर्वं ज्ञानराशिं विस्तृणाति विस्तरेण प्रकटयति, तदनुसारि कुटुम्बं समूहं विभर्तितत् तन्त्रम् ज्ञानराशीनां विस्तरेण प्रतिपादयतां ग्रन्थानां च विषयभेदात् भवति पारस्परिको भेदः। तथा च यः कश्चनापि ग्रन्थो यं कञ्चन ज्ञानविषयं विस्तरः प्रतिपादयन् तन्त्रशब्देन वक्तुं शक्यते। तथा च—

व्यवहारः कथ्यते यत्र तथा चाध्यात्म वर्णनम् ।
इत्यादि लक्षणैर्युक्तम् तन्त्रमित्यभिधीयते ।। इति

परमेश्वर भावविजृम्भणमेवसृष्टिमूलं प्रतिष्ठते तन्त्रशास्त्रे। एतस्मात् कारणादान्तरस्यै-वबुद्धिगतशब्दार्थ युगलभावस्य बहिः प्रकाशनं तन्त्रराद्धान्ते प्रगाढश्रद्धां द्योतयति। तन्त्रशास्त्रे मन्त्रदैवतयोरैक्यं प्रातिपादितम् शिवशक्त्योरभेदस्तादृश एव शब्दार्थयोरभेदः। शब्दाः शक्तिरूपाः अर्थाश्च शिवरूपाः। उक्तञ्च वायवीय संहितायाम्—

शब्दजातमशेषं तु धत्तेशंकर वल्लभा ।
अर्थस्वरूपमखिलं धत्ते मुग्धेन्दुशेखरः ।।[६६] इति

एष एव सिद्धान्तः भर्तृहरिणा अपि—

न सो अस्ति प्रात्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिवज्ञानं सर्वं शब्देन भासते ।।[६७] इति

आगमतनत्रशास्त्रं संहिता चेति शब्दत्रयं नामवैषम्ये अपि विषय सादृश्य मेव प्रकटयति। वैष्णवानां ग्रन्थाः प्रायः संहितापदवाच्याः, शैवानामागमः शाक्तानां तन्त्रम् च। प्रत्येकं ज्ञानं, योगः, क्रिया, चर्या चेति चतुर्णां विषयाणामन्मर्भावो स्त्येव। अष्टाविंशति-संख्याकानामागमानां, तथोपागमानां शिवकथितानामुल्लेखो मिलति। यथा—

आगतं शिव वक्त्रेभ्यो गतं गिरिजामुखे ।
मतं च वासुदेवस्य तस्मादागम उच्यते ।। इति

पञ्चरात्रसंहिता अष्टोत्तरशतसंख्याका आसन्, यासु द्वादश एव मुद्रिताः सन्ति। अहिर्बुध्न्य संहिता तु प्राचीना। पाश्चात्यैस्तस्याः समय ईस्वी चतुर्थशतके शाक्तानां पृथिव्या विभिन्नेषु त्रिषुस्थानेषु-अश्वक्रान्त-रथक्रान्त विष्णुक्रान्तेषु चतुःषष्टिसंख्याकानि तन्त्राणि सन्ति इति वर्णितम्। महानिर्वाणतन्त्रमिति प्रसिद्धम्। एतेषामनुष्ठानेन भोगेन सह मोक्षस्यापि सिद्धि-र्भवति। यथा—

यत्रा अस्ति भोगो नहि तत्र मोक्षो यत्रा अस्ति मोक्षो नहि तत्र भोगः ।
श्रीसुन्दरीसेवनतत्पराणां भोगश्चमोक्षश्च करस्थ एव ।।[६८] इति

आगमविषये भगवान् पतज्जलिरपि महाभाष्य पशपशान्हिके व्याकरणाध्ययनप्रयोजने उक्तम्—"आगमः खल्वपि" ब्राह्मणेन निष्कारणो धर्मः षड्ङ्गोवेदा ध्येयो ज्ञेयः इति। तत्तु-उद्योत टीकाकारः तत्र वक्ष्यमाण आगमपदेन श्रुतिः। श्रुतावपि जनमेजयाद्युपाख्यानवत्पौरूषेय व्याकरणस्थापि नित्यताबोधनमुपपद्यते। यद्वा तेन प्रोक्तम्—इति सूत्र भाष्यरीत्या वेदार्थव्या-करणार्थो अपि, "अनादित्वरूपनित्यतावान्" इति श्रुत्या तस्य नित्यत्व बोधनमिति बोध्यम्। धर्मत्वं च वेदस्य पुरुष यत्न साध्यतया धर्मत्वे नाभिमताध्ययनज्ञानकर्मत्वे नौपचारिकमित्याहुः।

तदेव प्रदीपटीकाकारमतानुसारं वक्ष्ये :

यत्तु यद्यप्यागम्यते-प्रमीयते हिताहितप्राप्तिपरिहारावनेनेत्यागमः। अनादि रूपदेशः प्रत्यक्षानुमानिकश्रुतिरूपः। तथाप्यत्रागमशब्देन तत्फलं लक्ष्यते। तच्च नियोज्यस्य हिताहित-प्राप्तिपरिहाररूपम्, उपदेशस्य नियोज्यप्रयोजनैकसाध्यत्वात् इति केनचिदुक्तम्। तन्न आगम-शब्दस्य लाक्षणिकत्वे निर्मूलमुख्यार्थ त्यागापत्तेः। उत्तरग्रन्थासंबद्धत्वायत्ते। अस्य प्रत्यक्षवेदे-ष्वनुपलम्भेन प्रत्यक्ष श्रुत्यरूपत्वात्। अनुमापकाभावदनुमितत्त्वस्याप्यभवाच्च। न च व्याकरणा-ध्ययनेनैवास्यानुमानम्, अन्योन्याश्रयापत्तेः, एतदध्ययनेन तदनुमानम्।

२५२७२

न चैवं स्मृतेरेवेयमास्ताम् आगमबोध्यत्वम्। पौरुषेय तया अस्या आगमत्वोक्त्य सांगत्यापत्तेः। न च वेदमूलकत्वे तस्याः स्मृतेरप्यागमत्वम्। नित्यानित्यसंयोग विरोधात्। स्मृतेर्वेदमूलकतया स्मृति विधेयस्य वेद विधेयत्वं स्वीकार्यम्। न चैतत् सम्भवति व्याकरण-स्यानित्यस्याध्ययनम्। नित्येन वेदेन विधीयते इति। तथा च तद्वतप्रवाहनित्यतया नित्यविधि-विषयत्वोपपत्तिः। न च प्रत्यक्ष श्रुत्यमूलकत्वान्न ते प्रवाहनित्यत्व कल्पनं युक्तम्।

आगमेषु दार्शनिक विचाराणामति गहनं समीक्षणमपि जातम्। यतो हि—

कृते श्रुत्युक्त आचारस्त्रेतायां स्मृति सम्भवः ।
द्वापरे तु पुराणोक्तः कलौ आगम सम्मतः ।।[६९]

अपि च—

"विनाध्यागम मार्गेण कलौ नास्ति गतिः प्रिये" इत्यलमति विस्तरेण।

"तन्त्रागम" शब्द विवेचनम् :

तनोति विपुलानर्थान् तत्त्वमन्त्रसमाश्रितान् ।
त्राणं च कुरुते पुंसां तेनतन्त्रमिति स्मृतम् ।।[७०] इति

इत्थं व्युत्पत्तिर्दृश्यते तन्त्रशब्दस्याजितागमे—

इह तावत् समस्तो यं व्यवहारः पुरातनः ।
प्रसिद्धिमनुसन्धाय सैव चागम उच्यते ।।[७१] इति

इति चागमपदस्यार्थः स्फोरितस्तन्त्रालोके शास्त्रसम्मेलनाख्ये पञ्चत्रिंशान्हिके।

लौकिकं वैदिकं साख्यं योगादिपञ्चरात्रकम् ।
बौद्धार्हतन्यायशास्त्रं पदार्थक्रमतन्त्रणम् ।।
सिद्धान्ततन्त्रशाक्तादि सर्व ब्रह्मणोदभवं यतः ।
श्रीस्वच्छन्दादिषु प्रोक्तं सद्योजातादि भेदतः ।।[७२] इति
इति च तत्रैव सर्वशास्त्राणां पञ्चब्रह्मोद्भवत्वं वर्ण्यते ।
आगमो हि नाभयं शब्दनसंक्रान्ति शरीरतः ।
परत्र स्ववोध संक्रान्तये शब्देनोपदिश्यते ।।[७३]

अपि च—

स च यो यस्य हृदये निरुढिमागतः स एव ।।[७४] इति

"न हि बुद्धो नाम नियतः कश्चित् अपितु भावनाबल प्रतिलब्धक्षणिकादि दृढ़ विमर्शः। तस्यक्षणिकादिभावनोपदेशी गुरुः पूर्वबुद्धः तसयाप्यन्य इति क्रमेणानियत वक्तृकत्वात् पारमेश्वर विमर्शमयतैव वस्तुतः। एवं चतुर्विंशतितत्त्व भावनाभावितः कपिलोमन्त्रव्यः। अत एव सर्वागमा अनादय एव।"

उक्तञ्च वाराहमिहिरेण—

विष्णोर्भागवता मधाश्च सवितुः शम्भोः सभस्मद्विजा,
मातृणामथ मातृमण्डलविदो विप्रास्त्वथैब्राह्मणो,
शाक्त्या सत्त्वहिताय बुद्धवपुषो नग्नास्तथैवार्हतो,
यैर्यदेव उपास्यते स्वविधिना तैस्तस्य कार्याक्रिया ।। इति

अभिनवगुप्तो अपि—"वेद्यं धर्माद्युपायं निश्चितं गमपतीति निगमोवेदः" इति च निगमपद-व्याख्याति।

तन्त्रागमशास्त्रस्य प्राचीनता :

भारतीयसंस्कृतौ वैशिष्ट्याध्यायकस्य तदेतस्य तन्त्रागम वाङ्मयस्य प्रादुर्भाव ईशवीयाष्टमशताब्दीः प्राग् नैवाजायतेति प्रतिपाद्यते। ६०८ ईशवीयवत्सराङ्किेते दधिमती शिलालेखे देवीं दधिमतीं विज्ञापयति इत्यनन्तरं "सर्वमङ्गलमाङ्गल्ये"[७५] इत्यादिको दुर्गासप्तशतीश्लोकः समुट्टङ्क्यते आमर्दकतपोवनविनिर्गत सदाशिवाचार्यो ललाटदेशकृत वसति रिति च सप्तशतकीयेशवीय शिलालेखे वर्ण्यते। षष्ठाशताब्दीभवेन महाकविना सुबन्धुना समदृश्यत "इत्येवं बौद्धानां देवीभगवती तारास्मर्यते। धर्मकीर्तेर्दीक्षाविषयकं मतं क्षेमराजेन समालोच्यते।

शङ्करभगवत्पाद-कुमारिलभट्टपाद-बाणभट्टप्रभृतिभिः पाञ्चरात्रसिद्धान्तः समालोच्यते सूच्यते वा। वेदान्तसूत्रेषु च पाशुपतं पाञ्चरात्रं च मतं पूर्वपक्षीक्रियते। उदयपुरनगरस्थे पुरातत्त्वसंग्रहालये संरक्षितस्य ४९० ईस्वी वर्षे समुत्कीर्णस्य पूर्वमुदयपुरमण्डलान्तर्गते "छोटी सादड़ी" स्थानसमीपवर्तिनि गिरौ भ्रमराम्बा (भंवरमाता) मन्दिरस्य गर्भगृहे स्थापितस्य शिलाशासनस्य वर्तते यमाद्यः श्लोकः—

देवी जयत्यसुरदारणतीक्ष्णशूला,
प्राद्‌गीर्णरत्नमुकुटां शुचल प्रवाहा ।
सिंहोग्रयुक्तरथमास्थित चण्डवेगा,
भ्रूभङ्गदृष्टि विनिपातनिषिष्टदोषाः ।। इति

जारश्मशानसमुद्‌भवभूतिसुखस्पर्शस्वेदशिलाङ्ग्याः ।
न समाप्यते नवकपालिक्या उद्धूलनारम्भः ।।[७६] इति

इति गाथा सप्तशतीपद्ये नवकपालिकी उद्धूलनोन्मुखी वर्णिता। उद्धूलनविधिलकुलीशपाशुपतसूत्रेषु वर्ण्यते। शैवागमेषु श्रीकण्ठो लकुलीशश्च इत्याप्तद्वयं तन्त्रालोके निदर्श्यते। लाकुलाः मौसुलाः, कारुकाः, वैशला इति चतुर्विधा पाशुपताः। लकुलीश शिष्येण मुसुलेन्द्रेण हृदयप्रमाणाख्यो ग्रन्थोरचित इति चात्रैव मूलेटिप्पण्यां च निदर्शितम्। तेनास्य शास्त्रस्य प्राचीनताविषये न भ्रमितव्यम् विद्वद्भिरिति दिक्।

सन्दर्भ

१. अजितागमे १।११५
२. वाचस्पत्यं कोशे
३. सांख्यकारिकायाम् का०सं० ७२
४. वृहत्संहिता १।९
५. तन्त्रालोके (३५।२६।२७)
६. कुलार्णवतन्त्रे
७. सरस्वतीसुषमायां २० वर्षे ९ अंके ९ पृष्ठे।
८. कुलार्णवतन्त्रे
९. निर्वाणतन्त्रे
१०. लिङ्गपुराणे २ भागे ४ अध्याये २० श्लोकः।
११. बौधायनगृह्यसूत्रे ३।३।३
१२. वही, ३।३।९
१३. वाल्मीकिरामायणे बालकाण्डे ३६ सर्गे ८.९.१० श्लोकाः (गीताप्रेस, गोरखपुर द्वितीयसंस्करण)।
१४. वा०रा०बालकाण्डे ४५ सर्गे २१-२२ श्लोके।
१५. वही ५५ सर्गे १२ श्लोके
१६. वही, ४ सर्गे २७२ श्लोकाः।
१७. वही १३ सर्गे २३ श्लोकाः।
१८. वा०रा०बो०का० कार्तिकेयजन्मप्रसंगे ३६ सर्गे ६ श्लोकः।
१९. वा०रा०बा० काण्डे ३६ सर्गे २६ श्लोकः।
२०. महाभारतेद्रौणपर्वणि ७४ अध्याये ५२, ५३, ५४, ५६, ५७, ६०, ६१, ६२ श्लोकाः।
२१. महाभारत वनपर्व० ८५ अध्याये २५ श्लोकार्थे।
२२. म०भा०वर्णपर्व० २५ अध्याये २४-२६ श्लोकाः।
२३. अग्निपुराणे ३ अध्याये ८-९ श्लोकार्धा।
२४. लिङ्गपुराणे ४५ अध्याये ३४-३५ श्लोकः।
२५. बुद्धचरिते १ सर्गे ८८ श्लोकः।
२६. वही, १० सर्गे ३ श्लोकः।
२७. रघुवंशमहाकाव्यं १ सर्गे १ श्लोकः।
२८. विक्रमोर्वशीये १ अयाये १ श्लोकः।

२९. अभिज्ञानशाकुन्तले १ अंके १ श्लोकः।
३०. पूर्वमेघदूते ३४-३५ श्लोकौ।
३१. नाट्यशास्त्रे १ अध्याये ४५ श्लोकः।
३२. वही १ अध्याये ६१ श्लोकः।
३३. ऋग्वेदे मण्डले १ सूक्ते ११४ मन्त्रः ११
३४. वही २ सूक्ते ३३ मन्त्रः १५
३५. वही, ७ सूक्ते ४६ मन्त्रः ४
३६. वही, १ सूक्ते ४३ मन्त्रः ६
३७. वही, ६ सूक्ते ७४ मन्त्रः ४
३८. वही, २ सूक्ते १ मन्त्रः ६
३९. वही, ५ सूक्ते २ मन्त्रः ५
४०. वही, ५ सूक्ते ४२ मन्त्रः ११
४१. वही, ५ सूक्ते ५१ मन्त्रः १३
४२. वही, ५ सूक्ते ७० मन्त्रः ३
४३. वही, ५ सूक्ते ४९ मन्त्रः १०
४४. वही, १६९ सूक्ते १ मन्त्रः
४५. वाजसनेयिसंहितायाम् ३९ अध्याये ९ मन्त्राः।
४६. बेबर - इष्टीश पूट्डीन, २, १९-२२
४७. भण्डारकर - वैष्णाविज्म, शैविज्म।
४८. मैकडोनल=वैदिकमाइथोलॉजी, पृ. ७८
४९. म्यूर=४ ओरिजनल संस्कृत टेक्स्ट्स-४, पृ. १४७
५०. विल्सन= ऋग्वेद, संस्कृत टेक्स्ट्स-४, पृ. १४७
५१. चोहिन्द शिलालेख ४०० खीष्टाब्द शतके।
५२. भद्रवर्मणः शिलालेखः (माइसोन) पञ्चमखीष्टाब्दशतकमस्य।
५३. शम्भुवर्मणः माइसोनशिलालेखः षष्ठखीष्टाब्दशतकमस्य।
५४. प्रकाशवर्मणः माइसोनशिलालेख षष्ठखीष्टाब्दशतकमस्य।
५५. शांखायन श्रौत्रसूत्रे शूलगवहोमे ४-१९
५६. वही, ४-१९
५७. वही, ३-१७, २०-११
५८. लाटायन, श्रौत्रसूत्रे ५।३।२
५९. आश्वलायनश्रौत्रसूत्रे ३।११।१

६०. बौधायन धर्मसूत्रे २।५।६, २।५।७
६१. आश्वलायन गृह्यसूत्र २।२।१।२
६२. मानवगृह्यसूत्रे १।१३।९।१५
६३. अन्नपूर्णास्तोत्रम् श्लोक सं० १६
६४. पराप्रावेशिकायां पृ. ११
६५. अजितागमे १।११५
६६. वायवीय संहिता
६७. वाक्यपदीय ब्रह्मकाण्ड का०सं० १२३
६८. विश्वरूपाचार्य विरचितायां याज्ञवल्क्यस्मृतेर्बालक्रीडाटीकायाम्।
६९. कुलार्णवतन्त्रे।
७०. अजितागमे १।११५
७१. तन्त्रालोके ३५।१-५
७२. वही, ३५।२६-२७
७३. स्वच्छन्दतन्त्रे पृ० ८९
७४. वही, पृ० ९६
७५. दुर्गासप्तशती ११।१०
७६. गाथा शप्तशती ४।८-९

चतुर्थो अध्याय

अथ शिवलिङ्गविषयक विचाराः

प्रथमस्तावद् जिज्ञासा जागर्ति यत् सर्वेषां देवानां, देवीनाञ्चोपासना पूजनादिकं मूर्ति प्रतिमा रूपेण भवति, यथा शास्त्रवर्णितेषु तत्तद् देवालयेषु तत्तद् देवानां देवीनाञ्च प्रतिमा स्थापिताः संजाताः, किन्तु कथं शिवः लिङ्गरूपेण पूज्यते ? किमिदं लिङ्गम् ? यस्य चर्चा, शिवपुराणे लिंगपुराणे ब्रह्मपुराणे, अग्निपुराणादिषु सुस्पष्टतया विवेचिताः वर्तन्ते ? अस्तु—

लिङ्गनाम् प्राणिनामसाधारणधर्मः। प्रायः सर्वत्र पुराणेषु वेदाङ्गेषु, शास्त्रेषु, देशेषु, साहित्येषु, प्राणिषु च लिङ्गस्य स्वाभाविकी धर्ममर्यादा समुपतिष्ठते। व्याकरण, सांख्ये, धर्मशास्त्रे चास्मिन् विषये वैशिष्ट्येन विचाराः प्रचारिता विद्यन्ते। उक्तञ्च शब्देन्दुशेखरे भट्टनागेशेन कोशवाक्यम्—"स्तनकेशवती स्त्रीः स्यालोमश पुरुषस्मृतः" अत्र स्तन, केश, लोम प्रभृतयो शब्दाः पारिभाषिका मन्यन्ते।

भगवान् पाणिनिरपि कथयति—"लीनं अर्थं गयतीतिलिङ्गम्" तत्तु त्रिविधम्। स्त्री-पुं-नपुंसकञ्चेति। मन्यते तु लिङ्गमित्यस्य प्रतीकमित्यर्थः। लिङ्गएव प्रतीकभूतस्य साक्षाच्छि-वस्यप्रतिमेति। "सामान्ये नपुंसकम्" इति वचनेन स्त्रीपुंसयोः वैशिष्ट्याभावे सामान्यस्थितिर्भवति, तस्यैव निरूपणं व्याकरणे शास्त्रे लिङ्गवैशिष्ट्येन क्रियते। यथा—तटः, तटी, तटम् इति।

लिङ्गनिर्वचनमावश्यकमिति विज्ञायैव भगवान् पाणिनिः "लिङ्गानुशासनप्रकरणम्" विरचितवान्। अतः शब्दराशौ केचन् शब्दाः नियतलिङ्गाः केचन्परिवर्तनशीलाश्च भवन्ति।

शिवस्य लिङ्गपूजा स्वस्मिन्नतीव महत्वं बिभर्ति। एतदर्थमेव स्यातन्त्रयेण "लिङ्ग-पुराणस्य" रचना समजनि। शिवपुराणे अपि लिङ्गपूजा बहुशः प्रकाशिता। इदमतीव विचित्रं तथ्यं यत् अन्येदेवाः मूर्ति रूपेण पूज्यन्ते, परं भगवांच्छिवः प्रायः लिङ्गरूपेण पूज्यते इति। यत्र-तत्र ज्योतिलिङ्गानि तत्र-तत्र लिङ्गपूजैव समादृता दृश्यते। अर्ध्याकारे मण्डले लिङ्गस्थाप-नेनेदं सिद्धयति यत् प्रकृति-पुरुष-स्त्री-पुरुष, शक्ति-शिवमूलको यं जीवलोकः। यतश्चार्ध्या-शक्तिरूपकं लिङ्गश्च शिवरूपकमस्ति। तयोः सामरस्यादेव शब्दार्थ सामर्थ्यादर्थ निष्पतिवत् सृष्टिसमारम्भो जायते। अर्थ लिङ्गयोगादेवसृष्टिः, उत्तराभिमुखाध्यस्य सन्निवेशात् सृष्टेः उत्तरोत्तरं तुष्टिः पुष्टिः परिकल्प्यते। लिङ्गस्य विश्वाण्डाकारस्य समम् रूद्रो अपि तदाकार एव इति कल्पनीयम्। तस्यार्चनेन समग्रसृष्टेः अर्चनं भवतीति सुतरां सिद्धयति।

महाभारते शिवमूर्तीनां लिङ्गानाञ्चोपासनापद्धतेः संकेतोप्राप्यते। अनुशासनपर्वणिं क्रमशो १६।२२।८५।९०।९७।१५२ प्रभृतिषु अध्यायेषु शिवमूर्तीनां सामान्येन, लिङ्गानाञ्च वैशिष्ट्येन उपासनापद्धतिः प्रचलिता प्रदर्शिता च।

एवं हि द्रोण-पर्वणि २२ अध्याये अपि लिङ्गार्चनं निरूपितं वर्तते। अतः कुत्रचित् मूर्तीनां सर्वत्र शिवलिङ्गार्चनमेव भवति स्म। अत्र शङ्कालेशो नास्ति।

अति प्राचीनकाले भारते लिङ्गपूजैव प्रचलिता सीदिति। लिङ्गार्चनेनैव शिवस्य पुंस्त्वं वैशिष्ट्यात् अन्येभ्यो देवेभ्यो विशिष्ट तमं महत्वं वरीवर्ति। एवं हि वेदे सुस्पष्टरूपेण लिङ्गार्चनस्य उपदेशाभावे अपि वैदिकमन्त्रभाव कल्पनाधारेण परवर्तिकालेरूद्रोपासनायाः प्रमुखाधारः लिङ्गपूजैव समपद्यत इति तत्र तत्र ग्रन्थालो नेनावगम्यते।

समये-समये उत्खननेन प्राप्ता शिलालेखेन महाकाव्यानुरोधेन च एतद् ज्ञायते यद् पश्चिम एशियामहाद्वीपस्य प्राचीन मिश्रदेशे, पूर्वएशियामहाद्वीपस्य जापान देशे च सर्वत्रैव लिङ्गपूजाप्रचलितिस्म। प्राचीन सभ्यतायाः "बेवीलीन असीरियन" जनाः प्रायशः लिङ्गोपासनां कुर्वन्ति स्म, इति सर्वे ऐतिह्याविदः प्रायः जानन्त्येव। सिन्धुघाटी स्थानस्य "मोहनजोदरो हरप्पा" इत्याख्यस्य उत्खनने प्राप्तेन शिवलिङ्गेन इदं ज्ञायते यत् अद्यावधि सार्द्धद्विसहस्त्र-वर्ष पूर्वं लिङ्गरूपेण शिवार्चनं भवतिस्म भारते। अत एव बहोः कालादेव प्राचीन एशिया-द्वीपतः प्रारभ्य पूर्वएशिया महाद्वीपं यावत् समग्रं उत्तर-दक्षिण भारतं वरीवर्ति।

शिवलिङ्गोपासना शक्तिस्सार्द्धमेव प्रचलिता सीत्। अस्य शिवलिङ्गार्चनस्य वैदिक-रूद्रार्चनेन तादात्म्य सम्बन्धो पि प्राक्तन कालतः आसीदिति निर्विवादम्। वैदिक रूद्रस्वरूपस्य निर्गुणस्वयप कल्पनया शिवलिङ्गम् सम्भूतमिति बहुविचारितेन च प्रातिभाति।

लिङ्गरूपेण पूजितो अपि शिवः सर्वेषां हिताय, इष्ट प्रदानाय भवति। किं बहुना देवादीनामपि अभीष्ट प्रदायकम्। उक्तञ्च श्री गोस्वामिना तुलसीदासेन—

लिङ्गथापि विधिवत करि पूजा ।
सिव समान प्रियमोहि न दूजा ।।[1]

अपि च कीदृशंलिङ्गमभीष्टमित्युद्दिश्य उक्तञ्चाग्निपुराणे—

वख्याम्यन्यप्रकारेण लिङ्गमानादिकं श्रृणु ।
वख्ये लक्षणजं लिङ्गं धृतजं बुद्धिवर्द्धनम् ।।
भूतये वस्त्रलिङ्गन्तु लिङ्गन्तात्कालिकं विदुः ।
पक्वा-पक्व मृणमयं स्यादपक्वात्पक्वजं वरम् ।।
ततो दारुभयं पुण्यं दारुजाच्छैलजंवरम् ।
शैलाद् वरम् तु मुक्ताजं ततौ लौह सुवर्णजम् ।।
पूज्यो हरस्तु सर्वत्र लिङ्गं पूर्णार्चनं भवेत् ।।[2] इति

शिवपुराणे अपि "शिवलिङ्गपूजनदान-प्रकाराः "विषयेस्मिन् विविधविध विचारपूर्वकं नैमिषारण्य तीर्थे परमभागवत श्रीसूतंप्रति कीदृशं लिङ्गं ? कथं तस्य प्रतिष्ठापनम्, किं तस्य लक्षणम् केनप्रकारेण तत्पूजनम्, देशकालानुरोधेन कथं तत्समभ्यर्चनम् इति ऋषयो प्रोचुः।

प्रश्नोत्तरे अस्मिन् ऋषीन् प्रतोष्य-सूत उवाच—

युष्मदर्थं प्रवक्ष्यामि बुद्ध्यतामव धानतः ।
अनुकूले शुभेकाले पुण्ये तीर्थे तटे तथा ।।
यथेष्टं लिंगमारोप्य यत्र स्यान्नित्यमर्चनम् ।
पार्थिवेन तथाप्येनं तैजसेन यथारुचिः ।।
कला लक्षणसंयुक्तं लिङ्गं पूजाफलं भवेत् ।
सर्वलक्षण संयुक्तं सद्यः पूजा फल प्रदम् ।।
चरे विशिष्यते सूक्ष्मं स्थावरे स्थूलमेव हि ।
सलक्षणं सपीठं च स्थापयेच्छिवनिर्मितम् ।।
मण्डलं चतुरस्रं वा त्रिकोणमथवा तथा ।
खट्वांगवन्मध्यसूक्ष्मं लिङ्गं पीठं महाफलम् ।।
प्रथमं मृच्छिलादिभ्यो लिङ्गं लोहादिभिः कृतम् ।
येनलिङ्गं तेन पीठं स्थावरे हि विशिष्यते ।।
लिङ्गं पीठं चरे त्वेकं लिङ्गं बाणकृतम् विना ।
लिङ्गप्रमाण कर्तृणां द्वादशाङ्गुलमुत्तमम् ।।[३] इति

तथा च तत्रैव—

पुरुषाणां च नारीणामधिकारो त्र निश्चितम् ।
नद्यां तडागे कूपे वा जलान्तर्मृदमाहरेत ।।
संशोध्य गन्ध चूर्णेन ऐषयित्वा सुमण्डपे ।
हस्तेन प्रतिमां कुर्यात् क्षीरेण च सुसंस्कृतम् ।।
अंगप्रत्यं गकोपेतामायुधैश्च समन्विताम् ।
पद्मासान स्थितां कृत्वा पूजयेदादरेण हि ।।
विघ्नेशादित्य विष्णुनां अम्बायाश्च शिवस्य च ।
शिवस्य शिवलिंगं सर्वदापूजयेद् द्विजः ।।[४] इति

पुनश्च-बन्धमोक्षस्वरूपं शिवलिंगमाहात्म्य च वर्णयति—

प्रकृत्याद्यष्ट बन्धेन वद्धो जीवः स उच्यते ।
प्रकृत्याद्यष्ट बन्धेन निर्मुक्तो मुक्त उच्यते ।।
प्रकृत्यादिवशीकारो मोक्ष इत्युच्यते स्वतः ।
बद्ध जीवस्तु निर्मुक्तो मुक्त जीवः स कथ्यते ।।[५] इति
अतः शिवप्रसादेन प्रकृत्यादिवशं भवेत् ।
शिव प्रसादलाभार्थं शिवमेव प्रपूजयेत् ।।

लिंगे वेरे भक्त जने शिवमुद्दिश्यपूजयेत् ।
कायेन मनसावाचा धनेनापि प्रपूजयेत् ।।[६] इति
शिवपुराणे तु एकस्थले पञ्चविधलिङ्गनामुल्लेखो जातः। तद्यथा—

स्वयं भू लिंगं प्रथमं विन्दुलिंगं द्वितीयकम्। इत्यादिना। तत्रैव शिवलिंग महिमा विषये ऋषीणां प्रश्नोत्तरे श्रीसूतस्योक्तिः। यथा—

शृणुध्वमृषयः सर्वेसद्भवत्त्यादरतो खिलाः ।
शिवपार्थिव लिंगस्य महिमा प्रोच्यते मया ।।
कृते रत्नमयं लिङ्गं त्रेतायां तेन सम्भवम् ।
द्वापरे पारदं श्रेष्ठं पार्थिवं तु कलौ युगे ।।
यथा सर्वेषु देवेषु ज्येष्ठः श्रेष्ठो महेश्वरः ।
एवं सर्वेषुलिङ्गेषु पार्थिवं श्रेष्ठमुच्यते ।।
यथा नदीषु सर्वासु ज्येष्ठा श्रेष्ठा सुरापगा ।
तथा सर्वेषु लिङ्गेषु पार्थिवं श्रेष्ठमुच्यते ।।
यथा सर्वेषु मन्त्रेषु प्रणवो हि महान्स्मृतः ।
तथा सर्वेषु लिङ्गेषु पार्थिवं श्रेष्ठ मुच्यते ।।
यथा सर्वेषु वर्णेषु ब्राह्मणः श्रेष्ठ उच्यते ।
तथा सर्वेषु लिङ्गेषु पार्थिवं श्रेष्ठ मुच्यते ।।
यथा पुरीषु सर्वासु काशीश्रेष्ठतमा स्मृता ।
तथा सर्वेषु लिङ्गेषु पार्थिवं श्रेष्ठ मुच्यते ।।
यथा व्रतेषु सर्वेषु शिवरात्रिव्रतं परम् ।
तथा सर्वेषु लिङ्गेषु पार्थिवं श्रेष्ठमुच्यते ।।
यथा देवीषु सर्वासु शैवीशक्तिः परास्मृताः ।
तथा सर्वेषु लिङ्गेषु पार्थिवं श्रेष्ठमुच्यते ।।
पार्थिवाराधनं पुण्यं धन्यमायुर्विवर्धनम् ।
तुष्टि दं पुष्टिदं श्रीदं कार्यं साधकसत्तमैः ।।
यथा लब्ध्योपचारैश्च भक्तिश्रद्धासमन्वितः ।
पूजयेत् पार्थिवलिंगं सर्वकामार्थ सिद्धिदम् ।।[७] इति।

कामाना नुरोधेन विधानतः शिवलिंगानां संख्याभिधान कथने ऋषीणां प्रश्नोत्तरे स्तृस्योक्तिर्यथा—

शृणुध्वमृषयः सर्वे पार्थिवार्चा विधानकम् ।
यस्यानुष्ठान मात्रेण कृतकृत्यो भवेन्नरः ।।

अकृत्वापार्थिवं लिङ्गं यो न्यदेवं प्रपूजयेत् ।
वृथा भवति सा पूजा दमदानादिकं वृथा ।।
संख्या पार्थिवलिङ्गाना यथाकामं निगद्यते ।
संख्या सद्यो मुनिश्रेष्ठ निश्चयेन फलप्रदा ।।
प्रथमावाहनं तत्र प्रतिष्ठा पूजनं पृथक् ।
लिङ्गाकारं समं तत्र सर्वं ज्ञेयं पृथक्पृथक् ।।
विद्यार्थी पुरुषः प्रीत्या सहस्रमितपार्थिवम् ।
पुत्रार्थी सार्द्धसाहस्रं वस्त्रार्थी शतपञ्चकम् ।।
नरः पार्थिवलिङ्गानांधनार्थी च तदर्द्धकम् ।
पूजयेत् शिवलिङ्ग हि निश्चयात्तत्फलप्रदम् ।।
मोक्षार्थी कोटि गुणितं भूकामश्च सहस्रकम् ।
दयार्थी च त्रिसाहस्रं तीर्थार्थी द्विसहस्रकम् ।।
सुहृत्कामी त्रि साहस्रं वश्यार्थी शतमष्टकम् ।
मरणार्थी शतशतं मोहनार्थी शताष्टकम् ।।
उच्चाटन परश्चैव सहस्रं च तथोक्ततः ।
स्तम्भनार्थी सहस्रं तु द्वेषणार्थी तदर्द्धकम् ।।
निगडान्मुक्ति कामस्तु सहस्रं सार्द्धमुत्तमम् ।
महाराज भये पञ्चशतं ज्ञेयं विचक्षणेः ।।
चौरादि संकटे ज्ञेयं पार्थिवानां शतद्वयम् ।
डाकिन्यादिभये पंच शतमुक्तं च पार्थिवम् ।।
दारिद्रेय पंच साहस्रं अपुतं सर्वकामदम् ।
अथ नित्यविधिं वक्ष्ये श्रृणुध्वमुनिसत्तमाः ।।
विना लिंगार्चनं यस्य कालो गच्छति नित्यशः ।
महाहानिर्भवेत्तस्य दुर्वृत्तस्य दुरात्मनः ।।[८] इति

प्रणव विषयक विचारा :

अथेदानीं प्रणव विषयमधिकृत्य किञ्चिद् विविच्यते। यथा "स्वाध्यायो ध्येतव्य इत्यनुसारं भारतीयस्य अध्ययनस्य क्रमोवेदत एवारभ्यते। धर्मशास्त्रेषु वेदं विहाय केवलमन्यस्य साहित्यस्याध्ययनेन मानवोवेदविदित कर्मणो धिकारी नाभिमतो स्ति। वेदाध्ययनेन दैवबल-विकासपूर्वकं समग्रज्ञान-विज्ञानयोः खमता पात्रता च सम्पद्यते। अतो भारतीया शिक्षणप्रणाली वेदत एवारभ्यते। वेदार्थ ज्ञानाय चातिगम्भीरतया षडङ्गानां ज्ञानं अतीव आवश्यकम् वेदार्थो-पवृंहणार्थं स्मृति पुराणानुशीलनञ्चेनितान्तं मुपकारकमिति। कोषादौ द्वौ "ॐकार प्रणव

समौ''[९] पुराणेषु एकाक्षरो विनाशी ॐकार रूप: प्रणवो ब्रह्मवाचक: प्रतिपादितो स्ति, तथा ब्रह्म वृहद् व्यापकञ्चभिमतमस्ति।

शिवपुराणे पि प्रणवमन्त्र माहात्म्य विषये परमभागवत् सूतस्य उक्ति:। यथा—

प्रो हि प्रकृति जातस्य संसारस्य महोदधे: ।
नवं नवांवरमिति प्रणवं वैविदुर्बुधा: ।।
प्र: प्रपं न नास्ति वो युष्माकं प्रणवं विदु: ।
प्रकर्षेण नमेद्यस्मान्मोक्षं व: प्रणवं विदु: ।।
नूतनं वै करोतीति प्रणवं तं विदुर्बुध: ।
प्रणवं द्विविधं प्राक्तं स्थूलसूक्ष्म विभेदत: ।।
सूक्ष्ममेकाक्षरं विद्यात् स्थूलं पञ्चाक्षरं विदु: ।
सूक्ष्ममव्यक्तपंचार्णं सुव्यक्तार्णं तये तरत् ।।[१०]

पौराणिक मान्यतानुसारं समस्ता त्रिलोकी ॐ कारात्मके प्रणव स्वरूपिणि ब्रह्मण्येव स्थिता स्ति। प्रणवात्मकं ब्रह्मैव जगदुत्पत्ति-स्थिति-प्रलयकारणं विद्यते। शब्दशास्त्रानुसारं त्रयाणामकारोकारगकाराणामक्षराणां योगेन ॐ शब्दो निष्पद्यते। शिवपुराणे पि एतादृशमेव विवेचनम् विवेचिता वर्तते। यथा—

अकारश्च उकारश्च मकारश्च ततः परम् ।
विन्दुनाद युतं तद्धि शब्द काल कलान्वितम् ।।[११]

ॐ कारो जाग्रत-स्वप्न-सुबुसिधर्मयुक्त: साक्षात् ब्रह्मणोभिन्न रूपम् भिमतम् विद्यते, तथा स सर्ववेदाधिपतिरूद्घोषितोस्ति। विष्णुपुराणानुसारं वेदादीनां प्रकृतिभूतं ओमित्येवं रूपं व्यवस्थितमेकमक्षरं ब्रह्मेत्यभिधीयते। भूर्भुव: स्वरिति व्याहति भयं प्रणवावस्थितमीर्यते। .एवं प्रणवात्मकाद् ब्रह्मणोभिन्नस्य वस्तुनो भावात् ॐ कारे सर्वं प्रतिष्ठितम्। यथा—

ध्रुवमेकाक्षरं ब्रह्म ओमित्येवं व्यवस्थितम् ।
प्रणवावस्थितं नित्यं भूर्भुव: स्वरितीर्यते ।।[१२]

सूर्यो हि विष्णोरति श्रेष्ठो शो स्ति तथा विकाररहितो न्तज्योंतिस्वरूप: ॐ कार: तस्य वाचको निर्दिष्टो वर्तते तदुच्चारणेन मन्देहानामराक्षसा विनश्यति। उक्तञ्च—

ॐ कारो भगवान विष्णु स्त्रिधामा वचसां पति: ।
तदुच्चारणतस्ते तु विनाशं यान्ति राक्षसा: ।।
वैष्णों श: परसूर्यो यो न्तज्योंतिरसंलवम् ।
अभिधायक ॐ कार तस्य तत्प्रेरक: पर: ।।[१३]

शिवपुराणेष्वपि—

एकाक्षरान्मकाराख्यद् भगवान् नील लोहित: ।
सर्गकर्तात्त्वकाराख्यो ह्युकाराख्यास्तु मोहक: ।।

ॐ कार प्रभवं मन्त्रं कलापंचक संयुतम् ।
शुद्धस्फटिक संकाशं शुभाष्टत्रिंशदक्षरम् ।।[१४] इति

शाब्दिक निष्पत्ति विचारेण ॐ शब्दे येषां त्रयाणां अकार, उकार, मकाराणां योगो विद्यते, तत्र प्रत्येकं सृष्टिकर्त ब्रह्मणः पालको विष्णुः, संहार कर्तुः शिवस्य च वाचको वर्तते। अतः ॐ कारः सर्वशक्तिमतः पूर्णस्य परमेश्वरस्य स्वयपमस्ति।

शिवपुराणे पि प्रणवो सर्वार्थसाधकः इत्यस्य सार्थकता दृश्यते। यथा—

यदस्ति वस्तु तत्सर्वं गुणप्राध्यान्य योगतः ।
समस्तं व्यस्तमपि च प्रणवार्थं प्रचक्षते ।।
सर्वार्थ साधकं तस्मादेकं ब्रह्मैतदक्षरम् ।
तेनोमिति जगत् कृत्स्नं कुरुते प्रथमं शिवः ।।
अतस्तदेव जानीयात् प्रणवं सर्वकारणम् ।
निर्विकारं मुमुक्षुमां निर्गुणं परमेश्वरम् ।।[१५] इति

श्रीमद्भगवद्गीतायां अपि भगवता श्रीकृष्णेन सच्चिदानन्द घनस्य ब्रह्मणः त्रिप्रकारको नाम निर्देशः कृतो स्ति। यथा—ॐ तत्, सत् इति। अनेन नाम त्रयेणैव सृष्टेरादिकाले ब्राह्मण-वेद-यज्ञादीनां रचना जाता। एषु त्रिषु नामसु प्रणवस्यैव मान्यता दत्ता स्ति। यथा—

ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधस्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ।।[१६]

उक्तञ्च शिवपुराणे—

अकारश्चाप्युकारो यं मकारश्च त्रयं क्रमात् ।
तिस्रो मात्रा समाख्याता अर्थमात्रा ततः परम् ।।
अर्धमात्रा महेशानी विन्दुनाद स्वरूपिणी ।
वर्णनीया न वै चाद्वा ज्ञेया ज्ञानिभिरेव सा ।।[१७]

ॐकारस्य महत्वप्रतिपादने उपनिषदां समुद्घोषो विद्यते, यत् सर्वे वेदायस्य पदस्य वर्णनं कुर्वन्ति, समस्तं तपश्चरणम् यत् प्राप्ति साधनं वर्तते, तथा यत्संकल्पने मुमुक्षवो ब्रह्मचर्यस्य पालनं कुर्वन्ति संक्षिप्तरूपं ॐ इति तत्पदमस्ति। अत एवेदपक्षरं प्रणवमेव ज्ञात्वा यः साधको यत् पदमिच्छति तदेव स प्राप्नोति। इदं श्रेष्ठमालम्बनमस्ति। एतदेव ज्ञात्वा साधको ब्रह्मलोके महिम समन्वितो भवति।[१८] अपि च—

एनमेव हि देवेशि सर्वमन्त्र शिरोमणिम् ।
काश्यामहं प्रदास्यामि जीवानां मुक्तिहेतवे ।।
ब्रह्मादिस्थावरान्तानां सर्वेषां प्राणिनां खलु ।
प्राणः प्रणव एवायं तस्मात् प्रणव ईरितः ।।[१९] इति

प्रणवस्य महिम्नो वर्णनप्रसङ्गे योगेश्वरस्य भगवतः श्रीकृष्णस्य घोषणा स्ति यत् सर्वाणीन्द्रिय द्वाराणि संयम्य मनो हृद्देशे निरूध्यात्मनः प्राणं च स्वमूर्ध्नि संसाप्य परमात्म-सम्बन्धिन्यां योगधरणायां स्थिरी भूय यः पुरुषः ॐ इत्येकारं ब्रह्मोच्चारयति, तथा तदर्थं स्वरूपम् निर्गुणं ब्रह्म चिन्तयन् शरीरं त्यजति स परमां गतिं (मोक्षम्) लभते। उक्तञ्च—

ॐ मित्येकाक्षरं ब्रह्म व्याहृतं मामनुस्मरन् ।
यः प्रयाति त्यजन् देहं स याति हरिमन्दिरम् ।।[२०]

प्रणवस्य ऋषि, देवता, छन्द विषये शिवपुराणे प्रमाणं प्रमाणिता विद्यते। यथा—

प्रणवस्य ऋषिर्ब्रह्मा देवि गायत्रीमीरितम् ।
छन्दो त्र देवता हं वै परमात्मा सदाशिवः ।।
अकारो बीजमाख्यातमुकारः शक्तिरूच्यते ।
मकारः कीलकं प्रोक्तं मोक्षार्थे विनियुज्यते ।।[२१] इति

उपनिषदि ॐ इदं पदम् परमात्मनो सन्निहितं नाम मतं विद्यते। नामोच्चारणे स तथैव प्रसीदति यथा संसारिणः स्वप्रिय नाम ग्रहणेन प्रसन्न भवन्ति।[२२]

श्रीस्वामिशंकराचार्येणापि ब्रह्मो र्थं निर्दिशता प्रोक्तं यत् प्रणव द्वारा मन इन्द्रियाणि च संयम्य प्रणव ब्रह्मरूपया नौकया विद्वान भयंकरजलप्रवाहस्य पारम् गच्छति।

उपनिषददीदमपि प्रतिपादितमस्ति यत् ॐ काराद् भिन्नं किमपि तत्त्वं नास्ति— "ॐ कार एतदक्षरमेव सर्वमस्ति। भूतं, भविश्यं, वर्तमानं च तस्यैव व्याख्यानम् विद्यते, अत इदं सर्व मोंकार एव। एतदतिरिक्तं यत् किमपि त्रिकालातीतं वस्तु वर्तते तदपि ॐ कार एव। ॐ मिति ब्रह्म ओमिति इदं सर्वम्।[२३]

अपि च—

ॐ मितीदं सर्वमिति श्रुतिराह सनातनी ।
ओमिति ब्रह्म सर्व हि ब्रह्मेति सम ब्रवीत् ।।[२४]

पुराणानां कथनमस्ति यत् स्वायम्भुवेन मनुना प्रणव सहितस्य भगवन्नाम्नो जप प्रभावेण त्रैलोक्यदुर्लभा मनोवांछिता सिद्धिः प्राप्ता सीत्। तथा सप्तर्षीणामुपदेशेन औतानपादिना ध्रुवेणैतन्मन्त्रप्रभावेण त्रैलोक्यां सर्वोत्कृष्टमक्षयमुच्चतमं पदं प्राप्तम्। भगवता पतञ्जलिना पि प्रणवं (ॐ कारम्) ईश्वरवाचकमुद्घोष्य कथितं, यत् साधकाययोगिने तस्य प्रणवस्य जपः, तदर्थस्वरूप परमेश्वरस्य चिन्तनं च परमं श्रेयस्करं विद्यते, यतोहि प्रणवजपेन विघ्नानामभावः आत्मस्वरूपस्य च ज्ञानं जायते। प्रणवः एव सम्पूर्णे वेदे श्रेष्ठो भिमतो स्ति।

ॐ वेदानां सांकेतिक रूपं प्रतीकं वा विद्यते। तथा क्षयज्ञानस्य पुराणसाहित्यस्य च मूलं श्रोतो स्ति। अत्र-अ+ॐ+म् इत्येषां त्रयाणामक्षराणां योगो स्ति। तत्र अ परमेश्वरस्यास्ति वाचकः। म् वैयक्तिकस्य जीवात्मनः, तथा मध्यस्थ उकारः शक्त्याः लक्ष्म्याः, मातुर्वा

वाचको स्ति। अतो मध्यस्थो यमुकारो जीवात्म-परमात्मनो: संयोजको स्ति। श्रुत्या आत्मोपलब्धौ प्रणवं कारणरूपेण विवृण्वत्या प्रोक्तं यत् यथा अरणेर्मन्थनात् पूर्वम् अरणो स्थितस्याग्ने-र्ग्रहणं दर्शनं वा न भवति, किन्तु मन्थने कृते सति स दृष्टिगोचरो जायते। तथैवाग्निस्थानीय आत्मा उत्तरारणिस्थानीय प्रणवद्वारा मननादिभिः अधरारणिस्थानीये देहे ग्रहीतुं शक्यः। तद्यथा—

बह्नेर्यथा योगिनस्तस्य मूर्तिर्निदृश्यते नैव च लिङ्गनाशः ।
स भूय एवेन्धनयोनिगृह्यस्तद्वोभये वै प्रणवेन देहे ।।[२५] इति

एवमिदं दृश्यमानं प्रपञ्चजातमनन्तस्य गर्भे विलीनमासीत्। ग्रह नक्षत्रतारादीनां पाञ्चभौतिकानां पदार्थानां कुत्रापि सत्ता नासीत्। दीर्घकालानन्तरं प्रलयावसाने ब्रह्मणे "एको हं बहुस्याम इति भावनासमुद्भुता। परिणामस्वरूपे च तस्य नाभिकमले ब्रह्मण: प्रादुर्भावो जातः। तस्य मुखात् प्रथममोंकार एवाविर्भूतः। अतः शास्त्रेषु ॐकार मङ्गलवाचकं, ज्ञानागारं, वेदबीजं ब्रह्मस्वरूपं माङ्गलिकं च मन्यते। यथा—

ॐ कारश्चाय शब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्वाविनिर्यातौ तेन माङ्गलिकावुभौ ।। इति

अपि च श्रीमद्भागवते—

ततो भूत त्रिविदोंकारो यो व्यक्तः प्रभवः स्वराट् ।
यत्तलिङ्गं भगवतो ब्रह्मणः परमात्मनः ।।
स्वधाम्नो ब्रह्मणः साक्षात् वाचकः परमात्मनः ।
न सर्वमन्त्रोपनिषद् वेदबीजं सनातनम् ।।[२६] इति

एवं समस्तवैदिकवाङ्मये ॐकारस्यैव व्याख्यानमस्ति। भूत भविष्य-वर्तमानादिकं सकल जगत् च अस्मिन्नेव अन्तर्निहितं वर्तते, ओमित्ये तदक्षरमिदं सर्वं तस्योपाख्यान भूतं भवद्भविष्यदिति सर्वमोंकार एव। यच्चा त्रिकालातीतं तदप्योंकार एव।।"

यथा एकस्मिन् विशाले वृक्षे स्कन्ध-नाल-शाखा-उपशाखा-पल्लव-पत्र-पुष्पफलादीनि च अन्तर्निहितानि तिष्ठन्ति, अनन्तैः प्रयत्नैरपि चर्मचक्षुर्द्वारा तेषां प्रत्यक्षं न भवति, किन्तु पृथ्वी-जलोष्म वाय्वाकाशादीनां तत्त्वानांसुयोगे ते अंकुरितास्तथा विकसिता सन्तः। सर्वेषां दृष्टिगोचरी भवन्ति; तथैव प्रलयदशायां कस्यापिवेदसाक्षात्कारो न भवति, किन्तु सृष्टिसमये ईश्वरीयनियन्त्रणैः ॐ कारे वेद रूपेण स्फुटितं सर्वप्रथमं ब्रह्मातमेव गृह्णति। तदनन्तरं निर्मलमानसानां महर्षीणां तत्साक्षत्कारो जायते। भगवतो नाभिकमलादुत्पद्यमानेन ब्रह्मणा सर्वप्रथमं वेदानां ग्रहणं कृतम्, अतः स वेदानां आविष्कारकः। कथ्यते च—"यो ब्रह्माणं विदधाति पूर्वं यो वैदेदानं प्रहिणोति तस्मै।"[२७]

ॐकारे त्रयोवर्णामन्यन्ते अ+द्व+म् एभिरेव त्रयोलोकाधार्यन्ते। एभ्य एव त्रिभ्यो वर्णेभ्यो वेदस्य विकासो जातो स्ति। उक्तं च—

तस्यासन् त्रयो वर्णा अकाराद्या भृगूद् वह।
धार्यन्ते यैः त्रयो भावा गुणानामर्थ वृत्तयः ।।
ततो क्षर समाम्नायमसृजद् भगवानजः ।।[२८] इति

एव मोंकारे स्थितानां त्रयाणां वर्णानां व्याख्या गायत्र्या त्रयः पादाः सन्ति, अत एव गायत्री त्रिपदाकथ्यते। यथा ॐ कारस्य प्रत्येकं वर्णानां व्याख्यानम् त्रिपदायाः गाणत्र्या एकैकः पादस्ति, तथैव त्रिपदाया गायत्र्या एकैकस्य पादस्य व्याख्यानं वेदस्यै नैकम् काण्डमस्ति। यथा वेदे त्रिणिकाण्डानि सन्ति—(१) कर्म काण्डम् (२) उपासना काण्डम् (३) ज्ञानकाण्डञ्च।

एवं काण्डत्रयात्मको वेदोगायत्रया एव विकसितं रूपमस्ति। यथा त्रिवर्णात्मकः ॐ कार एक मेवाक्षरमस्ति। तथैव त्रिपदागायत्री अपि एक एव मन्त्रो स्ति। यस्या विकसितं रूपं काण्डत्रयात्मको वेदो स्ति। अत एवार्थर्ववेदादौ गायत्री वेदमाताककथ्यते। तद्यथा—

स्तुता मया वरदा वेदमाता
वेदानां मातरं सावित्रीं सम्पदमुपनिषदमुपासते।[२९]

अपि च—

आगच्छ वरदेदेविः त्र यक्षरे ब्रह्मवादिनिः।
गायत्रीः छंदसांमातः ब्रह्मोनिः नमो स्तुते ।।[३०]

एभिः उपर्युक्तप्रमाणैः आख्यानैश्च ॐकार एवः, सर्वसाधकः, विश्वाधारः देवानां आदिस्थानं वेदानाञ्च रक्षकः इत्यादयो मूलभूतप्रमाण स्वरूपेण दरीदृश्यन्ते।

द्वादशज्योतिर्लिङ्ग विषयक विचाराः

प्रायः सर्वत्र वेदेषु वेदाङ्गेषु शास्त्रेषु, पुराणेषु च लिङ्गस्य स्वाभाविकी धर्ममर्यादा दृश्यते। एतदर्थमेव स्वातन्त्रयेण लिङ्गपुराणस्य रचना समजनि। लिङ्गार्चनं तस्यार्थ प्रकाशनञ्च प्राचीन कालादारभ्य अद्यावधि भारतीय जनतायाः श्रद्धाभक्तिपरककेन्द्रमस्ति। भारतीयाः अस्यलिङ्गस्य दर्शनं कृत्वा ऐहिक पारलौकिक कल्याणार्थं कामयन्ते। साक्षात् शिवस्वरूप-लिङ्गस्य अनेके भेदोपभेदाः पुराणेषु वर्णितानि सन्ति। एतादृशेषु लिङ्गेषु द्वादशज्योतिर्लिङ्गानां चर्चा सर्वप्रथमं क्रियते। भारतवर्षस्य अनेकेदिक्षु स्थितानां ज्योतिर्लिङ्गाः आध्यात्मिका प्रेरणया-सहैव अस्य देशस्य एकताअखण्डतायाश्च प्रतिपादकाः सन्ति। अद्यापि श्रद्धालुजनाः एषां दर्शनं कृत्वाकृतकृत्या भवन्ति।

यद्यपि भूतले यानि शिवलिङ्गानि सन्ति तेषां गणना कर्तुं न पारयन्ते। पुनश्च द्वादश-

वाचको स्ति। अतो मध्यस्थो यमुकारो जीवात्म-परमात्मनोः संयोजको स्ति। श्रुत्या आत्मोपलब्धौ प्रणवं कारणरूपेण विवृण्वत्या प्रोक्तं यत् यथा अरणेर्मन्थनात् पूर्वम् अरणो स्थितस्याग्ने-ग्रहणं दर्शनं वा न भवति, किन्तु मन्थने कृते सति स दृष्टिगोचरो जायते। तथैवाग्निस्थानीय आत्मा उत्तरारणिस्थानीय प्रणवद्वारा मननादिभिः अधरारणिस्थानीये देहे ग्रहीतुं शक्यः। तद्यथा—

वह्नेर्यथा योगिनस्तस्य मूर्तिर्नदृश्यते नैव च लिङ्गनाशः ।
स भूय एवेन्धनयोनिगृह्यस्तद्वोभयं वै प्रणवेन देहे ।।[२५] इति

एवमिदं दृश्यमानं प्रपञ्चजातमनन्तस्य गर्भे विलीनमासीत्। ग्रह नक्षत्रतारादीनां पाञ्चभौतिकानां पदार्थानां कुत्रापि सत्ता नासीत्। दीर्घकालानन्तरं प्रलयावसाने ब्रह्मणे "एको हं बहुस्याम इति भावनासमुद्भुता। परिणामस्वरूपे च तस्य नाभिकमले ब्रह्मणः प्रादुर्भावो जातः। तस्य मुखात् प्रथममोंकार एवाविर्भूतः। अतः शास्त्रेषु ॐकार मङ्गलवाचकं, ज्ञानागारं, वेदबीजं ब्रह्मस्वरूपं माङ्गलिकं च मन्यते। यथा—

ॐ कारश्चाथ शब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्वाविनिर्यातौ तेन माङ्गलिकावुभौ ।। इति

अपि च श्रीमद्भागवते—

ततो भूत त्रिविदोंकारो यो व्यक्तः प्रभवः स्वराट् ।
यत्तलिङ्गं भगवतो ब्रह्मणः परमात्मनः ।।
स्वधाम्नो ब्रह्मणः साक्षात् वाचकः परमात्मनः ।
न सर्वमन्त्रोपनिषद् वेदबीजं सनातनम् ।।[२६] इति

एवं समस्तवैदिकवाङ्मये ॐकारस्यैव व्याख्यानमस्ति। भूत भविष्य-वर्तमानादिकं सकल जगत् च अस्मिन्नेव अन्तर्निहितं वर्तते, ओमित्ये तदक्षरमिदं सर्वं तस्योपाख्यान भूतं भवद्भविष्यदिति सर्वमोंकार एव। यच्चा त्रिकालातीतं तदप्योंकार एव।।"

यथा एकस्मिन् विशाले वृक्षे स्कन्ध-नाल-शाखा-उपशाखा-पल्लव-पत्र-पुष्पफलादीनि च अन्तर्निहितानि तिष्ठन्ति, अनन्तैः प्रयत्नैरपि चर्मचक्षुर्द्वारा तेषां प्रत्यक्षं न भवति, किन्तु पृथ्वी-जलोष्म वाय्वाकाशादीनां तत्त्वानांसुयोगे ते अंकुरितास्तथा विकसिता सन्तः। सर्वेषां दृष्टिगोचरी भवन्ति, तथैव प्रलयदशायां कस्यापिवेदसाक्षात्कारो न भवति, किन्तु सृष्टिसमये ईश्वरीयनियन्त्रणैः ॐ कारे वेद रूपेण स्फुटितं सर्वप्रथमं ब्रह्मातमेव गृह्णाति। तदनन्तरं निर्मलमानसानां महर्षीणां तत्साक्षत्कारो जायते। भगवतो नाभिकमलादुत्पद्यमानेन ब्रह्मणा सर्वप्रथमं वेदानां ग्रहणं कृतम्, अतः स वेदानां आविष्कारकः। कथ्यते च—"यो ब्रह्माणं विदधाति पूर्वं यो वैदेदानं प्रहिणोति तस्मै।"[२७]

ॐकारे त्रयोवर्णामन्यन्ते अ+द्व+म् एभिरेव त्रयोलोकाधार्यन्ते। एभ्य एव त्रिभ्यो वर्णेभ्यो वेदस्य विकासो जातो स्ति। उक्तं च—

तस्यासन् त्रयो वर्णा अकाराद्या भृगूद् वह ।
धार्यन्ते यैः त्रयो भावा गुणानामर्थ वृत्तयः ।।
ततो क्षर समाम्नायमसृजद् भगवानजः ।।[२८] इति

एव मोंकारे स्थितानां त्रयाणां वर्णानां व्याख्या गायत्र्या त्रयः पादाः सन्ति, अत एव गायत्री त्रिपदाकथ्यते। यथा ॐ कारस्य प्रत्येकं वर्णानां व्याख्यानम् त्रिपदायाः गाणत्र्या एकैकः पादस्ति, तथैव त्रिपदाया गायत्र्या एकैकस्य पादस्य व्याख्यानं वेदस्यै नैकम् काण्डमस्ति। यथा वेदे त्रिणिकाण्डानि सन्ति—(१) कर्म काण्डम् (२) उपासना काण्डम् (३) ज्ञानकाण्डञ्च।

एवं काण्डत्रयात्मको वेदोगायत्रया एव विकसितं रूपमस्ति। यथा त्रिवर्णात्मकः ॐ कार एक मेवाक्षरमस्ति। तथैव त्रिपदागायत्री अपि एक एव मन्त्रो स्ति। यस्या विकसितं रूपं काण्डत्रयात्मको वेदो स्ति। अत एवार्थर्ववेदादौ गायत्री वेदमाताककथ्यते। तद्यथा—

स्तुता मया वरदा वेदमाता
वेदानां मातरं सावित्रीं सम्पदमुपनिषदमुपासते।[२९]

अपि च—

आगच्छ वरदेदेविः त्र यक्षरे ब्रह्मवादिनिः ।
गायत्रीः छंदसांमातः ब्रह्मोनिः नमो स्तुते ।।[३०]

एभिः उपर्युक्तप्रमाणैः आख्यानैश्च ॐकार एवः, सर्वसाधकः, विश्वाधारः देवानां आदिस्थानं वेदानाञ्च रक्षकः इत्यादयो मूलभूतप्रमाण स्वरूपेण दरीदृश्यन्ते।

द्वादशज्योतिर्लिङ्ग विषयक विचाराः

प्रायः सर्वत्र वेदेषु वेदाङ्गेषु शास्त्रेषु, पुराणेषु च लिङ्गस्य स्वाभाविकी धर्ममर्यादा दृश्यते। एतदर्थमेव स्वातन्त्रयेण लिङ्गपुराणस्य रचना समजनि। लिङ्गार्चनं तस्यार्थ प्रकाशनञ्च प्राचीन कालादारभ्य अद्यावधि भारतीय जनतायाः श्रद्धाभक्तिपरककेन्द्रमस्ति। भारतीयाः अस्यलिङ्गस्य दर्शनं कृत्वा ऐहिक पारलौकिक कल्याणार्थं कामयन्ते। साक्षात् शिवस्वरूप-लिङ्गस्य अनेके भेदोपभेदाः पुराणेषु वर्णितानि सन्ति। एतादृशेषु लिङ्गेषु द्वादशज्योतिर्लिङ्गानां चर्चा सर्वप्रथमं क्रियते। भारतवर्षस्य अनेकेदिक्षु स्थितानां ज्योतिर्लिङ्गाः आध्यात्मिका प्रेरणया-सहैव अस्य देशस्य एकताअखण्डतायाश्च प्रतिपादकाः सन्ति। अद्यापि श्रद्धालुजनाः एषां दर्शनं कृत्वाकृतकृत्या भवन्ति।

यद्यपि भूतले यानि शिवलिङ्गानि सन्ति तेषां गणना कर्तुं न पारयन्ते। पुनश्च द्वादश-

ज्योतिर्लिङ्गानां विवेचनं विविच्यन्ते शिवपुराणे विस्तृतरूपेण विषये स्मिन् चर्चा प्रचलिता दृश्यते। यत्र-यत्र च ज्योतिर्लिङ्गानि तत्र-तत्र लिङ्गस्यैव पूजा समादृता दृश्यन्ते।

प्रथमस्तावत् जिज्ञासा जागर्ति यत् अन्ये देवाः मूर्ति (प्रतिमा) रूपेण पूज्यन्ते, परं कथं भगवान्छिवः लिङ्गरूपेण पूज्यते ? विषये स्मिन् चर्चा प्रचारिता विद्यन्ते। शिवपुराणे सनत्कुमार नन्दीश्वरसम्वादे अस्य विषयस्य सम्यक् चर्चा विद्यते। नन्दीश्वरः सनत्कुमारं प्रति कथयति, यत् सर्वव्यापकः लीलापुरुषस्य शिवस्य ज्योतिर्लिङ्गस्वरूपस्य द्वादशसंख्याकात्मकं परमरहस्यमय अवताराः सर्वजनहिताय सर्वजनसुखायेति भावनया भारतस्य दिक्षु विदिग्सु च स्थिता वर्तन्ते। तदुक्तञ्च शिवपुराणे—

सौराष्ट्रे सोमनाथश्च श्रीशैले मल्लिकार्जुनः ।
उज्जयिन्यां महाकाल ओंकारे चामरेश्वरः ।।
केदारो हिमवत् पृष्ठे डाकिन्याम्भीमशङ्करः ।
वाराणस्यां च विश्वेशस्त्रयम्बको गौतमीतटे ।।
वैद्यनाथश्चिताभूमौ नागेशोदारुका वने ।
सेतुबन्धे च रामेशो धुश्मेशश्च शिवालये ।।[३१] इति

१. सोमनाथ ज्योतिर्लिङ्गम् :

एषु द्वादशज्योतिर्लिङ्गेषु प्रथमः सोमनाथ नामाख्य लिङ्गः सौराष्ट्रप्रदेशे "काठियावाड़" नामकस्थानस्य सन्निकटे प्रभासक्षेत्रे विराजमानमस्ति। तत्खलु चन्द्रस्य क्षयापस्मारकुष्ठादि समस्त तापनिवारकः अस्ति। एतस्य लिङ्गविशेषस्य प्रथमार्चनं भगवान् चन्द्रमसा एव कृतमासीत्। तत्र एकं चन्द्रकुण्डमपिवर्तते, यस्यां स्नात्वा महापुरुषा सर्वरागैः प्रमुच्यन्ते। तच्च सर्वपापविनाशकमपीति प्रासिद्धिः। शिवात्मस्वरूप सोमनाथख्य महालिङ्गस्य दर्शनमात्रेण मुक्ति मुक्तिरूप पुरुषार्थं प्राप्नुवन्ति जनाः।

शिवपुराणानुसारं कदाचित् दक्ष प्रजापतिः स्वीयान् सुलोचनीं सप्तविंशति कान्यकामुद्वाहं चन्द्रमसा सह कृतवान्। तासु या रोहिणी नामधेया पत्ये अतीवप्रियासीत्। तां विना चन्द्रस्य जीवनमपि कठिनं वर्तते। उक्तं च—

सर्वाष्विपि च पत्नीषु रोहिणीनाम या स्मृता ।
यथैका सा प्रिया चासीत्तथा न्या न कदाचन् ।।[३२] इति

कालक्रमेण तस्याः प्रेमपाशे आबद्धो चन्द्रः अन्यासु स्त्रिशु च अनासक्तो संजातः। ततश्चान्याः खलु भृशमुद्विग्नमनैः पितुसकाशं गत्वा याथातथ्य निवेदितवत्यः। तासां निवेदनं श्रुत्वा दक्षः जामातुरूपगम्य सर्वाणां पत्नीनां सह समानव्यवहारं व्यवहर्तव्यमिति निवेदितम्। कियत्कालानन्तरं पुनस्तथैव कन्याभिः श्रुत्वा दक्षः चन्द्रं शशाप-त्वं क्षयी भव? इत्युक्ते दक्षे चन्द्रः तत्काल एव क्षीणतां गतः। तदुक्तं—

इत्युक्ते तेनचन्द्रो वै क्षयी जातः क्षणादिह ।
हाहाकारोमहानासीत्तदेन्दो क्षीणतां गते ।।[३३] इति

जामातरं प्रति दक्षस्य शापं श्रुत्वा चन्द्रमसा विज्ञापित सर्वेदेवाः ब्रह्माणमुपगत्य शापवृत्तान्तं श्रावयित्वा, विमुक्तेरूपापमपि अपृच्छन्। ब्रह्मणोक्तम् यदयं चन्द्रः देवैः सह प्रभासक्षेत्रं गत्वा, तत्र शिवमूर्तिमस्थापयित्वा मृत्युज्जयेन विधानेनाराधयन् तपं करोतु। नास्त्यन्योपायः शापकवमुक्तये इति उक्तं च—

निधायेशं पुरस्तत्र चन्द्रस्तपतु नित्यशः ।
प्रसन्नश्च शिवः साक्षादक्षयं तं करिष्यति ।।[३४] इति

ब्रह्मणः आदेशं शिरोधार्य सर्वेदेवाः चन्द्रमसा सह प्रभासक्षेत्रं जग्मुः, तत्र च सरस्वत्यादीनि नदीनावाह्य मृत्युज्जय विधिना शिवं पूजयित्वा तपस्तप्तुं चन्द्रम् विहाय ते देवाः स्व-स्व लोके गतवन्तः। तत्र प्रभास क्षेत्रे निरन्तरं पाठमासं यावत् आराधिते चन्द्रे प्रसन्नो शिवः पराय तं आदिशति। तच्छुत्वा चन्द्रोक्तम्—हे देव ? ममदेहस्य क्षयं वारयतु इत्युक्ते चन्द्रे शिवः प्रोवाचपक्षैकं क्षीणसत्त्वः पक्षैकं च वर्द्धमान कलावान् भव। उक्तञ्च शिवपुराणे—

पक्षे च क्षीयतां चन्द्र कला ते च दिने दिने ।
पुनश्च वर्द्धतां पक्षे सा कला च निरन्तरम् ।।[३५] इति

भगवतः शिवस्यवरदानं श्रुत्वा सर्वेदेवा शिवं अप्रार्थयन् यत् हे प्रभो देव्यासह भवान् अत्रैव निवसतु। प्रसन्नो शिवः क्षेत्र माहात्म्यं वर्धनाय चन्द्रयशसे च सोमनाथ नाम्ना लिङ्गस्वरूपे विराजते सम्प्रत्यपि। उक्तञ्च—

प्रसन्नश्च स देवानां क्षेत्रमाहात्म्य हेतवे ।
चन्द्रस्य यशसे तत्र नाम्ना चन्द्रस्य शंकरः ।।[३६] इति

अतएव श्रद्धया श्रीसोमनाथ नामाख्य प्रथम ज्योतिलिङ्गस्य अर्चनं वंदनञ्च कर्तव्यमस्माभिः। तदुक्तम्—

सौराष्ट्र देशे विशदे तिरम्ये,
ज्योतिर्मयं चन्द्रकलावतं सम्।
भक्ति प्रदानाय कृपावतीर्णं,
तं सोमनाथं शरणं प्रपद्यते।।[३७] इति

अस्य ज्योतिर्लिङ्गस्योपलिङ्गं पृथिवी-सागरयोरन्तराले "अन्तकेश" नाम्ना अद्यापि स्थितो स्ति।

२. मल्लिकार्जुनज्योतिर्लिङ्गम् :

श्रीशैलशिखरे परम तत्त्वज्ञस्य भगवतः शिवस्य द्वितीय मल्लिकार्जुन इति नामाख्यलिङ्गं विराजते। अयं पर्वतः मद्रप्रान्ते "कृष्णनाम्नि जनपदे" कृष्णायानद्यास्तटे वर्तते। इदं

सिद्धक्षेत्रं दक्षिण कैलास इति नाम्ना व्यवह्रियते। अस्य ज्योतिर्लिङ्गस्य दर्शनात् पूजनात् स्मरणाच्च भक्तपुरुषाः मुक्तिं मुक्तिं चाप्नुवन्ति।

एकदा गणेश स्कन्दयोमध्ये विवादः समभवत्, उभावकथयतः यत् मेव विवाहं पूर्वं भविष्यति। विवादे स्मिन् शिवेन निर्णयं दत्ता यत् यः पूर्वं धरित्रीं परिक्रम्य आगमिष्यति तस्यैव विवाहं प्रथमं भविष्यति। तद्यथा—

यश्चैव पृथिवीं सर्वा क्रान्त्वा पूर्वमुपात्रजेत् ।
तस्यैव प्रथमं कार्यो विवाहः शुभ लक्षणः ।।[३८] इति

एतत् पितुः निर्णयं श्रुत्वा महासत्त्वः स्कन्दस्तु पृथिवीं, परिक्रमणार्थं तत्क्षण एव प्रचलितः, किन्तु लम्बोदरः, मूषक वाहनञ्चावलोक्य न विवेकं बहुधाविचार्य पितरौसम्पूज्य तयोरेव प्रदक्षिणं विधाय स्वयं पृथिवीपरिक्रमाजन्यफलभागी सिद्धयति। यथा—

पित्रोश्च पूजनं कृत्वप प्रकान्तिं च करोति यः ।
तस्य वै पृथिवी जन्यं फल भवति निश्चितम् ।।[३९] इति

इत्येवं गणेशकथनं समीचीनं मत्वा पितरौ तस्य विवाहः सिद्धि-बुद्धि स्त्रिभ्यां सह सम्पादितवन्तौ।

निखिलां क्षोणीं परिक्रम्य समागते स्कन्दे देवर्षिनारदः तत्सकाशमागत्य गणेशस्य विवाहादि संस्कार कथां श्रावयित्वा स्वेष्ट साधनधिषणयाशिवपरिवारेण सह तेन विग्रहमुत्पादयामास। तच्छ्रुत्वा पितरौ चरणमुपस्पृश्य मातापित्रोराज्ञामुलङ्घ्य स्कन्दः तपस्तप्तुं कैलासं विहाय क्रौंच शिखरं गतः। ततः पुत्रस्नेह विह्वलौ तौ अपि क्रौंच शिखरं समासादितवन्तौ, तत्र पितरौ आगमनं निशम्य कुमारः ततो पि योजनमयसुदूरं गतः। तेन भृशं दुःखितौ तौ तत्रैव ज्योतिःस्वरूपे समासीनौ संजातौ। यथा च—

क्रौंचे च पर्वते दूरं गते तस्मिन् स्व पुत्रके ।
तौ च तत्र समासीनौ ज्योतीरूपं समाश्रितौ ।।[४०] इति

अद्यापि पुत्रदर्शनहेतुतः भगवान्छिवःप्रति अगायाम्, शिवा चपूर्णिमा यां तत्र गच्छतः। तद्दिनात् तस्य ज्योतिः स्वरूपस्य मल्लिकार्जुन इति नाम्ना प्रसिद्धिं जगाम्। मल्लिका इत्यस्य पार्वतीत्यर्थः अर्जुन शब्दस्तु शिववाचकः।

अस्य लिङ्गस्य उपलिङ्गं भृगुकक्षे रूद्रेश्वर इति नाम्ना अद्यापि विराजते। अत एवोक्तम् शिवपुराणे—

तद्दिनं हि समारभ्य मल्लिकार्जुन संभवम् ।
लिङ्गं चैव शिवस्यैकं प्रसिद्धं भुवनत्रये ।।[४१] इति
मल्लिकार्जुनसम्भूतमुपलिङ्गमुदाहृतम् ।
रूद्रेश्वरमितिख्यातं भृगुकक्षे सुखावहम् ।।[४२] इति

अतः श्रद्धया सर्वदैव सेवनीयो यं ज्योतिर्लिंगम्।

श्रीशैल श्रृंगे विवुधाति संगे,
तुलादि तुङ्गे पि मुदा वसन्तम्।
तमर्जुनं मल्लिकपूर्वमेव
नमामि संसार समुद्र सेतुम्।।[४३] इति

महाकालज्योतिर्लिङ्गम् :

क्रम प्राप्तं द्वादशज्योतिर्लिङ्गेषु तृतीयमहाकाललिङ्गविवेचनं विविच्यते—

भगवतः परमतत्त्वज्ञस्य शिवस्य तृतीयज्योतिः स्वरूपस्य समुत्पत्तिः उज्जयिन्यां (अवन्तीनगय्यां) प्रादुर्भूतः। इयं नगरी मालवा प्रदेशे "क्षिप्रा' पद्यास्तटे विराजते। अस्य लिङ्गस्य विषये शिवपुराणोक्तं उपाख्यानं प्रस्तूयते—

उज्जयिन्यां वेदप्रियनामकः एकः ब्राह्मणः प्रातिवसति स्म। स सदाचार परायण शिवभक्तश्चासीत्। पार्थिव पूजनं शिवार्चनं तस्य दैनिककृत्यमासीत्। तस्य तद्गुण सम्पन्नाः चत्वारः पुत्रा अपि अनुदिनं शिवार्चनं वद्धमानसा आसन्। तेषां पुण्यप्रतापात् पृथिव्यां परितः कल्याणवृद्धिमेधमाना वर्तते।

उक्तञ्च—

तेषां पुण्य प्रतापाच्च पृथिव्यां सुखमेधत ।
शुक्लपक्षे यथा चन्द्रो वर्तते च निरन्तरम् ।।[४४] इति

तस्मिन् समये रत्नमाल पर्वते दूषण नामधेय कश्चिदसुर निवसति स्म। पृथिवीतः धर्मस्य समूलोन्मूलनमेव तस्य प्रमुखोद्देश्याः आसीत्। यथा—

पृथिव्यां वेदधर्माश्च स्मृतिधर्माश्च सर्वशः ।
स्फोटितास्तेन दुष्टेन सिंहेनेव शशाः खलु ।।[४५] इति

इत्येवं प्रतितीर्थं परिभ्रम्य तत्रत्यः तेन धर्मं दूरी चकार। सम्प्रति स दुष्टः उज्जयिनीतः अपि धर्म विनाशकामनया सेनया सह नगरीं सम्वृतः। जनान् कष्टप्रदाने समुद्यतः। तस्य दुष्कर्ममालोक्या ग्रामवासिनः विप्राणां समीपं गत्वा सर्वं निवेदितवन्तः। तान् सम्बोधयन् ब्राह्मणाः उचुः यत् भवन्तः धैयं धारयन्तु शिव अवश्यमेव शिवं करिष्यति, इत्युक्त्वा ते विप्राः लिङ्गरूप पार्थिवार्चने संलग्ना संजाताः ततः परं शिवार्चने विप्रान् दृष्ट्वा तान् वध-वध इति कथयन् यदा तेषां समीपे गतः तदा एव तस्मिन् लिङ्ग गर्भात् कालस्य काल इव महाकालः विकटरूपधृक् साक्षात् शिवः समुत्पन्नो संजातः। यथा—

गर्तातत: समुत्पन्नः शिवो विकटरूपधृक् ।
महाकाल इति ख्यातो दुष्टहन्ता सतां गतिः ।।[४६] इति

अपि च—

महाकालः समुत्पन्नो दुष्टानां त्वादृशामहम् ।
खलत्वं ब्राह्मणानां हि समीपाद दूरतोव्रज ।।[४७] इति

इत्येवं गम्भीरवाण्यां समुद्घोष्य स्व हुंकारमात्रेणैव भगवाञ्छिवः तं दूषणं सेनया सह जघान्।

ततश्च वेदप्रियादि भक्तानां ब्राह्मणानां स्तुत्यास्तुतः शिवः वेद-धर्म-लोकरक्षार्थं तत्रैव ज्योतिः स्वरूपे विराजमानवर्तते अद्यापि। ब्राह्मणा ऊचुः—

महाकाल महादेव दुष्ट दण्डकर प्रभो ।
मुक्तिं प्रयच्छ नः शम्भो संसाराम्बुधितः शिवः ।।[४८] इति

एवं अस्य लिङ्गविशेषस्य दर्शनात् अर्चनात् भक्ताः सर्वान्कामान् प्राप्नुवन्ति। उक्तञ्च शिवपुराणे—

यं यं काममपेक्ष्यैव तल्लिङ्गं भजते तु यः ।
तं तं काममवाप्नोति लभेन्मोक्षं परत्र च ।।[४९] इति।

अस्य महाकाल ज्योतिर्लिङ्गस्य उपलिङ्गम् "दुग्धेश" नामधेयं पापापहारि स्वरूपे नर्मदानद्यास्तटे अधुना पि विराजते। अपि च—

अवन्तिकायां विहितावतारं,
मुक्तिप्रदानाय च सज्जनानाम्।
अकालमृत्योः परिरक्षणार्थं
वन्दे महाकाल महासुरेशम्।।[५०] इति

४. ओंकारेश्वर ज्योतिलिङ्गम् :

पार्थिवलिङ्गानुसारं भक्त्यास्थापितो महादेवः मालवा प्रान्ते नर्मदायास्तटे पृथक्-पृथक् ओंकारेश्वरः अमलेश्वर इति नामाख्यौ लिङ्गद्वयं वर्तते।

एकदा ब्रह्मर्षिनारदः गोकर्ण क्षेत्रे स्थितं शिवं प्रपूज्य परिभ्रमन् विन्ध्यगिरौ जगाम। विन्ध्येन सम्पूजितो नारदः तद् गुणमहिमावर्णनपुरः सरम् मेरोः लघुतरं विन्ध्यं ससाध। तच्छुत्वा आत्मग्लानिं मन्यमानो विन्ध्यः षण्मासं यावत् शिवाय तपश्चचार। ततो भ्यर्थितः शिवः प्रसन्नोभूत्वा तत्सन्निधौ प्रकट इच्छानुरूपं तस्मै वरं प्रदाय, देवर्षीणां प्रार्थनाभिः तत्रैव स्वरूपद्वये स्थितो जातः यत्स्वरूपं प्रणवे समाविष्टः तत् ओंकारेश्वरः।

यच्च-पार्थिवे आविष्टः तत् अमलेश्वरः। तदुक्तम् शिवपुराणे—

ओंकारे चैव यल्लिंगमेकं तच्च द्विधा गतम् ।
प्रणवे चैव ओंकारनामासीत स सदाशिवः ।।
पार्थिवे चैव यज्जातं तदासीत् परमेश्वरः ।।[५१] इति

अस्य ज्योतिलिङ्गस्य "कर्मदेश" नामाख्य उपलिंगम् विन्दु सरोवरे स्थितो स्ति। यः सर्वकामफलप्रदः इत्युक्तः। यथा—

ओंकारजं च यल्लिङ्गं कर्मदेशमिति श्रुतम् ।
प्रसिद्धं विन्दुसरसि सर्वकामफल प्रदम् ।।[५२] इति

तथा च—

कावेरिका नर्मदयोः पवित्रे,
समागमे सज्जन तारणाय।
सदैव मान्धातृ पुरे वसन्त-
मोंकारमीशं शिवमेकमीडे।।[५३] इति

५. केदारेश्वर ज्योतिर्लिङ्गम् :

सकलतत्त्वज्ञस्य भगवत शिवस्य पञ्चमज्योतिः स्वरूप केदारेश्वर लिङ्गविषये विचार्यते—

"केदारो हिमवत्पृष्टे" इदं स्थानं हिमवतः केदार शृंगोपरिस्थितो स्ति। केदार शृंगस्य पूर्वस्यां दिशि अलकनन्दायास्तटे श्री बदरीनाथः, प्रतीच्यां च मन्दकिन्यास्तटे श्रीकेदारनाथो विराजते। इमौ उपर्युक्त द्वौ विग्रहौ नर-नारायणाख्यस्य भगवतो विष्णोरवतार भूतौ तदनुरोधेन केदारनाथः "केदारेश्वर" इति संज्ञया तं जना व्यवहरन्ति।

शिवपुराणानुसारं भगवतः विष्णोरवतारभूत साक्षात् नर-नारायणाख्यो देवः वदरिकाश्रमे गत्वा तपश्चचार। तेन सन्तुष्टः शिवः वराय आदि शति नर-नारायणाख्यं देवम्। याचमाने वरे लोकानां हितकाम्यया तत्रैव ज्योतिः स्वरूपे महेश्वरः तस्थौ। तदुक्तम्—

यदि प्रसन्नोदेवेश यदि देयो वरस्त्वथा ।
स्थीयतां स्वेन रूपेण पूजार्थं शङ्करस्वयम् ।।
इत्युक्तस्तु तदाताभ्यां केदारे हिमसंश्रये ।
स्वयं च शङ्करस्तथौ ज्योतीरूपो महेश्वरः ।।[५४] इति

इत्येवं प्रकटितो देवः "केदारेश्वर नाम्ना प्रसिद्धिमवाप। अस्य केदारेश्वर ज्योतिर्लिङ्गस्य दर्शनेन, पूजनेन च सद्यः शिवलोकं प्राप्यते। उक्तञ्च—

केदारेश्वरस्य भक्ता ये मार्गस्थास्तस्य वैस्मृता ।
ते पि मुक्ता भवन्त्येव नात्र कार्या विचारणा ।।[५५] इति

अस्य ज्योतिर्लिङ्गस्य उपलिङ्गं भूतेश नाम्ना यमुनायास्तटे विराजते अधुना पि।

अतएव—

महाद्रिपार्श्वे च तटे रमन्तं,
सम्पूज्यमानं सततं मुनीन्द्रैः।
सुरासुरैर्यखमहोरगाद्यैः
केदारमीशं शिवमेकमीडे।।[५६] इति

६. भीमशङ्कर ज्योतिर्लिङ्गम् :

इदानीं क्रमागतम् द्वादशज्योतिर्लिङ्गेषु षष्ठभीमशङ्कर ज्योतिः स्वरूपं विविच्यन्ते।

"डाकिन्यां भीमशङ्करः" अस्य लिङ्गस्य वासस्थानं मुम्बईतः पूर्वं पूनातः उत्तरदिशि सत्याद्रौ भीमानद्यास्तटे स्थितमस्ति। सह्यपर्वतस्यैक शिखरस्य नाम डाकिनीति विद्यते। एतेन ज्ञायते यद् कदाचिदत्र डाकिन्यादि भूतप्रेतादीनां वासस्थानमासीत्।

केचित्तु-असमप्रान्तस्य कामरूपं जनपदे "गोहाटी" सन्निधौ "ब्रह्मपुर" नामकपर्वत-शिखरे भीमशङ्कर शिवलिङ्गस्य मन्दिरं विद्यते इति स्वीकुर्वन्ति।

एतस्य विषये शिवपुराणानुसारम्—

"कर्कट नामक साक्षसात् "पुष्करी" नाम्नि साक्षस्यां समुत्पन्ना कर्कटी नामधेया विराधस्य भार्या आसीत्। समागते काले रामेण निहते विराधे कदाचिद् सह्याचले रावणानुज कुम्भकर्णस्यैकदा सम्भोगः समजनि। तेन च तस्या गर्भात् प्राप्त काले भीमनामाख्यः पुत्रः प्रादुर्वभूव। कालान्तरे भीमः मातुर्मुखात् श्रुतं यत् श्रीरामेण मम समस्तपितृकुलस्य विनाशं कृतम् इति मनसि निधाय प्रतिशोध भावनया ब्रह्माणमुद्दिश्य दुश्चरं तपश्चकार। सन्तुष्टे ब्रह्मणे अतुलबलं सम्प्राप्य सर्वान् देवान् अधिकारच्युतं च कृत्वा युद्धे हरिरपिपराजितः। दिग्विजये सर्वप्रथमं परमशैवराजा सुदक्षिणं विजित्य कारागारे निरुद्धयते। नित्य पार्थिवपूजनं राज्ञा सुदक्षिणस्य दिनचर्या आसीत्। कारागारे ऽपि स प्रतिदिनं करोतिस्म। एकदा भीम दूतसुखात् पार्थिवपूजन मारणार्थमभिचारिक क्रियेति श्रुत्वा, सङ्गहस्त स राजानं वधार्थं प्रचलितः। तत्र गत्वा राज्ञा भीमयोर्मध्ये पार्थिव विषये अनेके विवादाः संजाता। अनन्तरं च तेन कुधसन् पार्थिवलिंगोपरि खड्गं प्राहिणोत्। तत्क्षणे हुंकारोच्चारणपूर्वकं लिङ्गत एव शिवः प्रादुर्भूत्वा तं भीमासुरं सेनयासह जघान।[५७] इति

अनन्तरं च भक्तानुरोधेन तल्लिङ्गे ज्योतिः स्वरूपे सन्निहितो जातः। तदारभ्य तल्लिङ्गस्य भीमशङ्कर इति नाम्ना प्रसिद्धिगतः अस्य लिङ्गस्य दर्शनमात्रेण सर्वाण्यापदानि दूरी भवन्ति इति पुराण प्रसिद्धिः। उक्तञ्च—

भीमशङ्कर नामात्वं भविता सर्वसाधकः ।
एतल्लिङ्गं सदा पूज्यं सर्वापद् निवारकम् ।।[५८] इति

अस्य ज्योतिर्लिङ्गस्योपलिङ्गं "भीमेश्वर" नाम्ना अद्यापि प्रकाशस्वरूपे सह्याचले विराजमानो ऽस्ति। अस्य दर्शन-पूजनेन वलवृद्धिं भवति। तदुक्तम्—

भीमशङ्कर सम्भूतं भीमेश्वरमिति स्मृतिम् ।
सह्याचले प्रसिद्धं तन्महाबल विवर्धनम् ।।[५९] इति

अपि च—

यं डाकिनीशाकिनिका समाजे,
निषेव्यमाणं पिशिताशनैश्च।

सदैव भीमादि पदं प्रसिद्धं,
तं शङ्करं भक्तहितं नमामि।।[६०] इति

त्र्यम्बकेश्वर ज्योतिर्लिङ्गम् :

भगवतः शिवस्य अष्टम् लिङ्गोत्पत्तिः त्र्यम्बक नाम्ना प्रसिद्धिं गता। "त्र्यम्बकं गौतमीतटे" इदं स्थानं मुम्बई प्रान्ते नासिक जनपदस्यान्तराले ब्रह्मगिरेः अधित्यकायां प्रवाहमानाया गोदावर्यास्तटे विद्यते।

एकदा महर्षे गौतमस्य तपः प्रभावात् प्रसन्नो भूत्वा वरुणदेवो तेन याच्यमाने सति तं सलिलपूरितं कुण्डमददत्। दैवात् जलमाहरतां ऋषिपत्नीनां परस्परं विद्वेषो जायत। तेन ऋषिगणाः गौतमेन कपटपूर्ण व्यवहारं व्यवहृत्य, तदर्थं उपोश्य च गणेशं ते नैवं गौतमं पापीष्टं साधितवन्तः। तदनन्तरं खिन्नो गौतमः तं क्षेत्रं परित्यज्य सभार्यः ब्रह्मगिरे एकोत्तरशत परिक्रमणं विधाय शिवमाराधयामास। आराधनया तुष्टः पिनाकी याच्यमाने गौतमे गङ्गामददत्, तथा गङ्गयानुरोधेन स्वयमपि शिवः सहशिवातत्र ज्योतिलिङ्गस्वरूपमवधार्य त्र्यम्बकेश्वर नाम्ना सिद्धिं प्राप। तदुक्तञ्च—

यूयं सर्व प्रियार्थं च तिष्ठथात्र सर्वसुहृत्तमः ।
तदा वयं च सर्वे त्वागमिष्या मो न संशयः ।।[६१] इति

तदारभ्य गङ्गा च गौतमी नामधेया संजाता। देवा अपि गङ्गा शिवयोः स्तुतिं कृत्वा निवेदितवन्तः यत् यदा यदा सर्व सुहृतमः वृहस्पतिः सिंहस्थे भविष्यति तदा वयं=देव ऋषि तीर्थक्षेत्रादयो निःसंशयं आगमिष्यामः अत्रैव निवासमपि करिष्यामः। उक्तञ्च—

तद्दिनं हि समारभ्य सिंहस्थे च वृहस्पतौ ।
आयान्ति सर्व तीर्थानि क्षेत्राणि देवतानि च ।।[६२] इति

इत्येवं अस्य क्षेत्र विशेषस्य दर्शनं तथा च त्र्यम्बकेश्वर ज्योतिर्लिङ्गस्य दर्शनं अर्चनञ्च सर्वदा पापप्रशमनाय भवति। तदुक्तम्—

ज्योतिर्लिङ्गमिदं प्रोक्तं त्र्यम्बकं नाम विश्रुतम् ।
स्थितं तटे हि गौतम्या महापातकनाशनम् ।।[६३] इति

अपि च—

यः पश्येद् भक्तितो ज्योतिर्लिङ्गं त्र्यम्बक नामकम्।
पूजयेत् प्रणमेत् स्तुत्वा सर्वपापैः प्रमुच्यते ।।
ज्योतिर्लिङ्गं त्र्यम्बकं हि पूजितं गौतमेन ह ।
सर्वकामप्रद चात्र परत्र परमुक्तिदम् ।।[६४] इति

इत्येवं अस्य लिङ्गस्य लौकिक-पारलौकिक अर्थसिद्धये स्वरूप वर्णनपुरःसरम् गौतमी गंगायाः समुत्पत्तिः औदुम्बर (गुल्लर) शाखातः विविच्यते। तद्यथा—

औदुम्बरस्य शाखायास्तत्प्रवाहो विनिःसृतः ।
तत्र स्नानं मुदा चक्रे गौतमो विश्रुतो मुनिः ।।[६५] इति

तथा च अन्य लिङ्गापेक्षया अस्य ज्योतिलिङ्गस्य शिवपुराणानुशीलनेन अर्वाचीनता सिद्धयति।

इदमपि श्रुतं यद् तत्रैव कियद्दूरे पञ्चवट्यां श्रीसीतालक्ष्मणेन सह निवसता श्रीरामेणादिष्टः लक्ष्मणेन सूर्पणखायाः विरूपीकरणं जातम्। अस्य ज्योतिर्लिङ्गस्योपलिङ्गं अचलेश्व नाम्नाः विख्यातः यं सदालोकानां सुखदः कथितम्।

अतएव सर्वदैव पूजनीयो स्मरणीयश्च त्र्यम्बकेश्वरज्योतिलिङ्गम्।

सह्याद्रिशीर्षे विमलेवसन्तम्
गोदावरीतीर पवित्रदेशे।
यद्दर्शनात् पातकमाशुनाशं,
प्रयाति तं त्र्यम्बकमीशमीडे।।[६६] इति

वैद्यनाथ ज्योतिलिङ्गम् :

भगवतः परमतत्त्वज्ञस्य शिवस्य द्वादशज्योतिर्लिङ्गेषु नवमः वैद्यनाथेश्वर ज्योतिःस्वरूप विषयकं विवेचनं विविच्यते—

वैद्यनाथश्चिताभूमौ[६७]

इदं तीर्थक्षेत्रं सनथालपरगना मण्डलान्तर्गत ''जैसीडीह'' इत्याख्य ''रेलवेस्टेशन'' पार्वेवर्तते। केचित्तु-हैदराबादनगरस्य समीपे ''परली'' ग्राम समीपे स्वीक्रियते। किन्तु वैद्यनाथश्चिताभूमौ इति स्वीकरणमेव समीचीनं यथान्पूर्वपक्षः। तदुक्तम्—

वैद्यनाथावतारो हि नमवस्तत्र कीर्तितः. ।
आविर्भूतो रावणार्थं बहुलीलाकरः प्रभुः ।।
तदानयन रूपं हि ब्याजं कृत्वा महेश्वरः ।
ज्योतिर्लिङ्गं स्वरूपेण चिताभूमौ प्रतिष्ठितः ।।[६८] इति

अस्य ज्योतिः स्वरूपस्य उपाख्यानं लोकविश्रुतमेवा स्ति। शिवपुराणानुसारं पुरा लङ्काधिपतिरावणः सम्पूर्णलोकेषु यशसम्मान प्राप्तिकामः कैलासशिखरे भगवतः शिवस्य प्रीत्यै तत्र गत्वा हिम-वात-वर्षा-धर्म-तापसन्तप्य, पञ्चाग्निं सेवित्वा चोग्रतपश्चचार। पुनश्च सिद्धिं नालभत्। अनन्तरं च शिरां शिछिन्द्य शिवार्पणं चकार। तदातिप्रसन्नो शिवः याचमाने वरे तस्मिन् तच्छिरांशि तथैवं विधाय महाप्रभुत्वमप्यददत्। पुनश्च लका यामेववसार्थ प्रार्थिते सति शिवेन एकं ज्योतिर्लिङ्गं दत्वा आदिश्यते यत् न खलु त्वया मार्गेस्थाप्यः न च पुरीषोत्सर्ग, मूत्रत्यागादिकमपि करणीयम्। एवं रावणोलोकरावणः प्रसन्न चेतसा तल्लिङ्गमादाय लङ्कां प्रतिप्रचलितः। शिवेच्छया मार्गे लघुशंकार्थी स कस्य चिद्ग्रामवराकस्य हस्ते तल्लिङ्गं दत्वा मूत्रत्यागकरणे प्रवृत्तो जातः, ततश्च स ग्रामीणः लिङ्गभारं असह्य विज्ञायतत्रैव

स्थापितः। तदारभ्य अद्यापि तल्लिङ्गं तत्रैव स्थितो वर्तते स्वं च तदानयने स्मर्थं मत्वा देवं प्रणम्य रावणः स्वराजधानीमाससाद। ततः भगवतः शिवस्य वैद्यनाथाख्य ज्योतिः स्वरूपः अनुदिनमहत्वमेधमाना वर्तते। तदुक्तञ्च—

वैद्यनाथेश्वरं नाम्ना तल्लिङ्गमभवम्मुने ।
प्रसिद्धं त्रिशु लोकेशु भुक्तिमुक्तिप्रदं सताम् ।।[६९] इति

इत्येवं तं देवं प्रणम्य लंकाधिपतिः वरोन्मत्त सन् स्वभवनं प्रविवेश। तद् विंस्मयं श्रुत्वा देवाः ऋषयः सिद्धाश्चागत्य तल्लिङ्ग विधिवत् सम्पूज्य तैरेव वैद्यनाथेति नाम सम्प्रोच्य दिवं ययुः।.

उक्तञ्च शिवपुराणे—

तस्मिन् काले सुरासर्वे हरिब्रह्मादयो मुने ।
आजजग्मुस्तत्र सुप्रीत्या पूजां चक्रु विशेषतः ।
प्रत्यखं तं तदा दृष्ट्वा प्रतिष्ठाप्य च ते सुराः ।
वैद्यनाथेति सम्प्रोच्य नत्वानुत्वादिवं ययुः ।।[७०] इति

अतएव तद्दिनादारभ्य साम्प्रतमपि शैवभक्ताः प्रतिवर्ष श्रावणेमासि गङ्गोदकं नीत्वा अतीवनिष्ठापूर्वकं पदयात्रां च विधाय तज्जलेन शिवलिङ्गं स्नाप्य अभीष्टां सिद्धिं लभन्ते। तथा च—

पूर्वोत्तरे प्रज्वलिका निधाने,
सदावसन्तं गिरिजा समेतम्।
सुरासुराराधित पाद पद्मं
श्रीवैद्यनाथं ताहं नमामि।।[७१] इति

नागेश्वर ज्योतिर्लिङ्गम् :

इदानीं शिवस्य दशम् ज्योतिःस्वरूप नागेश्वरलिङ्गविषये किंचित् विविच्यते।

नागेशो दारूका वने[७२]

इदं वनं "बड़ौदा" मण्डलान्तर्गत द्वारिकातः ईशानकोणे कियद्दूरे स्थितो स्ति। केचितु—"हैदराबाद" राज्यान्तर्गत" औढ़ा ग्राम स्थितं लिङ्गमिति स्वीकुर्वन्ति। अस्य लिङ्गावतारस्य रहस्यं अद्भुतं प्रतिभाति। शिवपुराणानुसारं पश्चिपयोधि मध्ये दारूकावनमस्ति इति मन्यते। उक्तञ्च—

पश्चिमे सागरे तस्य वनं सर्वसमृद्धिमत् ।
राक्षसाश्च पृथिव्यां वै नाजगमुश्च गदाचन ।।[७३] इति

कदाचित् पश्चिमसागर तटे धर्मविनाशक असुराणां कुलमासीत्। तेषामधिपःदारुकश्चासीत्। तस्य भार्या दारुका भगवत्याः पार्वत्याः परमभक्ता सीत्। देवानां भयात् ते सुराः

समुद्रमध्ये वासस्थानं चक्रुःर और्वशापात् ते पृथिव्यामागमने सर्वथा असमर्था आसन्। यथा—

मुनेः शापं भयादेव बभ्रमुरुते जले तदा ।।[७४] इति

एकदा जले निवसता जीवान् अपीडयत्। स्थलवासिनो निभयाः किन्तु जलवासीनां कृते कालस्वरूप एव ते आसन्। उक्तञ्च—

यथापूर्वं स्थले लोके भयं चासीन्निस्तरम् ।
तथा भयं जले तेषामासीन्नित्यं मुनिश्वराः ।।[७५] इति

स दारूका एकदा जल विहरता धीवराणां समुदायं कारागारे स्थापितवान् तेषु नाविकसमुदायेषु एकः परमशैवः "सुप्रिय" नामधेयः वैश्यः आसीत्। स प्रतिदिनं विधिवत् पार्थिवार्चनं करोति स्म। तस्य शरीरे भस्म रुद्राक्षश्च राजते स्म। स्वयं शैवसत्वे पि अन्यान् अपि शिवदीक्षामदत्। यथा—

कारागृहगतः सो पि बहूंश्चाशिक्षयत्तदा ।
शिवमन्त्रं च पूजां च पार्थिवीं ऋषिसत्तमाः ।।[७६] इति

एकदा दारूकः कश्चित् सेवक मुखात् सुप्रियस्य पार्थिवार्चन वृत्तान्तं श्रुत्वा तं हन्तुकामो प्रचलितः। तत्क्षणे भवभयहारी भक्तिहितकारी भगवांच्छिवः तन्निर्मित पार्थिवलिङ्गान्निर्गतः। ततश्च वैश्यपतिमभिनन्द्य दारुकासुरसपरिकरमहनत। दारूकस्य भार्या दारूकया तोषिता शिवा निवेदितवती यत् असुराणां समूलोन्मूलनं न करणीयमिति। अतो शिवेनोक्तम् यद् अहमपि स्वभक्तकल्याणार्थम् पालनार्थं च अद्यारभ्य अत्रैव वासं करिष्यामि तदुक्तम्—

स्थास्याभ्यस्मिन् वने प्रीत्या भक्तानां पालनाय च।।[७७] इति

ततः परम् अद्यावधिं यावत् दारूकावने नागेश्वर ज्योतिलिङ्गनाम्ना प्रसिद्धिमवाप।

अस्य ज्योतिर्लिङ्गस्योपलिङ्गम् भूतेश्वर लिङ्गमस्ति। नागेश्वर ज्योतिर्लिङ्गस्य तदुपलिङ्गस्य च दर्शना र्चनात् ऐहलौकिकपारलौकिकञ्चाभीष्टम् प्राप्नुवन्ति भक्तजनाः।

तथा च—

याम्ये सदङ्गे नगरे तिरम्ये,
विभूषिताङ्गं विविधैश्च भोगैः।
सद्भुक्तिमुक्तिप्रदमीशमेकं,
श्रीनागनाथं शरणं प्रपद्ये।।[७८] इति

रामेश्वर ज्योतिर्लिङ्गम् :

परमगुरोः भगवतः शिवस्य द्वादशज्योतिः स्वरूपेषु एकादशः संसारविश्रुत रामेश्वरलिङ्गविषये किञ्चिन्निवेदनं—

सेतुबन्धं तु रामेशम्[७९]

इदं पवित्र तीर्थक्षेत्रं दक्षिणसागर तटे साम्प्रतं "मद्रास" प्रान्ते "रामनद" मण्डले विराजमानो स्ति। अस्य ज्योतिलिङ्गस्य प्रसिद्धिं नास्ति भारते एव अपितु विश्वस्य समग्र भागान्तरालेष्वपि विश्रुतो स्ति। अतएव बहुचर्चित्वात् अस्य विवेचनं संक्षेपेण प्रस्तूयते।

पुरा त्रेतायां भगवान् विष्णुः अयोध्यायां राज्ञः दशरथस्य गृहे पुत्ररूपेणावतीर्य मानवी लीलां च सम्पादितः। कियत् कालानन्तरं श्रीरामस्य प्रियाभार्या सीतायाः हरणं जातम्। इति तु सर्वैरेव जानन्ति। ततश्च सीतान्वेषण तत्परः श्रीराम मर्कटी सेना मादाय पयोधि तटमाससाद। तद्यथा—

पद्मैरष्टादशाख्यैश्च ययौ तीरं पयोनिधेः ।
दक्षिणे सागरे योवै दृश्यते लवणाकरः ।।[८०] इति

परमशैव श्रीरामः तत्रैव लिङ्गरूपेण पार्थिवं निर्माय षोडशेपचारैश्च विधिवत् सम्पूज्य, दिव्यैः स्तवैः प्रतोष्य एव प्रार्थयामास।

उक्तञ्च—

स्वामिच्छम्भो महादेव सर्वदा भक्तवत्सल ।
पाहिमां शरणापन्नं त्वद्भक्तं दीनमानसम् ।।
तस्मिन् देव त्वयाकार्य साहाय्यं मम सुव्रत ।
साहाय्यं ते बिना नाथ मम कार्य हि दुर्लभम् ।।[८१] इति

इत्येवं प्रार्थ्यमाने श्रीरामे आशुतोषः भगवांच्छिवः तत्कालः सुप्रीतः सन् अभीष्ट प्राप्तये वरोदत्तः। अनन्तर पुनः प्रपूज्य प्रदक्षिणं च विधाय शिवेनदत्तं शिवमन्त्रस्य जपं विधाय। पुनश्च समुद्रं प्रार्थयामास, अनन्तरमुग्ररूपं धृत्वा सागरं शासयितुमुद्यतः। महद् भियासागरेण प्रपूजितो श्रीरामः सेनयासह ससुखं पारं गत्वा सपरिकरावणमहनत्।

श्रीरामेण पूजितो प्रार्थितश्च अमलात्मा शिवः तत्रैव सागरतीरे रामेश्वर इति नाम्ना ज्योतिः स्वरूपे प्रतिष्ठितः। तदुक्तम्—

रामेश्वर नाम्ना वै प्रसिद्धो जगतीतले ।[८२] इति

इत्येवं अस्य रामेश्वर ज्योतिर्लिङ्गस्य पूजनास्मरणातः अभीष्टां सिद्धिं प्राप्य चक्रवर्तित्वमपि भक्ताः लभन्ते। उक्तञ्च—

स मे भक्तो ति विक्रान्तो दर्शनं मे करिष्यति ।
दर्शनं मे स कृत्वैव चक्रवर्ति भविष्यति ।।[८३] इति

अतः अस्य ज्योलिर्लिङ्गस्य उपलिङ्गं गुप्तेश्वर नाम्ना विश्रुतः। यथा—

रामेश्वराच्च यज्जातं गुप्तेश्वरमिति स्मृतम् ।।[८४] इति

सदा स्मरणीयो वन्दनीयश्च अयं ज्योतिः स्वरूपमिति। अपि च—

सुताम्रपर्णी जलराशि योगे,
निबध्य सेतुं विशिखैरसंख्यैः।
श्रीरामचन्द्रेण समर्पितं तं
रामेश्वराख्यं नियतं स्मरामि।।[८५] इति

घुश्मेश्वर ज्योतिर्लिङ्गविषये विचारः

क्रमागतं सम्प्रति भवभयहारी, भक्तहितकारी भगवतः पुष्यश्लोकस्य शिवस्य द्वादशमः ज्योतिः स्वरूपस्य विवेचनं प्रस्तूयते।

घुश्मेशश्च शिवालये इति।[८६]

इदं पुण्यतीर्थं दक्षिणस्यां दिशि देवगिरि शैल समीपे "निजाम" मण्डलस्य "दौलताबाद रेलवे स्टेशन" पाश्ववर्ती "वेरूत" नामके ग्रामे विराजमानो स्ति। अस्य ज्योतिर्लिङ्गस्य परनाम "घृष्णेश्वर" घुसृणेश्वरश्चास्ति।

"पुरादेवगिरि समीपे भारद्वाज गोत्रोत्पन्नः सुधर्मानामधेयः कश्चित् ब्राह्मणः प्रतिवसतिस्म। तस्य प्रथमा पत्न्यासुदेहया दीर्घकालं यावत् अनपत्यत्वात्, सैन सुदेहा स्वकीयां भगिनीम सपत्नीत्वेन पत्यासह विवाहमकारयत्। घुश्मानामाख्या तस्यानुजा परमशिवभक्ता सीत्। सा अनुदिनं पार्थिवार्चनपूर्वकं पतिसेवा परायणाश्चासीत्।

सा एकदा प्रजाकामा लक्षसंख्याकं सविधिपार्थिवार्चनं कृता, विसर्ज्य च तानि पार्थिव लिङ्गानि एकस्मिन् पवित्रसलिले सरोवरे न्यपातिता। तेन अर्चनेन पूर्णतुष्टो शिवः तां पुत्ररत्नमेकमददत्। सो पि शिवेच्छया शुक्लपक्षीय चन्द्रवत् शारीरिकवृद्धिं गतः। अल्पकाले गते तस्य पुत्रस्य विवाहादि कमपि सम्पन्नम्। तेन सा घुश्माग्रजा सपत्नीजन्य कष्टेन अतीदुःखिता संजाता। एकदा रात्रौ प्रसुप्तस्य सुदेहया घुश्मापुत्रस्य खड्गेन खण्डितं कृत्वा तस्मिन्नेव जलाशये न्यपातिता यस्मिन् धुश्मा प्रतिदिनं पार्थिवलिङ्गानां विसर्जन कृतासीत्। प्रभाते च पुत्रवध्वा इदं वृत्तान्तं विज्ञाय घुश्मादम्पत्योर्हृदये भृशं दुःखं सजातं, परन्तु सर्वं शिवेच्छया भवतीति विचिन्त्य, तद्दिने पि पार्थिवार्चनं विधाय घुश्मा पतिरादेशात् तस्मिन् जलाशये विसृज्य यदा परावर्तित मार्गे च अम्बा अम्बा शब्द कुर्वन् तस्यापुत्रः अङ्के समापतति। तदपि शिवेच्छा इति विचिन्त्य पुत्रेण सह गृहं समागत्य सा घुश्मा पत्यग्रे सर्वं निवेदवती तस्या घुश्मायाः सत्यनिष्ठां विलोक्य अखिललोकमङ्गलकारी भगवांच्छिवः सुप्रीतः घुश्माग्रे समागत्य वरवाचनाय आदिशति अनन्तरं च लोककल्याणाय स्वनामधन्य-करणाय घुश्मया पाच्यमाने वरे शिवः ओमिति उक्त्वा तस्मिन् सरोवरे पार्थिवलिङ्गे समष्विष्टो संजातः। ततश्च ज्योतिः स्वरूपे समुद्भूतः। घुश्मार्चनेन शिवस्य तत्कालतः घुश्मेश्वर ज्योतिर्लिङ्ग इति नाम्ना लोके प्रसिद्धिश्वाप। पुनश्च तत्र सिद्धऋषि मुनयो समागत्य तं लिङ्गम्

विविधवदपूजयत्। अतएव अस्य ज्योतिः स्वरूपस्य अर्चनेन, स्मरणेन च शैवाः सर्वसिद्धिं प्राप्य अन्ते शिवलोकमपि प्राप्न्वन्ति। तदुक्तम्[८७]—

घुश्मेशाख्यमिदं लिङ्गमित्थं जातं मुनिश्वराः ।
तद् दृष्ट्वा पूजयित्वा हि सुखं सम्बर्द्धते सदा ।।
इतिवश्चसमाख्याता ज्योतिर्लिङ्गावली मया ।
द्वादश प्रमिता सर्वकामदा भुक्तिमुक्तिदा ।।
एतज्ज्योतिर्लिङ्ग कथां यः पठेत् शृणुयादपि ।
मुच्यते सर्वपापेभ्यो भुक्तिं मुक्तिं च विन्दति ।।[८८] इत

घुश्मार्चितलिङ्गानामालयभूत तत्सरोवः शिवालय नाम्ना लोके प्रसिद्धः। एतेनोक्तम् "घुश्मेश्च शिवालये" इति। अस्य घुश्मेश्वर ज्योतिर्लिङ्गस्य उपलिङ्गम् (व्याघ्रेश्वर) नाम्ना प्रसिद्धम्। भूतले एवं द्वादश ज्योतिर्लिङ्गनामवताराः प्रदर्शिता शास्त्रकारेण सर्वजनहिताय सर्वजनसुखाय इति विचारमुररीकृत्य। अतः आत्मकल्याणार्थं लोककल्याणार्थञ्च अवश्यमेव एषां लिङ्गानाम अर्चनं, वन्दनं, स्मरणं, कथा श्रवणं च करणीयमिति। अपि च—

इलापुरे रम्य विशालके स्मिन्,
समुल्लसन्तं च जगद् वरेण्यम्।
वन्दे महोदारतर स्वभावं,
घृष्णेश्वराख्यं शरणं प्रपद्ये।।[८९] इति

गणेश प्रथम पूज्यत्वे हेतुः

प्रथमस्तु विचारणीयो यं विषयः यत्-को यं गणेशः ? कुतः समुत्पन्नः ? कौ च पितरौ। कीदृशं तस्य चरित्रम् ? केन सर्व प्रथमं आराधितम् कथं वा केन प्रथमपूज्यत्वे शक्तिर्मिलिता ? इत्यादयो नेके प्रश्नाः स्वाभाविकतया दृष्टिपथे समुपस्थिताः संजाताः। स्वाभाविकी जिज्ञासा पूर्तये क्रमशो वर्ण्यते मया।

पुराकल्पे एकदा भगवान् नारदः पितरं ब्रह्माणमासाद्य प्रोवाच। यत् हे पितः भवता मुखेन मया बहुशो श्रुतं, इदानीं सर्वमङ्गलमङ्गलम् श्रीगणेशस्य दिव्यं जन्म-चरित्रवृत्तान्तं श्रोतुमिच्छागि। इत्युक्ते नारदे लोकपितामहब्रह्मा उवाच हे तात् ? कल्पभेदात् गणेशस्य अनेके जन्मादयो संस्कारः समुपलभ्यन्ते। उक्तञ्च—

कल्पभेदाद् गणेशस्य जनिः प्रोक्ता विधेः परात् ।
शनिदृष्टं शिरः छिन्नं संचितं गाजमाननम् ।।
इदानीं श्वेत कल्पोक्ता गणेशोत्पत्ति रुच्यते ।
यत्र छिन्नं शिरस्तस्य शिवेन च कृपालुना ।।[९०] इति

अत्र श्वेतकल्पस्य नामोच्चारण कृतम् विद्यते। अतः शिवपुराणमधिकृत्य विविच्यते।

कदाचित् भगवान् शिवः शिवयाः सह विवाहं कृत्वा कैलासमगमत्। शिवा च गृहे अधिवसति जया—विजया सह एकाकी। सर्वे गणाः शिवा ज्ञापरायणा इति विज्ञायते गिरिजा समीपे गत्वा उचतुः। हे देवि ? अस्मदार्थं त्वया रचनीयो एकोगणः। देवीरपि स्वाज्ञापरायण गण उत्पादने विचिन्तयति।

एकदा भगवती गिरिजा स्नानं कुर्वता स्वशरीर मलतः एकं गणं उत्पादयामास। सर्वावयव सुपुष्टं सर्वलक्षण लक्षितं तं विलोक्य वात्सल्यनेहात् देवीमुमोह। अनन्तरं च तं वस्त्राभूषणैः विभूष्य प्रतोष्य च तद्धस्ते लगुडमेकं दत्वा द्वारपालत्वेन नियुज्य आदिशति यत् मदाज्ञाविना न कोपि प्रविशतु इति त्वंया सम्यक् रक्षणीयम्। इति कथयित्वा आभ्यन्तरेगत्वा सख्यौ (जया-विजया) सह वार्तालापं, नित्य क्रियादिं कुर्वता अधितिष्ठति भगवती गिरिजा। किञ्चित् समया नन्तरम् भगवान् शिवः द्वारदेशमाजगाम। द्वारि च सर्वाङ्गसुपुष्टं अपरिचितमेकं गणमवलोकितः। शिवो पि तं अगणयन् अन्तःपुरे प्रवेष्टुं वांच्छति किन्तु गणेशेन निवेधितः सन् किंचित् क्रोधं कृता प्रोवाच—

मूर्खो सि त्वं न जानासि शिवो हं गिरिजापतिः ।
स्वगृहं यामिरे बाल निवेधसि कथं हि माम् ।।
इत्युक्त्वा प्रविशन्तं तं महेशं गणनायकः ।
क्रोधं कृत्वा ततो विप्रदण्डेना ताडयत्पुनः ।।[११]

इदं प्रसङ्गं स्मृत्य पुनः ब्रह्मा नारदं प्रति उक्तवान्। हे तात् ? गणेशेताडिते सति शिव भृशं चुकोप। अनन्तरं च अस्य कृत्यस्य प्रतिफलं प्रदानाय गणान् आदिशति। ते पि गणेशं समासाद्य अनेकप्रकारैः द्वारतः न्यवारयितुं प्रयतन्ते, किन्तु निष्फलत्वमादाय शिवसमीपे गच्छन्ति अतः परं चुकुप्य युद्धार्थमादिशति। नन्दी, भृंगी, भूत-प्रेत, बेतालादयो स्व-स्व शस्त्राणि नित्वा मारणार्थं समागच्छन्ति, किन्तु सर्वे एकाकी गणेशेन पराजितोपलायितश्च। पुन शिवेनादिष्टा इन्द्र, वरुण, विष्णुब्रह्मादयो पि सेनया सह युद्धार्थमायान्ति। ते पि गणेशे अतुलबलपराक्रमेण आहतो भूत्वा पलायितोजातः।

तदनन्तरं शिवेन सह तुमुलं युद्धमजायत अन्ते भगवान् शिवः त्रिशूलेन तस्य शिरश्चिच्छेद। नारदेन एतत्सर्वगाकर्ण्य शिवा अतीव दुःखिता संजाता। कथिता च तया—

किं करोमि क्व गच्छामि हाहा दुःखमुपागतम् ।
कथं दुःखं विनश्येतास्याति दुःखं ममाधुना ।।
मत्सुतो नाशितश्चाद्य देवैसवैर्गणैस्तथा ।
सर्वांस्तान्नाशयिष्यामि प्रलयं वा करोम्यहम् ।।[१२] इति

संक्रुध्य च शिवा शतसहस्र शक्तयः समुत्पादिता। ताः सर्वाः तदाज्ञया संहारकरणे प्रवृत्ताः संजाताः। बहुविध प्रलयं दृष्ट्वा ब्रह्मादयो देवाः विष्णु-शिवपुरोगाः देव्या समीपे आगत्य

बहुभिः स्तुतिभिः स्तुतः। किंचित् प्रीता देव्या "मत्पुत्रो जीवितश्चेत् लोककल्याणं भविष्य अन्यथा संहार तु ध्रुवमेव" इत्युक्तवति।

शिवाज्ञया इन्द्रादि देवा विश्रुत्य यत् मार्गे उदिच्यां सर्वप्रथम यः मिलिष्यति तस्यैव शिरः संयोजनीयः इति ते गणेशमादाया उत्तरस्यां दिशि प्रचलिताः मार्गे च नवजात एकदन्तकरेणु शिशुः प्राप्तः तस्यैव शिरश्छिद्य संयोजयत्। तत्क्षणे संज्ञाप्राप्य गणेशपुनरुज्जीवतः। तमादाय सर्वे देवाः पुनः तेषां पार्श्वेसमागताः। तं विलोक्य ब्रह्मादयो देवा सहैव अब्रूवन् यद् अयं बालकः प्रणम्योसंस्यात्। तथा च सर्वे वेदमन्त्रैः अभिषिच्च कथयन्ति—

तस्मात् स्वतेजसः सर्वे वयं जाता महात्मनः ।
त्वत्तेजस्तत्समायातु वेदमन्त्राभि चोगतः ।।
इत्येवमभिमन्त्रेण मंत्रितं जलमुत्तम् ।
स्मृता शिवं समेतास्ते चिक्षिपुस्तत्कलेश्वरे ।।[९३]

अनन्तरं सुभगः सुन्दरतरः सुरक्तकः पुत्रं प्राप्य देवी प्रमुदिता जाता। उक्तं च—

तुं दृष्ट्वा जीवितं बालं शिवापुत्रं मुनीश्वरः ।
सर्वे भुमुदिरेतत्र सर्वं दुःख क्षयं गतम् ।।
देव्यै संदर्शयामासु सर्वे हर्ष समन्विताः ।
जीवितं तनयं दृष्ट्वा देवी हृष्टतदा भवत ।।[९४] इति

अतः परम् शिवा स्वपुत्रं अंके समारोप्य अनेकवस्त्राभूषणैः विभूष्य च सर्वासां सिद्धीनां वासः पुत्रे चकार। अनन्तरं च उत्थाय गणेशः पूर्वं शिवं, विष्णुं, ब्रह्माणं, शिवां, नारदादि ऋषिन् प्रणमति। सर्वे शुभाशीषः ददनि। ततः सर्वे देवा सहैव प्रत्युचुः।

वयं च प्राकृतश्चायं प्राकृतः पूज्य एव च ।
गणेशो विघ्नहर्ता हि सर्व कामफल प्रदः ।।
एतत्पूजां पुराकृत्वा पश्चात् पूज्या वयं नरैः ।
वयं च पूजिताः सर्वे नायं च पूजितो यदा ।।
अस्मिन्नपूजितेदेवा पर पूजा कृतायदि ।
तदा तत्फलहानिः स्यात् नात्र कार्याविचारणा ।।[९५] इति

एतेन सर्व विधमान्यता प्राप्त गणेशस्य प्रथम पूज्यत्वं प्रतिपादितमस्ति। तथा चाग्रे—

इत्युक्त्वा स गणेशानो नानावस्तुभिरादरात् ।
शिवेन पूजितः पूर्वं विष्णुना नुप्रपूजितः ।।
ब्राह्मणा च मया तत्र पार्वत्या च प्रपूजितः ।
सर्वेर्देवगणैश्चैव पूजितः परया मुदा ।।[९६] इति

एतेना पि गणेशस्य प्रथमपूज्यत्वं स्वीकरणीयम्। अपि च—

पुनश्चैव वरोदत्तः सुप्रसन्नेन शम्भुना।
तस्मै च गणनाथाय शिवेनैव महात्मना।।
चतुर्थ्यां त्वं समुत्पन्नो भाद्रेमासि गणेश्वर।
असिते च तथा पक्षे चन्द्रस्योदयने शुभे।।
प्रथमे च तथा यामे गिरिजायाः सुचेतसः।
आविर्बभूव ते रूपं यस्मात्ते व्रतमुत्तमम्।।

अयं अपि गणपतेः, प्रथमपूज्यत्वे हेतुः। एवं विधानि अनेकानि शुभाशीषानि प्रदाय, शिवेनैव व्रतविधिं, पूजनविधिं उद्यापन विधिं च कथितं। इत्यादयो नेके प्रसङ्गा गणेशस्य प्रथमपूज्यते हेतुरूत्पाद्यन्ते।

प्रसङ्गवशात् मध्ये गणपते र्विवाह प्रसङ्गो पि अतीव रोचकः तस्य प्रथमपूज्यत्वे हेतुरपि उत्पादयति। यथा—

कियत् कालान्तरे उभौ=कार्तिकेय-गणेश कुमारौ तरुणौ संजातौ। एकान्ते विद्यमाने शिव-शिवा तरुणौ सुतौ विलोक्य तयो र्विवाह विषयक चर्चाकृतौ श्रुत्वा च तौ कुमारौ विवाह विषये अहं पूर्वं अहं पूर्वमिति निगदितौ। कुमारयोः उक्तिं श्रुत्वा शिवेनाभाषितं यत् तयोर्मध्ये यः सर्वप्रथमं पृथिव्याः सप्तपरिक्रमणं विधाय अत्रागमिष्यति, तस्यैव विवाहो पूर्वं भविष्यति नानयथा। श्रुत्वैव कुमारकार्तिकेयः परिक्रमणार्थ प्रचलितः, किन्तु गणेशः प्रकृतितः तुन्दिलः वाहनञ्च मूषकमेव विचार्य नोगतः। स तु स्नानादिक नित्यक्रियानिवृत्य पितरौ सम्पूज्यविविधोपचारैः, सप्तपरिक्रमणं च विधाय उवाच—हे पितरौ पूर्व मदेव विवाहं भविष्यति। इति सूतोक्तिं श्रुत्वा शिवः प्रोवाच—मया पूर्वमेव निगदितं यत् पृथिव्याः सप्तपरिक्रमणं विधाय पूर्वमागमिष्यति तस्यैव विवाहो पूर्वम् भविष्यतीति तद् गच्छ परिक्रमणार्थम्। गणेशेनोक्तम्—हे प्रभो यदा मया भवतः प्रदक्षिणा कृता तर्हि पृथिव्याः प्रदक्षिणा अवशिष्टं किं ? विचारयतु देव ? वेदादिशास्त्रे पि वर्णितं यत् पितरौ पूजिते सर्वेषां पूजा स्वतः सम्पन्ना इति।[९८] एवं पुत्रोक्तिं निशम्य शिव-शिवा पुत्र ज्ञानस्य भूरि-भूरि प्रशंसनं कृतम्।

अस्मिन् प्रसङ्गे पि पूजा विषये गणेशस्यैवप्रथमपूज्यत्वेहेतुर्विद्यते। एकस्मिंन्काले विश्वरूप प्रजायतेः दिव्यरूपगुणसम्पन्न उभे सुते स्तः। तयोर्विवाहार्थम् समागत्य प्रजापतिः गणपति विवाहार्थ शिवेन वार्ता चकार। तदाज्ञया गणेशेन सह विश्वरूपप्रजापतिः उभे कन्यके उवाह। तस्मिन् महोत्सवे सर्वेदेवाः, ऋषयः, किन्नराः, यक्षाः गन्धर्वादयश्च समागमन्। गणेशो पि भार्याभ्यां=सिद्धि बुद्धिभ्याम् सह मुमुदे। कतिचित् वर्षाण्यनन्तरं ताभ्यां एकैकम् सुतौ क्षेम-लाभ नामाख्यौ संजातौ। उक्तञ्च—

कियता चैवकालेन गणेशस्य महात्मनः ।
द्वयोः पत्योश्च द्वौ दिव्यौ तस्यपुत्रौवभूवतुः ।।
सिद्धेर्गणेशपत्यास्तु क्षेमनामासुतो भवत् ।
बुद्धेर्लाभधियः पुत्र आसीत् परमशोभनः ।।[९९]

इत्येवं मया बहुशो गणपतेश्चरित्रं प्रस्तुता येषु बहूत्र प्रायः सर्वत्रैव गणेशस्य प्रथम पूज्यत्वे हेतुरेव दृश्यन्ते। एतेन गणेशस्य प्रथम पूज्यत्वं स्वीकर्तव्यम्।

अन्यतो पि—

वस्तुतः आदिदेव गणेशस्य शास्त्रे अनेके नामाः प्रचारिता विद्यन्ते। तेषु गणपतिः, गणेश्वरः, गणाधिपः, विघ्नेश्वरः, विनायकः किमधिकम अस्य देवस्य शास्त्रे सहस्रनामाख्य चर्चा वर्णिता संजाता।

गृह्यसूत्रेषु विनायकस्याराधनमपि रूद्रेण सहैव प्रातिपादितम्। तस्यानेकानि नामानि सन्ति। स च असन्तुष्टो विघ्नकरः सन्तुष्टश्च विघ्नहरो भवति। विनायकस्य कोपे सति लक्षणवन्तो पि राजपुत्रा राज्यं न लभन्ते। पतिकामाश्च लक्षणवत्यः कन्या भर्तृन् न लभन्ते, लक्षणवत्यश्चस्त्रियः प्रजाकामा प्रजां न लभन्ते। आचारवतीनां नारीणां अपत्यानि मृयन्ते। श्रोत्रियोध्यापकः योग्यतानुसारं आचार्यत्वं न प्राप्नोति। अध्येतृणामध्ययने महान्ति विघ्नानि समापतन्ति। वणिजां वाणिज्यपक्षाः विनश्यन्ति। कृषिबलानां कृषिरल्पफला भवति।

अतः तस्यानुकूल्याय बहवो यत्नाः प्राक्तनकालादेवारभ्य अद्यावधि अनुष्ठियन्ते।[१००]

बौधायनगृह्यसूत्रे पि—विनायकस्य अर्चनायाः विधिः निर्दिष्टो वर्तते—तत्र हि मासि-मासि कृष्णपक्षस्य चतुर्थ्याम् शुक्लपक्षस्य पञ्चम्याम् वा अभ्युदयैः, सिद्धिकामः ऋद्धिकामः पशुकामो वा भगवतो गणेशस्य बलिं हरेत्।

विघ्नविघ्नेश्वरागच्छ विधिवत्येव नमस्कृत ।
अविघ्नाय भवान् सम्यक् सदस्माकं भव प्रभो ।।[१०१] इति

अस्य विनायकस्य धर्मसूत्रेषु वर्णितस्यहस्तिमुख, वक्रतुण्ड प्रभृत्युपाधिभिः साधर्म्यम् विधत्ते। तस्योपाधि गणेश्वर इत्यपि आसीत्, यश्चाग्रे गणेश इति प्रसिद्धिं जगाम। गुणधर्मेण-गणेशः पितुः रूद्रमनुकरोति। अतः शिवस्य प्रधानपार्षद पदमलङ्कुर्वाणो यं गणपतिः, शिवशक्तिं च सन्तोष्य परिवर्तिकाले पूज्याग्रेषु अग्रगण्यतामवाप। इति सुधियः जानन्त्येव। एकस्यैव शिवस्योपासना प्रक्रियायां भेदान् प्रकल्प्य शिवपार्षदेषु गणेश्वरस्यायोजनं विधाय, विनायकस्य शिवसुतत्वात् तद् गुणधर्मानुकारित्वे न भाव्यमिति निग्रहानुग्रहाकारित्वं गणेशस्य सम्भवतीति।

उत्खनन प्रमाणेषु, शिलालेखेषु, सर्वतः प्राचीन प्रमाणं सिन्धुसभ्यतायाः प्राप्यते। तत्र हि शिवशक्तिमूर्तीनां अवशेषेण तदानीन्तन काले शिवशक्त्याराधनं भवति स्म।

अतः वैदिक परम्परायाः सूत्रग्रन्थं यावदनुशीलनेन "मोहन जोदरोहरप्पा" नाम्नि सिन्धुसभ्यतायाः उत्खनन प्रमाणेन च स्पष्टं प्रतिभाति यत् शैव शाक्त परम्परा अनादिकालादेव प्रचलतीति। इदानीमपि प्रचलति कालक्रमेण वैदिकरूद्र एव शिव पदवीकः पराम्बा शक्तिः एव पार्वती पदवीका, विनायक एव गणेशपदवीको जात इति।

काल-क्रमेणैव वैदिककाराधनपरम्परायां क्वचित् परिवर्तनम् विधाय, देवालयानां, मूर्तीनां, पूजापद्धतीनां, पूजोपयिक समाग्रीणां च भेदाः प्रादुर्बभूवुः। तत्रापि सर्वत्रैव गणेशस्यैव आराधनायाः प्रभावो वर्णितः।

अतएव गणेशस्य प्रथमपूज्यत्वे हेतुरूपेण, वेद, पुराण, स्मृति शास्त्र, धर्मसूत्र, गृह्यसूत्राणां वचनानि प्रमाणिता प्रमाणानि सन्ति। इतिशम्।

शिवस्यसगुण निर्गुण भेदाः

संस्कृतवाङ्मयस्य प्राचीनतमोपलब्धिः वेदो स्ति। इति वैदिकसाहित्यानुशीलेनावगम्यते। वेदेषु रूद्ररूपेण कीर्तितो देव एव परिवर्तिसाहित्य काले शिव पदवीमधि जगाम। स चैव हि शक्त्या भिन्न इति विचार विषयिको निखिलशास्त्र प्रकाशकः परमगुरुपदवीमलञ्चकार। अस्यैव परमभट्टारस्य शिवभिन्नस्य निग्रहानुग्रहशक्तस्य प्राकाशस्वरूप परमस्वतन्त्रस्य तत्त्वस्वरूपस्यैव रूद्र, शिव, काल प्रभृत्यनेकैः परश्शतैः शब्दैः शास्त्रेषु निरूपितो विद्यते। शिवपुराणे हि निर्गुण शिवविषयक विवेचनम्—

विश्वोद्भवस्थितिलयादिषु हेतुमेकं गौरीपतिं विदिततत्वमनन्तकीर्तिम्।
मायाश्रयं विगमायमचिन्त्यरूपं बोधस्वरूपममलं हि शिवंनमामि।

वन्दे शिवं तं प्रकृतेरनादिं प्रशानतमेकं पुरुषोत्तमं हि ।
स्वभामया कृत्स्नमिदं हि सृष्टवानभोवदन्तर्बहिरास्थितोयः ।।
वन्दे न्तरस्थं निजगूढ़रूपं शिवंस्वतः स्रष्टुमिदं व्यचष्टे ।
जगन्ति नित्यं परितोभ्रमन्ति यत्सन्निधौ चुम्बकलोहवत्तम् ।।[१०२]

इति निर्गुण रूप शिवंध्यात्वा नैमिषक्षेत्रे सूतं प्रति ऋषयो ऊचुः। हे परम् भागवत इदानीं भगवतः शिवस्य दिव्यचरित्रं श्रोतुकामोवयम्। महेश्वरः कथं सगुणतां याति कथं च निर्गुणताम् ? सृष्टेः पूर्वम् तस्य कीदृशं स्वरूपं मध्ये वा अन्ते च कीदृशम् ? कथं च प्रसन्नतां याति, प्रसन्नेन स किं करोति ? स्वभक्तेभ्यो परेभ्यश्च कीदृशं फल ददाति इति सर्वं संक्षेपतः श्रावयतु।

अस्य प्रश्नोत्तरे वस्तुतः निखिलतत्त्वक्षः शिवः निर्गुण एवा स्ति। अस्मात् निर्गुणस्वरूपादेव त्रिलोकमजनयत्। स एव पिण्डोभूत्वा त्रिधाविभज्य च ब्रह्मा, विष्णु, शिव इति नाम्ना प्रसिद्धिं जगाम। स्वभक्त रक्षणाय स सगुणतां प्राप्नोति। सृष्टेः पूर्व स खलु स्वर्णपिण्ड-

स्वरूपे आसीत्। स एव भगवान् सृष्टपादौ रजरूप ब्रह्माभूत्वा विश्वं रचयति। सृष्टिमध्ये सत्त्वगुणाश्रये विष्णुरूपेण विश्वं रक्षति अन्ते च तमगुणावलम्ब्य स्वतः संहरति। इति। श्रद्धया, भक्तया, चार्चनेन प्रसन्नो भवति। प्रसन्ने सति स्वभक्तेभ्यो अभीष्टं प्रददाति।

निर्गुणशिवसय महाकाल स्वरूप वर्णनम् :

वस्तुतः शिवः अनामय स्वरूपो स्ति अस्य तत्त्वस्य वास्तविक परिज्ञानं च कोपि कर्तुं शक्नोति। उक्तं च—

महा प्रलयकाले च नष्टे स्थावर जंगमे ।
आसीत्तमोमयं सर्वमनर्कग्रहतारकम् ।।
अप्रमेयमनाधारमविकारमनाकृति ।
निर्गुणं योगिगम्यञ्च सर्वव्याप्येक कारकम् ।।
निर्विकल्पं निरारंभं निर्मायं निरूपद्रवम् ।
अद्वितीयमनाद्यन्तमविकासं चिदात्मकम् ।।
अमूर्ते यत् पराख्यं वै तस्य मूर्तिः सदाशिवः ।
अर्वाचीना पराचीना ईश्वरं तं जुगुर्वुधाः ।।[१०३] इति

उपर्युक्त श्लोकेषु भगवतः शिवस्य यथार्थ निर्गुणस्वरूपस्य कीदृशं मनोहारि चित्रणं चित्रितं वर्तते। अस्तु—निर्गुणत्वे पि शिवः शिवा सह सगुणवत् आनन्दवने विहरति। इति शिवपुराणे द्रष्टव्यम्।

निर्गुणशिवस्वरूपता एव ब्रह्म विष्णवादीनामवतारोजातः तथा च तेनैव ॐ प्रणव पूर्वकं गायत्रीमन्त्रस्याप्युत्पत्तिः, पञ्चाक्षरमन्त्र चिन्तामणि मत्रः उत्पद्यते।

पुरा भगवान् शिवः निर्गुणस्वरूपात्मकः आसीत् तदा सः निर्गुणः निर्विकल्पः, निराकारः, चिन्मात्रः, सद्सद्परः पुनरपि शिवस्वरूप एवा सीत्। उक्तञ्च—

पुरायदा शिवो देवो निर्गुणो निर्विकल्पकः ।
अरूपः शक्तिरहितश्चिन्मात्रः सदसत्परः ।।[१०४] इति

सगुण स्वरूप विवेचनम् :

भगवान् शिवः शिवायै सगुणस्वरूपे अवतरिता। सगुणरूपे पि स देवः बहुविधालीलां चकार। इति विविधपुराणैः सह शिवपुराणे पि वर्णितः। यदा स सगुण स्वयपे आयातः तदा पूर्वम् वामांगात् विष्णुः दक्षिणाङ्गजो ब्रह्मा उत्पादयामास। ततः त्रिधाभूतः सन् जगदुत्पत्तौ, पालने, लये च समासक्तो जातः इति पुराणप्रसिद्धिः। उक्तं च शिवपुराणे—

अभवत् सगुणः सो पि विरूपः शक्तिमान प्रभुः।
सोमो दिव्याकृतिर्विप्र निर्विकारी परात्परः ।।
तस्य वामाङ्गजो विष्णुर्ब्रह्मा हं दक्षिणांगजः ।
रूद्रो हृदयतो जातो भवच्च मुनिसत्तम ।।

सृष्टिकर्ता भवं ब्रह्मा विष्णुः पालनकारकः ।

लय कर्ता स्वयं रूद्रस्त्रिधाभूतः सदाशिवः ।।[१०५] इति

एभिः श्लोकेः परिलक्ष्यते यत् भगवता शिवेनैव अखिल विश्वस्योपत्ति संजाता। तदाक्षया एव ब्रह्मा उत्पत्तौ, विष्णुः पालने संहारकरणे च स्वयं प्रवृत्तौ स्ति। संहार कत्वे सति मनेप्सित अभीष्टमपि प्रददाति शिवः।

संहिताग्रन्थेषु भगवतः शिवस्य विभिन्नानि चरित्राणि अनेकानि च नामानि समुपलभ्यन्ते। तद्यथा—

तैत्तिरीय संहितायाम् शिवस्य विविधरूपा स्तुतयो पि दृश्यन्ते। तत्र शिवस्य कुत्रचिदग्निना, कुत्रचिद्सूर्येण कुत्रचिद् त्रयम्बकहोमेन, शतरूदियस्वरूपेण, शिवरूपेण, पशुपतिः रूपेण च वर्णनम् समुपलभ्यते।

केचन शिवस्य नाम्नः सार्थक्येन, मरूतां साहचर्येण, तस्य वभ्रु वर्णेन, प्रायः क्रूर कर्मणा, तथा संहारकत्वेनामनन्ति।

सगुण निर्गुणसमन्वित भेद कथनम् :

कदाचित नैमिष क्षेत्रे समुपविष्टानां ऋषीणां हृदये जिज्ञासा समुत्पन्ना यत् त्रिदेवेषु कः सगुणः निर्गुणश्चकः। उक्तञ्च—

शिवः को वा हरिः को वा रूदः को वा हरिश्चकः ।

एतेषु निर्गुणः को वा ह्येतं नश्छिन्धि संशयम् ।।[१०६] इति

समाधानकर्ता सूतः प्रोवाच—सृष्टयग्रे यो देवः स एव शिवः निर्गुणरूपे आसीत्। तेन नैव उत्पादिता प्रकृति पुरुष जलान्तरे तपस्तप्तुं प्रविष्टे जातः। तस्यैव स्थानविशेषस्य पञ्चक्रोशीति नामान्तरे काशीक्षेत्राख्ये प्रसिद्धिं विद्यते द्यापि। प्रसुप्ते प्रकृति-पुरुषे "यस्माज्जायते यस्मिन्नलीयते जगत इति जलम्" इति वेदान्तवर्णनानुसारं भगवान् विष्णुरपि तत्रैव प्रसुप्तः। तस्मात् नरं=जलम् एव अयनं आश्रयं यस्य सः विष्णु नारायण नाम्ना अभिहितो जातः। तस्यैव नाभिकमलात् ब्रह्मायत्पद्यते। पुनः ब्रह्मा तपश्चकार। अनन्तरं च सुप्रीतः विष्णोः दर्शनम् कृतम्। तयोर्मर्ध्ये जनकविषये बहुविध विवादं समभवत्। तदा एव ब्रह्मणो कपालात् प्रकटितो योदेवः स शिवो स्ति, रूद्रो स्ति। समुचितं निर्णायकत्वेन महादेव इति तस्यैक संज्ञा। स महादेवः लोकानुग्रहकारको स्ति। उक्तञ्च—

ध्यानार्थं चैव सर्वेषामरूपो रूपवान्भूत ।

स एव च शिवः साक्षात् भक्तवात्सल्यकारकः ।।

शिवे त्रिगुणस भिन्ने रूद्रे तु गुणधामनि ।

वस्तुतो न हि भेदो स्ति स्वणेतद्भूषणे यथा ।।

समानरूप कर्माणौ समभवत्गाति प्रदौ ।
समानाखिल संसेव्यौ नाना लीलाविहारिणौ ।।
सर्वथा शिवरूपो हि रूद्रो रौद्र पराक्रमः ।
उत्पन्नो भक्त कार्यार्थं हरि ब्रह्म सहायकृत् ।।[१०७] इति

उपर्युक्त श्लोकेषु सम्यक् परिज्ञायते यत् वस्तुतः शिवः सगुण-निर्गुण उभयात्मक स्वरूपो स्ति। अपि च शिवपुराणे द्रष्टव्यम्—

स एव शंकरः साक्षात् सर्वानुग्रह कारकः ।
कर्ता भर्ता च हर्ता च साक्षी निर्गुण एव हि ।।
अन्येषां कालमानं च कालस्य कलना न हि ।।
महाकालः स्वयं साक्षान्महाकालीसमाश्रितः ।।
नतस्योत्पादकः कश्चित् भर्त्ताहर्ता न तस्य हि ।
स्वयं सर्वस्य हेतुस्ते कार्यभूताच्च्युतादयः ।।
स्वयं च कारणं कार्यं स्वस्यनैव कदाचन ।
एको प्यनेकतां यातो प्यनेकोप्येकतां व्रजेत् ।। इति

एतेनापिं लक्ष्यते यत् शिवःस्वस्यपरस्य च कर्ता भर्ता हर्ता स्वतः एव। स एव भक्तानां कल्याणकर्ता, अन्येषां कालगणकः किं बहुना कालस्यापि महाकालो स्ति। अत एव वेद, पुराण, धर्मशास्त्र, संहिताग्रन्थ, सूत्रग्रन्थ, वेदान्ताद्यनुशीलनेन शिवस्य वास्तविक स्वरूपविषये सर्वे नेति नेति उक्त्वा सगुण-निर्गुण उभयात्मक स्वरूप एव स्वीक्रियन्ते।

परं वयम् भारतीयाः मङ्गलामङ्गल विरुद्ध धार्मिक निखिल संसर्गसमन्वित शिवा-शिव सिता-सितातिदूराति सन्निधि विग्रहानुग्रह करणान्यव्याकरण सर्वर्थ सर्वाभीष्टः तत्त्वातीतो नतीतश्च कश्चित् विलक्षण समस्त वैलक्ष्ण्य गुणगणानामेकाक्यः क्वचिदीश्वरः गुरुः ज्ञानरूप एव रुद्रः, शिवपदमलंकरोतीति मन्यामहे।

स एव विचित्रासनाशन शयनवाहनास्त्रशस्त्राभूषण परिवेशादि वृन्दपुत्र-कलत्रादि मण्डितः। अशिव वेशस्थितो पि शिवस्वरूपः कालजयी, अजः शिवः महादेवपदवीकः, समस्तविरोधानां समाहर्ता, विषं पित्वाप्यमृतः, पिण्डमूर्तिः, विविधरूपेणाराध्यः आशुतोषः रुद्रः समस्त शस्त्रोपजीव्यः अनाख्येयो पि तत्त्वज्ञैराख्येयः, प्रकाशस्वरूपः शिव इति मन्यामहे।

सन्दर्भ

१. रामचरितमानसे सुन्दरकाण्डे रामेश्वरलिंगस्थापन प्रसंगे।
२. अग्निपुराणे ४५ अध्याये १-२-३-७ श्लोकेषु।

३. शिवपुराण विद्येश्वरसंहितायां ११ अ० २, ३, ४, ५, ६, ७, ८ श्लोकाः।
४. वही, १६ अ० ५, ६, ७, ८ श्लोका।
५. वही, १८ अ० २।३ श्लोकाः।
६. शि.पु.वि.सं. १८ अ. १३।१५ श्लोकः।
७. वही, १९ अ. ३, ७, ९, १०, ११, १२, १३, १४, १५, १७, १८ श्लोकाः।
८. वही, २१ अ. ३, ४, ५, ६, ७, ८, ९, १०, ११, १२ १३, १४, २३
९. अमरकोषः १।४
१०. शि.पु.वि.सं. १७ अ. ४।५।८।९ श्लोकाः।
११. वही, अ. १३
१२. विष्णुपुराणे ३।३।२२
१३. वही, २।८।५५-५६
१४. शि.पु.रू.सं. १८ अध्याये १७।४२
१५. शि.पु. कैलास संहिता ३ अध्याये ५।६।९
१६. श्रीमद्भगवद्गीता ७।२३
१७. शि.पु. कै.सं. ३ अध्याये १७।१८
१८. कठोपनिषद् १।२।१५।१७
१९. शि.पु.कै.सं. ३ अ. १०।१४
२०. गीता ८।१३
२१. शि.पु.कै.सं. अ. ६।६१।६२
२२. छान्दोग्योपनिषद् शांकरभाष्य १।१·११
२३. माण्डूक्योपनिषदि।
२४. शि.पु.कै.सं. अ. ११।४९
२५. श्वेता. उपनिषद् १।१३
२६. श्रीमद्भा. १२।६।३९।४१
२७. माण्डूक्योपनिषद् १।११
२८. अथर्ववेद
२९. गोपथ पू. १।३९
३०. गा.आ. पृ. ११।
३१. शि.पु.शत.रू.सं. ४२।२'३'४ श्लोकाः।
३२. वही, १४।८
३३. वही, १४।१९

३४. शि.पु.को.रू.सं. १४।३४
३५. शि.पु. ४।१४।४५
३६. वही, ४।१४।५०
३७. स्तोत्ररत्नावली गीताप्रेस, गो.पु. द्वादश ज्योतिर्लिङ्गस्तोत्रे-१ श्लोकः।
३८. शि.पु. २।४।१९।१८
३९. वही, २।४।१९।३९
४०. वही, ४।१५।१६
४१. वही, ४।१५।१९
४२. वही, ४।१।३६
४३. स्तो.र.जी.गो.द्वा.ज्यो. स्तोत्रे-२ श्लोकः।
४४. शि.पु. ४।१६।११
४५. वही, ४।१६।१६
४६. वही, ४।१६।३७
४७. वही, ४।१६।३८
४८. वही, ४।१६।४६
४९. वही, ४।१६।५१
५०. स्तो.र.गी.प्रे.गो.द्वा.ज्यो. स्तोत्रे-३
५१. शि.पु. ४।१८।२२-२३
५२. वही ४।१।३८
५३. एतो.र.द्वा.ज्यो. स्तोत्रे ४
५४. शि.पु. ४।१९।६-७
५५. वही, ४।१९।२२
५६. स्तो.र.द्वा.ज्यो. स्तोत्रे ५
५७. शि.पु. ४।२० अध्यायस्य सारांशः।
५८. वही, ४।२२।५३
५९. वही, ४।१।४०
६०. ज्यो.र.द्वा.ज्यो. स्तोत्रे ६
६१. शि.पु. ४।२६।४३
६२. वही, ४।२६।५१
६३. वही, ४।२६।५६
६४. वही, ४।२६।५५-५६

६५. वही, ४।२७।४
६६. स्तो.र.द्वा.ज्या. स्तोत्रे ८
६७. शि.पु. ३।४२।४
६८. वही, ३।४२।३८-३९
६९. वही, ४।२८।२०
७०. वही, ४।२८।२४, २५
७१. स्तो.र.द्वा.ज्यो. स्तोत्रे-९
७२. शि.पु. ३।४२।४
७३.. वही, ४।२९।४
७४. वही, ४।२९।३३
७५. वही, ४।२९।३६
७६. वही, ४।२९।४५
७७. वही, ४।३०।२७
७८. स्तो.र.द्वा.ज्यो. स्तोत्रे-१०
७९. शि.पु. ३।४२।४
८०. वही, ४।३१।९
८१. वही, ४।३१।२४-२७
८२. वही, ४।३१।४०
८३. वही, ४।३०।३७
८४. वही, ४।१।४२
८५. स्तो.र.द्वा.ज्यो. स्तोत्रे-११
८६. शि.पु. ३।४२।४
८७. वही, ४।३३ अध्याय सारांशः।
८८. वही, ४।३३।५४, ५५, ५६
८९. स्तोत्ररत्नावली, गीताप्रेस गोरखपुर द्वादशज्योतिर्लिङ्गस्तोत्रे १२ श्लोकः।
९०. शि.पु.रू.सं.कु.स. १३।५-६ श्लोकौ।
९१. शि.पु.रू.सं.कु.ख. १३।३६-३७
९२. वही, १७।५-६
९३. शि.पु.रू.सं.कु.स. १७।५४-५५
९४. शि.पु.रू.सं.कु.ख. १७।५४-५५
९५. वही, ५८-५९

९६. वही, १८।२२, २३, २४
९७. वही, १८।२५-२६
९८. वही, १८।३४।३५।३६
९९. वही, २०।७-८ श्लोकौ।
१००. मानव गृह्यसूत्रे २।१४
१०१.
१०२. शि.पु.रू.सं.कु.ख. १।१-२-३ श्लोकाः।
१०३. वही, ६।४-१२-१३-१९ श्लोकः।
१०४. वही, २।१२
१०५. वही, २।१३-१४-१५
१०६. वही, ४२।१
१०७. वही, ४२।९, १०, ११, १२ श्लोकाः।
१०८. वही, ४२।२७-२८ श्लोकाः।

पञ्चमोऽध्याय

महाकालतत्वस्य विवेचनम्

यद्यपि क्रमकालयो: पर्यायत्वे पि न केवलं क्रमवर्णनेन कालक्रमस्य भवेत्, अनादिव्यवहारे कालक्रमस्यैव चिरप्ररूढत्वात्, बहुचर्चित्वात्, व्यापकत्वाच्च। तत्र—

कल शब्द संख्यानयो: (भ्वा०आ०से०)

कल बिल क्षेपे (चु०उ०सेट्)

कल गतौ संख्याने च (चु०उ०से०)

"कलशब्दे" इति धातुचतुष्टयस्य पञ्चधायमर्थ:—"क्षेपो ज्ञानं च संख्यानं गतिर्नाद इति क्रमात्" इति। कलति-कलते-कलयति-कलयते सर्वमात्मनीति कर्तरि अच्प्रत्ययान्त:कल शब्दो निष्पद्यते, पुन: पज्ञादित्वादणि कालशब्दनिष्पत्ति:। कालशब्दादे बाणन्तत्वाद् ङीपि कालीशब्दो पि सिद्ध्यति।

केचित्तु- के स्वस्वरूपे सुखे आसमन्तात् लाति आदत्ते गृह्णाति प्राणिसमूहमिति काल: परमेश्वर:, प्राणिसमूह आनन्दाभिमुखमेवाधावतीत्यनुगमात्। कलशब्दादेव टापि कला-शब्द:। सा च कला सृष्टेरारम्भकोपकरणम्। षडध्वसु वाच्याध्वनि प्रथमतत्त्वं कला एव, तस्यैव तत्त्वभुवनादीनाविर्भाव:। सा च कला मायातो जाता, या सुप्तस्थानीयमर्णु किञ्चित्-कर्तृकत्वेन युनक्ति। कलया संसारबीजमुच्छूनं लब्ध्वा नामयपात्मकं जगदुत्पद्यते। यतो सा माययोत्पन्ना त: मायायामेव तस्या विकृतिर्नतु जीवे णौ। कलातत्त्वमेव किञ्चित्कर्तृत्ववदायि। कलयैव विद्यारागकालनियतितत्त्वानि जायन्ते। कलातत्त्वायत्तैव सृष्टि र्भोक्तृभोग्यरूपा। भोक्तृ-भोग्ययो: परस्परं सापेक्षत्वात् तयो: सममेव क्रमरहिततया सृष्टि:। तदेवं षट्त्रिंशत्तत्त्वेषु तत्त्वात्मक: काल: कलातत्त्वोपपन्न: इति नित्यकालादि्भन्न:।

काल: श्रुतिपुराणादिष्वपि चर्चित:। प्रसङ्गात् तदुक्त्वा विविच्यते—

युगपदयुगपत्क्षिप्रं चिरं चिरेण परमपरमिदमिति च ।
वर्त्स्यति नैतद् वर्त्स्यति वृत्तं तत्तन्न वृत्तमपि ।।
वर्तत इदं न वर्तत इति कालाक्षेपमेवाप्ता यत् ।
सर्वे ब्रुवन्ति तस्मान्नुसर्वेषां मत: काल: ।।[१]
ह्य:श्वो द्य सम्प्रति परुत्परारि नक्तं दिवैषम: प्राप्त: ।
सायमिति कालवचनानि कथं युक्तान्यसति काले ।।[२]

श्रुतिश्च—

स विश्वकृद् विश्वविदात्मयोनि-
र्स:कालकालो गुणीसर्वविद्य:।

प्रधान क्षेत्रज्ञपतिर्गुणेशः
संसारमोक्षस्थितिबन्ध हेतुः ।। इति

कूर्मपुराणे पि—

अनादिरेष भगवान् कालो नन्तो जरः परः ।
सर्वगत्वात् स्वतन्त्रत्वात् सर्वात्मत्वान्महेश्वरः ।।
ब्रह्माणो बहवोरुद्रा अन्ये नारायणादयः ।
एको हि भगवानीशः कालः कविरिति स्मृतः ।।
ब्रह्मनारायणेशानां त्रयाणां प्राकृतो लयः ।
प्रोच्यते कालयोगेन पुनरेव च सम्भवः ।।
परं ब्रह्म च भूतानि वासुदेवो पि शङ्करः ।
कालेनैव स सृज्यन्ते स एव ग्रसते पुनः ।।
तस्मात् कालात्मकं विश्वं स एव परमेश्वरः ।। इति

विष्णुधर्मोत्तरे च—

अनादिनिधनः कालो रुद्रः संकर्षणः स्मृतः ।
कलनात् सर्वभूतानां स कालः परिकीर्तितः ।।
कर्षणात् सर्वभूतानां स तु संकर्षणः स्मृतः ।
सर्वभूतशमित्वाच्च स रुद्रः परिकीर्तितः ।।
अनादिनिधनत्वेन स महान् परमेश्वरः ।। इति

ज्योतिषशास्त्रे—

"भूतानामन्तकृत् कालःकालो न्यः कलनात्मक" इति। अत एव शिष्टाः पुण्याहवाचनादवीश्वरमनुस्मरन्ति—

सर्वेषुकालेषु समस्तदेशे-
ष्वशेषकार्येषु तथेश्वरेश्वरः ।
सर्वः स्वरूपैर्भगवाननादिमान्,
ममास्तु माङ्गल्यविवृद्धये हरिः।। इति

कालभेदौ—

नित्यो जन्यश्च कालौद्धौ तयोराद्यः परेश्वरः ।
सो वाङ्मनसगम्यो पि देहो भक्तानुकम्पया ।।[३]

परमेश्वरस्य चावाङ्मनसगोचरत्वे सर्वेवेदान्तास्तदनुसारिस्मृतिपुराणानि तत्त्वविदनुभवश्च प्रमाणानि।

अन्यच्च—

निश्चितं कालनानात्वमनादिनिधनं च यत् ।
कीर्तितं यत् पुर स्तान्मे सूते यश्चात्ति च प्रजाः ।।[४]

एतेन कालस्य स्वरूपलक्षणे श्रुतिस्मृतिपुराणेतिहासादि प्रसिद्धे कीर्तिते। अपि च—

"क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका" इत्यभियुक्तोक्त्या क्रियाभेदकः कालः दिक्कालाकाशा सर्ववस्तुं प्रति साधारणकारणानि। क्राम्यति क्रमते वा सर्वं स्वं प्रतीत्यर्थकः क्रमशब्दः कर्त्रर्थकाच्प्रत्ययान्तः अथवा—क्राम्यन्ति वस्तूनि जडाज साधारणानि यस्मिन् स क्रमःकालः। "पुंसि संज्ञायां घःप्रायेण" इत्यधिकरणे घ प्रत्ययः। बहुग्रहणानुवृत्त्या धिकरणे पि घः। कालशब्दवत् क्रमशब्दो पि सर्वविधगतिभेदकत्वेन क्रियाभेदकः। नहि क्रियाभेदं विना क्रमो वभासितुं क्षमः। क्रमावभासने क्रियाया एव साधकबाधकभावेन लोके व्यवहारदर्शनात् क्रमःकालापरपर्यायः। क्रम एव कालः काल एव क्रमः इति आपामरप्राज्ञः प्रसिद्धो व्यवहारः।

कालो हि न केवलं प्रपञ्चानुगत एवापि तु चिद्रूपतया प्रपञ्चाद् बहिरपि लब्धसत्ताक इति दृष्टिरेव सृष्टिरिति मते दृष्टिदर्शनं तच्च ज्ञानात्मकमिति सर्वाधारतया व्यापकतया च क्रमदर्शनमित्याख्यया शैवशाक्तदर्शनसम्प्रदाये प्रथते।

सृष्टौ क्रमस्तु प्रत्यक्षः। तथैव स्थितिसंहारयोरपि। कालेना नाक्रान्तं वस्तु लोके नावलोकयितुं शक्ते। यदीत्थं लोकात्परस्य तदवभासननिषेधं कः क्षमेत, केनाधिकारेणेति विपश्चिद् विवेकसमीक्षणात्मकः प्रश्नः। महाकालस्य इच्छापूर्वकमेव विश्वनिर्माणम्। इच्छयैव ज्ञानक्रियाशक्तिद्वयं समुत्पद्यते। तदेवं जगन्निर्माणे पूर्वोक्तेच्छामात्रमेव परिकरः। इच्छासमकाले महाभूतानि तत्कालमेवोद्यन्ति, न तु सामग्रीसंकलनस्यापेक्षा त्र ब्रह्मसृष्टिवत् ऐश्वरसृष्टेर्निरूपादानत्वात्। ततो ब्राह्मी सृष्टिः। तत्रादिवर्णकुहराद् हृदयान्नभस्ततो वायुस्ततो ग्निस्ततो जलपृथिव्यादिः। प्रत्येकं पञ्च महाभूतानि पञ्चधा विभज्यन्ते। तद्यथा—त्वक्मांसदन्ता-नखा-अस्थीनि पृथ्वीतत्त्वस्य। रसःरक्तं कफो वसा भेद इति जलतत्त्वस्य। क्रोधः—मुखगतं तेजः, कायोष्मा, नेत्राग्निः जाठरो ग्निः पञ्चधा तेजस्तत्त्वम्। प्राणापानसमानोदानव्यानाः पञ्चवायवः जठरमुखश्रोत्रहृदयनासिकागत आकाशः पञ्चधा। पञ्चानां पञ्चगुणितत्वेन पञ्चविशतिः प्रकाराः महाभूतानां जायन्ते। तैश्चतुर्दशभुवनेषु चतुर्दशप्रकारक भूतसर्गः। तत्राष्टधा देवाः, पञ्चधा तिर्यक्, एकधा मानुष्यम्। भूतसर्गाद् अधिकारिशरीरा लयभोगाधिकारिवन्तः प्रबोध्याश्च मनुष्यासारभूता उपदेशपात्रम्। एतान्येव पञ्चमहाभूतानि प्रधानेन तद्गुणपञ्चकेन तन्मात्राणि, बुद्धिकर्मेन्द्रियाणि भौतिकान्येव, अन्तःकरणानि भौतिकान्येव, त्रिगुणास्तु प्राकृतिका भौतिका एव पुरुषस्य सहजसिद्ध आश्रयः। यथोक्तम्—"अमूर्तस्त्वीश्वरस्तत्र तिष्ठत्यानन्दलक्षणः" इति।

अपि च—

तत्तदर्थपुरुषो धृत क्रमः
प्रातिभस्फुरित दिव्यविग्रहः।
अक्रमस्तव वरं पदं शिवे,
यो हमद्वयविमर्श लक्षणः।।[५]

अर्थातशक्तिस्व पत्वमिति निर्धार्यमाणः लेखकः स्तौति। "अर्थस्वरूपमखिलं धत्तेमुग्धेन्दुशेखरः" इत्यभियुक्तोक्त्या तत्तदर्थाभिन्नो यः पुरुषः शिवः, कथंभूतः ? इत्याकांक्षायाम्-धृतः स्वीकृतः क्रमः पर्यायक्रमेण स्फुरणं तदवगमप्रयत्नो येनेति कथनेन अक्रमे पि क्रमवत्त्वस्यानुस्यूतत्त्वं ज्ञाप्यते, अर्थस्यवस्त्वात्मकत्वात् तत्र क्रमस्य पूर्वापरीभावरूपस्पन्दनस्यावस्यप्राप्तत्वादिति-भावः। पुनः कथं भूतः ? इत्यपेक्षायामाह—प्रातिभेति। प्रतिभाया इद प्रातिभम्। "तस्येदम्"[६] इति सूत्रादण्। एवं भूतः पूर्वोक्तविशेषण द्वयविशिष्टो यस्तव अहमद्वयविमर्शलक्षणः अहमिति ज्ञानप्रतिरूपकमव्ययम्, नत्वस्मच्छब्दनिष्पन्नं, तच्चाद्वयम खण्डं विमर्शनम्।

अक्रमः क्रमराहित्यं तद्विवरम् श्रेष्ठं पदं धाम्। अक्रमत्वं स्वरूपत औपाधिकक्रमवत्वं न दोषायेति भावः। शक्तेः शब्दस्वरूपत्वान्नाम्निक्रमवत्वस्यानुपयोगेनार्थात्मकशिवे तद्योगसत्वे पि यामलभावस्वीकारे शिवे क्रमराहित्याभावे शाक्तक्रमस्य दिव्यत्वात्तस्यालक्षितत्वेनाक्रम-रूपत्वमेव तत्र प्रातिस्विकं स्वरूपमिति।

वस्तु-तस्तु विश्वविग्रहाशक्तिः क्रमवत्येव। स्वातन्त्र्यबलेन तत्र क्रमाक्रमसद्भावो न दोषाया पि तु भूषणायैव। पुरुषो धृत इति पदच्छेदे रुचिश्चेत्, तदा क्रमस्य शम्भौ सत्वेन शक्तौ चा सत्वेन शक्तेरुत्कर्षः शिव स्वरूपं शक्तेरपकृष्टमितिद्योतनाय प्रयत्नः श्लाघ्य एवेति।

शिवमहापुराणेश्वपि-महाकालतत्त्वस्य विवेचन परिलक्ष्यते यथा—

कालादुत्पद्यते सर्वं कालादेव विपद्यते ।
न काल निरपेक्षं हि क्वचित्किञ्चिद्धि विद्यते ।।
यदास्यांन्तर्गतं विश्वं शश्वत्संसार मण्डलम् ।
सर्ग संहृतिमुद्राभ्यां चक्रवत्परिवर्तते ।।[७]

महाकालः विश्वकवलिता परमात्मनः शिवस्याद्याशक्तिरस्ति। कालः भगवतः शिवस्य विश्व-नियामिका, नियोगरूप, इच्छाशक्तिरस्ति। उक्तञ्च—

अविलंघ्या हि सर्वेषामाज्ञा शंभोर्गरीयसी ।
अवकाशमशेषाणां भूतानां सम्प्रयच्छति ।।[८] इति

श्वेताश्वरोपनिषद् एवं शिवपुराणे इयं इच्छाशक्तिः बलः शक्तिः पदेनाभिधीयते। अस्मा:द् कारणादेव कालं शिवस्य परमतेजः इति कथ्यते। तद्यथा—"परास्य शक्तिर्विविधैव श्रूयते

स्वाभाविकी ज्ञानबल क्रिया।"[९] समया र्थे प्रयुक्तः कालस्तु साक्षात् भगवतः शिवस्य तेजस्वरूपमहाकालस्य स्थूलरूपम्। अर्थात् शिवविग्रह एवास्ति। उक्तञ्च—

कलाकाष्ठनिमेषादि कलाकलित विग्रहम् ।
कालात्मेति समाख्यातं तेजो माहेश्वरं परम् ।।[१०] इति

कालस्तु भगवतः शिवस्य अप्रतिहततेज सत्त्वात् अखिल चराचरस्थ सर्वथा नुलंघनीयः अस्ति। उक्तञ्च—

यदलंघ्यमशेषस्य स्थावरस्य चरस्य च ।
नियोगरूपमीशस्य बलं विश्वनियामकम् ।।[११] इति

अखिनलत्रिलोकगुरुः परमात्मनः शिवस्य वशवर्तित्वात् महाकालस्य वशे सर्वदैव जगदस्ति किन्तु जगद्वशे तु कालः कदापि न अपि च कालः शिव वशे न तु शिवःकालवशे इत्यपि ध्यातव्यम्। शिवस्तु कालस्य स्वामी साक्षात् महाकालो स्ति।

समग्र दृश्यमाणजगत् भगवतः शिवस्य शक्तिः महाकालस्यैव कार्यमस्ति। विश्वस्य मूलाधारः सर्वज्ञः शिवः अनेनैव महाकालेन सृष्ट्यारम्भे विश्वं विस्तारयति, तत्समासौ समुपस्थिते महाप्रलये सम्पूर्णजगत् संकुच्य परमात्मनि शिवे विलीनोजातः। तत्समये शिवस्येयं महाकालरूपात्मिका शक्तिरपि समस्तकार्यान्निर्वृत्य भगवति शिवे एव विलीना जाता। तदा परमात्मनः शिवस्य परमस्वरूपब्रह्मशिव एव एकमात्रमवृशिष्टः वर्तते।

अपि च—पुनः सृष्ट्यारम्भे-भगवता शिवेन सम्प्रेरिता महाकास्या देशेनैव संसारचक्रम् प्रचलति, इतिपुराणप्रसिद्धिः। तद्यथा—

फलन्त्यकाले न रसायनानि सम्यक्प्रयुक्तान्यपि चौष्धानि ।
तान्येवकालेन समादृतानि सिद्धिंप्रयांत्याशुसुखं दिशन्ति ।।
नाकालतो यं प्रियतेजायते वा नाकालतः पुष्टिमग्रयामुपैति ।
नाकालतः सुखितंदः खितवां नाकालिकंवस्तुसमस्तिकिंचित् ।।
कालेन शीतः प्रतिवातः कालेनवृष्टिर्जलदानुपैति ।
कालेन चोष्मा प्रशमंप्रयातिकालेन सर्वंफलत्वमेति ।।
कालश्चसर्वस्य भवस्यहेतुः कालेन सस्यानिभवन्तिनित्यम् ।
कालेन सस्यानिलयंप्रयान्ति कालेन संजीवति जीवलोकः ।।[१२] इति

इत्येवं प्रकारेण यो कालस्य परमतत्वं विजानाति, स कालात्मानं अतिक्रम्य स्वयं कालातीतस्वरूपे पश्यति। महाकाल विषये श्रीमद्भागवते—

कालं कर्म स्वभावं च मायेशो मायया स्वया ।
आत्मन् यदृच्छया प्राप्तं विषुभूषुरुपाददे ।।

कालाद् गुणव्यतिकरः परिणामः स्वभावतः ।
कर्मणो जन्म महतः पुरुषाधितिष्ठतादभूत् ।।
महतस्तु विकुर्वाणाद्रजः सत्वोप वृंहितात् ।
तमः प्रधानस्त्वभवद् द्रव्य ज्ञानक्रियात्मकः ।।[१३] इति

वस्तुतः महाकालस्यातिक्रमणं भगवन्तं शिवं विहाय न कोप्यपरः कर्तुशक्नोति। तस्तु अजेयः सर्वजेता चास्ति। काल एव सर्वकर्ता सृष्टि-स्थिति-लय कर्ताप्यस्ति। उक्तञ्च—

यामाहुस्तामसीं रौद्रीं मूर्तिमन्तकरीं हरेः ।
सृजत्यशेषमीशस्य शासनाच्चतुराननः ।।
अन्याभिर्मूर्तिभिः स्वाभिः पासि चान्ते निहन्ति च ।
विषणुः पालयते विश्वं कालकालस्य शासनात् ।।
सृजत्यपि च विश्वात्मा त्रिधाभिन्नस्तु रक्षति ।
कालः करोति सकलं कालः संहरति प्रजाः ।।
कालः पालयते विश्वं कालकालस्य शासनात् ।
त्रिभिरंशैर्जगद्विभ्रद् तेजोभिर्वृष्टिमादिशत् ।।[१४] इति

कूर्मपुराणे पि शिवपुराणवदेव महाकालस्य वर्णनं अभिव्यक्तमस्ति तत्र शिवस्य महेश्वर-काल-सर-प्राण इत्यादयो नेके स्वरूपाः निर्दिश्यन्ते। तद्यथा—

प्रोच्यते भगवान कालोहरः प्राणो महेश्वर।।[१५] इति

कालैव प्रजाः सृज्यन्ते, पाल्यन्ते, संहरन्ते च। सर्वे काल वशगाः किन्तु कालः कस्यापि वशेनास्ति। उक्तञ्च—

कालः सृजति भूतानि कालः संहरति प्रजाः ।
सर्वे कालस्य वशगा न कालः कस्यचिद्वशे ।।[१६] इति

अपि च—

करोति कालः सकलं संहरति काल एव हि ।
कालः स्थापयते विश्वं कालाधीनमिदं जगत् ।।[१७] इति

शिवमहापुराणे सर्वशक्तिमान् महाकालस्य साक्षात् स्वरूप भगवन्तं शिवं विभिन्नरूपोपाधिभ्यो विवेचन कृतमस्ति। शक्ति सम्पन्न अद्वयमपिकथितं वर्तते। सर्वगता, जनन्ता, केवला, शिवानाम्नीत्यादयो तस्य शक्तयः उल्लिखिता जाता। शिवमपि-सर्वाधारः निरज्जनः नित्यानन्दः, निराभासः, निर्गुण, तरुः परस्तात्, अद्वैतः, अचलः ब्रह्मः निष्कल निष्प्रपञ्चः, स्वसवेद्य, अवेत्वादयो नामानः विवेचिता स्ति।

उक्तञ्च—

एकाशक्तिः शिवैको पि शक्तिमानुच्यते शिवः ।
शक्तयः शक्तिमन्तो न्ये सर्वेशक्तिसमुद्‌भवाः ।।[१८] इति

अपि च महाकालतत्त्वविषये विभिन्नेषु पुराणोपपुराणेषु बहुविधविवेचनं विवेचिताः संजाताः। सर्वविध महाकाल तत्त्वस्य तत्वज्ञः प्रभुः शिव एव तस्य=कालस्य, कर्ता, भर्त्ता, संहर्ता-श्चास्ति। अतएव सर्वतोभावेन भगवतः शिवस्य शरणं गत्वा तस्यैव आराधनं पूजनं मननादिकं करणेनैव महाकालमतिक्रम्य धीराः शिवशक्तौ विलीनाः संजाताः। सुष्ठृक तम् भगवता व्यासदेवेन—

न यस्य कालो न च बंधमुक्ती न यः पुमान्नप्रकृतिर्न विश्वम् ।
विचित्ररूपाय शिवाय तस्मै नमः परस्मै परमेश्वराणां ।।[१९]

योगः-(क) युगयुगेषु शिवस्य योगावताराः

समुद्धरणे स्मिन् त्रिणिदानि सन्ति।

(क) योगः। (ख) शिवः

(ग) अवतारः। तानि क्रमेण सम्प्रति योगं निरुप्यते।

भारतीय संस्कृतेः प्रतीकानि पुराणानि सन्ति विविधानां विद्यानामानाराणि। तत्र प्रसंगतः स्थलविशेषेषु योग-यन्त्र-तन्त्र मन्त्रादीनां मपि विचारचर्चा प्रचारिता विद्यन्ते।

योगस्य प्रायः सर्वे विषयाः सन्ति प्रायोगिकाः परमोपयोगिनश्च। अत एवायमास्तिक-नास्तिक-प्राच्य-प्रतीच्यादिभिः सर्वैरेव समानरूपेण समाद्रियते। अवान्तर विषयेषु स्यान्नाम मतवैविध्यम्, योगविषये परन्तु क्रियांशानां प्रयोगे न कस्यापि विद्यते विमतिः।

योगशब्दस्य व्युत्पत्तिरर्थश्च—

गीतायामपि भगवता श्रीकृष्णेनोक्तम् "योगःकर्मसु कौशलम्"।

"अलब्ध लाभो योगः", "योगेनकर्म कर्तुं शक्तोभवतिमानवः।"

योगश्चित्तवृत्तिनिरोधः, इत्यादयो नेके योग विषये व्युत्पत्तयः लभन्ते।

विशालं वैभवं विपुलाविद्या सुरम्यंस्थानम्, अपरिमितं साधनम्, समृद्धं साहित्यम्, सुन्दरं शरीरम्, कुशाग्रबुद्धिः, उर्वरितं मस्तिष्कम् सूक्षाविचारण-सरणिः सर्वमेतत् स्वास्थ्यं विना निष्फलं भवति। अतो नायासेन सम्भावितेन योगा भ्यासेन शरीरस्य स्वास्थ्य लाभायावश्यं प्रयत्नो विधेयः।

यदि समुचितेन रूपेण योगमवलम्ब्य परमार्थसाधनं क्रियते तर्हि आत्मशरीर एव भगवतो निरज्जनस्या वश्यं दर्शनं संभवेत्।

योगा भ्यासानुष्ठानेन शरीरे उत्तरोत्तरम् उत्कर्षं आविर्भवति। सर्वांगेषु सामर्थ्यं आरोग्यतायाः

संचारश्च जायते। बुद्धौ विचारवैशद्यं मनसि शान्तिः, चित्तस्य चाञ्चल्यनिवृत्तिश्च प्रादुर्भवति। योगा भ्यासे चिन्त्याशक्तिः, अद्‌भुतं रहस्यं च प्रच्छन्नमस्ति।

न केवलमेतावत् एवा पितु साधको योगसाधन द्वारा विषयेभ्यः इन्द्रिय।ाणं प्रत्याहृत्य मनसि तच्चात्मनि विधायशरीराभ्यन्तरे एव ज्ञान-गम्यम् आत्मानं द्रष्टुं शक्नोति। अगम्यं ब्राह्मणो लोकं चाप्यधिगन्तुं पारयति। उक्तञ्च मतङ्गेन ऋषिणा—

अग्निष्टोमादिकान् सर्वान् विहाय द्विजसत्तम् ।
योगाभ्यासरतः शान्तः परं ब्रह्माधिगच्छति ।।[२०] इति

अयं संसार विषविषूचिकावेगो महान् दुःसहो स्तिश्सो पि योगरूप गरुडमन्त्रेणैव शाम्यति नान्यथा।

एवं कदाचित् योगबीजे पार्वती-महादेव-सम्बादे भगवती पार्वती भगवन्तं सदा शिवं अप्राक्षीत्, भगवन्। यदि केवलेन ज्ञानेन मोक्ष-प्राप्तिः सम्भवति तर्हि योग एव मोक्षद इति ज्ञानिनां मतं कथं कारम् संगच्छते। तदुत्तरे एवमवादीत भगवान् शङ्करः यद्यपि ज्ञानेन मोक्षो भवति नान्येन साधनेनेति ज्ञानिनां कथनं सत्यं तथापि खड्गेनैव शत्रु-पराजयो भवति अस्य सत्त्वे पि किं युद्धेन बीर्येण विना शत्रुपराजयः सम्भवति। तथैव योगं विना केवलेन ज्ञानेन मोक्षप्राप्ति र्न संभवति। किञ्च ज्ञाननिष्ठो विरक्तो धर्मज्ञो जितेन्द्रियो पि देवो योगेन विना मोक्षं न लभते—

ज्ञाननिष्ठो विरक्तो पि धर्मज्ञो पि जितेन्द्रियः ।
विना योगेन देवो पि न मोक्षं लभते प्रिये ? ।।[२१]

योगिभिर्योगबलेन मनःस्थिरीकृत्य देहाभ्यन्तरे कुत्र किम् अस्तीति सम्यग् ज्ञात्वा मानसिकीनां अवस्थानां विचार आरभ्यते। लौकिकैः जनैश्च योगसाधनद्वारा शरीरं स्वस्थं विधाय, तेन स्वकीय शरीरेण इन्द्रियाणि मनोबुद्धिं वासंशोध्य संकटमयाकर्तुं प्रभवति।

योगभूमिमारुदुमष्टौ सोपानानि सन्ति। येषां वर्णनम् परमकारुणिकेन महर्षिणा पतञ्जलिना स्वकीये योगसूत्रे विहितं विद्यते। तत्र—

बहिरिन्द्रियनिग्रहात्मको यमः प्रथमः ।
अन्तरिन्द्रियनिग्रहरूपो नियमो द्वितीयः ।
स्थूल शरीराधिपत्यस्थापनमासनं तृतीयः ।
प्राणक्रियाधिपत्य प्रवर्तकः चतुर्थः प्रणायामः ।
वहिस्तो न्तः प्रवेशात्मिका हि क्रिया पञ्चमः प्रत्याहार पद वाच्यः।
अन्तस्थैर्य विधायिका क्रिया धारणारूपात्मकः षष्ठः।
आत्मानुसन्धानपराक्रिया ध्यानपदेन सप्तमः।
जीवात्म परमात्मनोरैक्य कारणं समाधिपदवाच्यमष्टमः। इति

इमानि अष्टौ सोपानानि योगस्याष्टौ अंगान्युच्यते। एषां योगाङ्गानां अनुष्ठानात् शरीरस्थाया: अशुद्धेः क्षयानन्तरं विवेकख्यातिपर्यन्तम् ज्ञानस्य प्रकाशो जायते। तथा चोक्तम् योगसूत्रस्य द्वितीयेसाधनपादे—

योगाङ्गनुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः।[२२]

यमनियमासनप्राणायामप्रत्याहारधाराध्यानसमाधयोष्टावङ्गानि।[२३] ब्राह्मेपुराणे पि—

तमाराध्य जगन्नाथं क्रियायोगे वाडवाः।
नूनं मोक्षं परं जगमुस्तस्मात्तन्मोक्षकारणम्।।[२४] इति

योगसाधनान्तर्गतस्य योगशब्दस्य ब्रह्मणि संयोगो र्थः। तथा चाग्निपुराणे—

आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः।
तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते।।[२४] इति

योगसाधनेन मनसो नेकात्मभावस्य निरसनं ब्रह्मभूपस्त्वमपि प्राप्यते। यथा—

ज्ञानंवदन्तीह विमोक्षकारणं तज्जायतेनैव विलोल चेतसि।
लौल्यं हि योगेन विनाप्रशाम्यतितस्मात्तदर्थ हियतेतसाधकः।।

योगतत्वोपनिषदे यथा—

योगो हि ज्ञान हीनस्तु न क्षमो मोक्षकर्मणि।
तस्माद् ज्ञानं च योगं च मुमुक्षुर्हढमभ्यसीत्।।[२५] इति

उक्तञ्च महर्षिणा व्यासदेवेन श्रीमद्भागवते—

योगास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सथा।
ज्ञानं कर्म च भक्तिश्च नान्योपायो स्ति कुत्रचित्।।
निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु।
तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनाम्।।
यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान्।
न निर्विण्णो नातिसक्तो भक्तियोगो स्य सिद्धिदः।।[२६]

अपि च—गीताकारेण-ज्ञानयोग: कर्मयोग:, भक्तियोगश्चेति त्रिधाविभक्तो स्ति। महायोग पदेन-मन्त्रयोग:, हठयोग:, लययोग: राजयोग: इति व्यवहृत:। एवं किल् जीवं ब्रह्मपदं प्रापयितुं पुराणेषु यावन्ति साधनानि निर्दिष्टानि तेषु योग एव मुख्यतम:। अत एव भगवत्सम्बन्धिनीषु कथासु सश्रद्धं प्रवर्तमानस्य निष्काम-कर्मणि: स्वधर्मपालनपरायणस्य भगवति जायते अहैतुकी भक्तिरिति। ये साधका: शरीरेन्द्रियमानसानां निखिलबन्धनैर्विहीनशुद्ध-बुद्ध चैतन्यस्वरूप आत्मदर्शनं वाच्छन्ति तेषां कृते योग एव महत् साधनमस्ति। आत्मोन्नतेः साधनस्वरूपे योगस्यमहत्वं प्राय: सर्वेषु भारतीयदर्शनेषु वर्णितमस्ति। योगेनैव वाह्याभ्यन्तर उभयविध शरीरशुद्धिं भवति। एतस्मात् कारणात् मात्र चार्वाकदर्शनं विहाय समग्र भारतीयदर्शन

स्वसिद्धान्तानुसारं यौगिकरीत्या ध्यानधारणादि द्वारा योगस्य प्रतिपादनं विधाय साधकान् प्रेरयति।

शिवपुराणे पि शैवधर्मस्य चत्वारिपदानि निर्धारितानि सन्ति—

१. ज्ञानम्, २. क्रिया, ३. चर्या, ४. योगश्च।

ज्ञानम्—यथा— पशुपाशपत्तेः ज्ञानमेव वास्तविक ज्ञानमिति।

क्रिया—गुरुपदिष्ट षडध्वशुद्धिविधिना क्रिया एव क्रिया इति।

चर्या—पशुपतेः शिवद्वारा विहित वर्णाश्रमयुक्ततस्य अर्चनानुष्ठानमेव चर्या इति।

योगः—अन्तस्थित आत्मदर्शनोपाय एव योगः इति।

योगस्य प्रकाराः—योगस्य मूलतः द्विधावर्गीकरणं भवति। आद्यवर्गीकरणे—१. मन्त्रयोगः, २. स्पर्शयोगः, ३. भावयोगः, ४. अभावयोगः, ५. महायोगश्चेति पञ्चधाविभागः। उक्तञ्च शिवमहापुराणे—

मदुक्तेनैव मार्गेण मय्यवस्थित चेतसः ।
वृत्त्यन्तर निरोधो यो योग इत्यभिधीयते ।।[२७]
निरुद्ध वृत्यन्तरस्य शिवे चित्तस्य निश्चला ।
या वृत्तिः सा समासेन योगःस खलु पञ्चधा ।।[२८] इति

उपर्युक्तेषु योगेषु—१. मन्त्रयोगः—मन्त्राणां अभ्यासेन मनःप्रवृत्तिः। मन्त्राणां वाच्यार्थः गोचरीभूय स्थिरतां याति स मन्त्रयोगः। यथा—

मन्त्राभ्यासवशेनैव मन्त्रवाच्यार्थ गोचरः ।
अव्याक्षेपा मनोवृत्तिर्मन्त्रयोग उदाहृतः ।।[२९] इति

उपर्युक्तेषु २+३=स्पर्शयोगः भावयोगश्च-प्राणायामयुक्त-मनोवृत्तिः स्पर्शयोगः। मन्त्रस्पर्श राहित्ये भावयोगः इति। यथा—

प्राणायाम मुखासैव स्पर्शयोगो भिधीयते ।
स मन्त्रस्पर्शनिमुक्तो भावयोगः प्रकीर्तितः ।।[३०] इति

४. अभावयोगः—यस्मिन् समस्तविश्वःतिरोहितो संजातः सखलु अभावयोगः, तदवस्थायां विद्यमानवस्तोरपि आभासः न भवति। यथा—

विलीनावयवं विश्वं रूपं सम्भाव्यते यतः ।
आभावयोगः सम्प्रोक्तो नाभासाद् वस्तुनः सतः ।।[३१]

५. महायोगः—यस्यां उपाधिरहित शिवस्वभावस्यैव चिन्तनं चिन्त्यते सा मनोवृत्ति महायोगपदेन व्यवह्रियते। यथा—

शिवस्वभाव एवैकश्चिन्त्यते निरुपाधिकः ।
यथा शैव मनोवृत्तिर्महायोग इहोच्यते ।।[३२] इति

अपर वर्गीकरणानुसारं—१. ज्ञानयोगः, २. क्रियायोगः, ३. भक्तियोगश्च त्रिधा भवति।

१. ज्ञानयोगः— चिदात्मा संयोग एव ज्ञानयोगः कथ्यते। उक्तञ्च—

ज्ञानयोगस्तु संयोगशिवस्यैवात्मना तु यः।[३३]

२. भक्तियोगः— अभीष्ट देवेन स आत्मसंयोग एव भक्तियोगः यथा—

भक्तियोगो मतोदेवया आत्मनश्चैक्य भावनम्।३४ इति

३. क्रियायोगः—चित्तस्य वाह्यार्थ मूर्तिप्रतिमादिना सह तदात्म्य एव क्रियायोगः निगद्यते। यथा—

यस्तु वाह्यार्थ संयोगः क्रियायोगः स उच्यते।। इति

केचित्त— यम, नियम, स्वस्तिक=आसन, प्राणायाम्, प्रत्याहार धारणा, ध्यान समाधि इत्यष्टाङ्ग योगाः मनुते। अपरे तु—

आसन, प्राणसंरोधः प्रत्याहारः धारणा, ध्यान समाधिः इतिषष्ठाङ्गयोगाः स्वीकुर्वन्ते। उक्तञ्च शिवपुराणे—

यमश्च नियमश्चैव स्वस्तिकाद्यं तथा सनम्।
प्राणायामः प्रत्याहारो धारणाध्यान मेव च।।
समाधिरिति योगाङ्गानयष्टावुक्तानिसूरिभिः।।[३५] इति
आसनं प्राणसंरोधः प्रत्याहारो थ धारणा।
ध्यानं समाधिर्योगस्य षडङ्गानि समासतः।।[३६] इति

(ख) वस्तुतः पुराणेषुभगवांच्छिवः

जगत्पतिः जगकगुरुः त्रिपुरारिः अर्थात् कामः क्रोधश्च लोभाख्यत्रिनगरस्य विध्वंशकः, ज्योतिर्मयः योगेश्वरः साक्षात् ज्ञानस्वरूप भगवतः शिवस्य विविधं स्वरूपाणि शास्त्रेषु वर्णितानि सन्ति। वस्तुतः दयामय-कृपासागरः भगवांच्छिवः स्नेहातिरेकादेव भक्तानां मुण्डमालास्वगले धारयति। स खलु करुणा, वैराग्य प्रेम ज्ञानस्वरूप एवा स्ति। केचित्तु गौर्ख्यात् तं संहारकारी कथयन्ति, तेषां महद्भ्रमः सत्वस्मान् पुनः पुनः नवजीवनं प्रदाय स्वकीय चरणपंकाजाभिमुखीकृत्य तेजोमयधाम शिवपदवीं प्रदास्यति।

भगवतः विष्णोरपेक्षा शिवस्य तुष्टिः अतिसुकरः अस्ति। किंचित् श्रद्धाभक्तिसमन्वित-भावनया "ॐ" नमः शिवाय:" इति षडक्षर महामन्त्रस्य जप एव तत्प्रसन्नतायां पर्याप्तः प्रतिभाति। अतएव पुराणेषु आशुतोषः इति संज्ञयाभिहितो देवः। अर्जुनस्य स्वल्प तपश्चर्यया प्रसन्नोभूत्वा पाशुपतास्त्रः दत्तवान्। भस्मासुर (वृकासुर) नामाख्य दैत्यं दुर्लभवरं प्रदत्तवान्। "तिरुपति" नामक महानगरस्य समीपे "कालहस्ती" नगर्य्याम्, रुदनावस्थायां स्वमूर्ति स्थाने स्वचक्षु प्रदायक भक्तराज "कष्णणपनयनागर "नामाख्य व्याघं दर्शनं दत्तवान्।

यमपाशवद्ध बालकमार्कण्डेयसमुद्धर्त्तुं प्रयतते। सामगान गायनेनैव दशास्या: तं स्ववशे कृतवान्। कदाचित् सनकादिकान् गुरुदक्षिणारूपेण ज्ञानदक्षिणामेवाददत्।

हठयोगानुयायिन: आसन्, प्राणायाम, कुम्भक, मुद्रा तथा बन्धद्वारा मूलाधोरप्रसुप्त कुण्डलीनीं जाग्रयन्ते। अपि च—स्वाधिष्ठान: मणिपुर: अनाहत, विशुद्ध: आज्ञादयो विभिन्न चक्राणां मार्गे मूर्धस्थित सहस्रार पंकजे आसीन: भगवता शिवेन सह योग: कारयन्ति। पुनश्च शिवज्ञानामृत पानानन्तरं योगिन: पूर्ण ज्ञानं लभन्ते।

भगवान् शङ्कर: ब्रह्मण: संहारमूर्तिरप्यस्ति। यदा ब्रह्मणांश: तमोगुणाच्छन्नो जात: तदेव शिवपदवाची भवति। स सर्वव्यापी, ईश्वरश्चास्ति। स कैलासं प्रतिवसति ज्ञानभण्डारणश्चास्ति। पार्वत्या, चण्डिकया वा वियुक्त: शिव: विशुद्धं निर्गुणब्रह्म पदमारोहति। मायया=पार्वत्या संयोगादेव सगुणस्वरूपं गृह्णाति। शिव: अखिललोकगुरु: किं बहुना श्रीरामचन्द्रस्यापि गुरु:। अतएव श्रीरामभक्तानां स्मरणीय: वन्दनीय: अर्चनीयश्च।

भगवान् शिव: यतीनांस्वामी, योगिनामीश्वर: दिगम्बरश्चासित। तस्य दक्षिणहस्तविराजितत्रिशूल: सत्व-रज-तम त्रिगुणात्मकप्रतीको स्ति अनेनैव भुवनमनुशासति। वामहस्ते-सुशोभित ढक्का (डमरु) साक्षात् शब्द ब्रह्मस्वरूप एव तत् ओं व्यञ्जकश्चास्ति तेनैव शब्दब्रह्मण: आविर्भावो संजात:।

तद्भालस्थ चन्द्रलेखा द्योतयति यत् पूर्णतया चित्तं वशवतीरिति। भगवती भागीरथी गंगाया: धारा मुक्तिस्वरूपा सुधाधाराद्योतिका। अभिमानमूर्ति: हस्तिचर्मधारणेने ज्ञायते यत् शिवेन दलितो भिमान इति। व्याघ्रं कामस्वरूपं मन्यते तच्चर्मधारणं द्योतयति यत् पूर्णतया कामजिच्छिव:। चाञ्चल्यमूर्ति: मृगचर्मधारणेन स्मर्यते यत् अपहृतश्चित्तचाञ्चल्यमिति। दीर्घजीविन: सर्पाणां धारणमेव अखण्डज्ञानं नित्यतायाश्च बोधक:। स खलु त्रिलोचन:, ललाटस्थतृतीयलोचन: साक्षात् ज्ञानचक्षुरिति पदेन व्यवह्रियते। शिवलिङ्गभिमुखस्थित नन्दीश्वर: प्रणव=ॐकार स्वरूप: लिङ्गस्त्वद्वैत बोधक: एको हमस्ति इतिवत्।

''तिब्बत्'' देशे कैलासनामधेया एकापर्वतश्रेणीरस्ति। यस्यां मध्ये अतीवमनोहारि प्रकृते: कुशलकराभ्यां विरचित देदीप्यमान पर्वतशिखर: शिवलिङ्गसदृश: अस्ति। य: सदैव रजतसदृश हिमाच्छादितो आवृत्तश्च। अयं शिखर: समुद्रतलात् २२९८० फीट उपरिवर्तते। दूरादेव शिवलिङ्गं मत्वा अर्चयन्ति जना:। तत्र न देवालय: नापरोलिङ्ग: न कश्चित् अर्चक: न च दैनिकपूजैव प्रचलिता। पुनरपि अतीवरमणीय: मुग्धकारी चास्ति। तत्पृष्ठभागे हिमशिखरात् लघुसरिता स्वरये सिन्धुनदी प्रवहति। यद्यपि शिवस्य चित्रेषु मस्तकादेव गंगाधाराया: प्रवाह: दृश्यते किन्तु तत्र स्थूलरूपेणा पि कैलासशिखरादेव सिन्धुनदी समुद्भूता दरीदृश्यते। कैलासपरिक्रमणमार्गस्तु (३०) त्रिंशतमील अर्थात् पंचदश क्रोशपरिमितं वर्तते, यस्य परिक्रमा त्रिदिवसीय: अस्ति।

अतः स्थूल-सूक्ष्म भेदाभ्यां विचारणेनेयं प्रतिभाति यत् सर्वत्र (वाह्याभ्यन्तर) शिवस्यैव चमत्कारि, मनोहारि च कृपास्ति।

(ग) अवतारः

अवतारः = अव + तृ = अवतारः। अव उपसर्गक तृधातोः "अवेतृ स्त्रोर्घञ्" इति सूत्रेण घञ् प्रत्यय कृते सति अवार शब्दस्य सिद्धिः समजनि। अस्य अवतारशब्दस्य सामान्यार्थ सर्वोच्च शिखरतः अधः अवरोहणम्। विशिष्टार्थः-कस्यचित् लोकातिशयि, ऐश्वर्य सम्पन्न, भगवत्पदाभिधेय सत्ता वा देवस्य भूर्भुवः स्वरादि उपरिष्टात् मनुष्यलोके अवरोहणम् तथा च निजेच्छया मानव वा मानवेत्तर स्वरूप धारणम्। विशेषतः अवतार-शब्दस्य अयमर्थः जनमानसे प्रतिष्ठितो वर्तते। अस्यैव पर्यायः आविर्भावशब्दः पुराणेषु बहुधा व्यवहृतः।

हेतुः—अवतार ग्रहणस्य मुख्यतः त्रयो हेतवः दरीदृश्यन्ते। प्रथमस्तु-विशिष्टकार्य-वशात्। अर्थात्—देशकालपरिस्थित्यनुसारं भक्तरक्षार्थं मूलस्वरूप परित्यागानन्तरं इच्छानुसारि स्वरूपग्रहण कृत्वा वास्तविक उद्देश्य परिपूरणम्।

द्वितीयः यथा—स्वरूपपरिवर्तनम्। प्रयोजनवशात् धृत्वा तत्तद्रूपेषु स्वरूपं परिवर्त्य नूतनस्वरूपं गृहीत्वा उद्देश्यं च पूरयित्वा पुनः पूर्वस्वरूपे प्रतिष्ठापनम्।

तृतीयः—नूतनजन्म धृत्वा तत्तद्रूपेषु योनिषु च आगत्य संचितकर्मानुसारं भोगकरणम्। प्रसङ्गे स्मिन् मातृकुक्षौ नियतकाल वासकरणमपि सम्मिलितो स्ति। भगवते उपर्युक्त अवस्थात्रय सर्वथा उपयुक्तः सुलभश्चास्ति। कार्यवशात् शिवस्य स्वरूप परिवर्तन भिन्नत्वेसति आविर्भूतः अवतारान्तर्गत एवास्ति।

युग युगेषु भगवांच्छिवः अवतारान् धृत्य अनेक नामरूपेषु ख्यातिं लब्धवान् इति पुराणप्रसिद्धिः।

तद्यथा—

स्वयमप्यवतीर्योर्व्यां युगावर्तेषु शूलधृक् ।
स्वाश्रितानां विमुक्त्यर्थ कुरुते ज्ञानसंतिम् ।।[३८] इति

भगवतः शिवस्यैव योगावताराणां विविधानि नामान्यपि समुपलभ्यन्ते।

यथा—

ऋभुः सत्यो भार्गवश्च ह्यंगिराः-सविता द्विजाः ।
मृत्युः सत्यक्रतुर्धीमान्वसिष्ठो मुनि पुङ्गवः ।।
सारस्वतस्त्रिधामा च त्रिवृतो मुनिपुङ्गवः ।
शततेजाः स्वयं धर्मो नारायण इति श्रुतः ।।

स्वरक्षश्चारुणिर्धीमांस्तथा चैव कृतज्जयः ।
कृतंजयो भरद्वाजो गौतमः कविरुत्तमः ।।
वाचः स्रवा मुनिः साक्षात्तथा सूक्ष्मायणिः शुचिः ।
तृणबिन्दुर्मुनिः कृष्ण शक्तिः शाक्तेय उत्तरः ।।
जातुकर्ण्यो हरिः साक्षात् कृष्ण द्वैपायनो मुनिः ।।
व्यासावतारां च्छृणवन्तु कल्पयोगेश्वरान्क्रमात् ।।
लैगेव्यासावतारा हि द्वापरान्तेषु सुव्रताः ।
योगाचचार्यावताराश्च तथा शिष्येषु शूलिनः ।।[39] इति

इदानीं भगवतः शिवस्य अवतारग्रहणस्य प्रयोजनमाह—

परमतत्त्वज्ञस्य शिवस्य अवताराणां वर्णनं शिवमहापुराणे तथैव दृश्यते, यथा— वैष्णव पुराणेषु विष्णोरवताराणां वर्णनंविद्यन्ते। अवतारः तत्त्वपुराणेषु अनन्यतमः विषयः अस्ति। अवताराणां धर्मनियमन एव मुख्यप्रयोजनमाहु पौराणिकाः। समग्र शिवपुराणस्य आद्योपान्त अध्ययनेनेदं ज्ञायते यद् भगवतः शिवस्य विशेषतः प्रादुर्भावः भक्तरक्षार्थं कल्याणार्थञ्च भवति। धर्मरक्षणमपि भगवतः शिवस्य विशिष्ट शक्तेः विलासो स्ति। यदा धर्मस्य ह्रासः अधर्मस्य वृद्धिः तथा च भक्तेषु आपत्तिं समापतति-तदैव विश्वस्मिन् शिवस्य अवतारो भवति। दिव्यलोके यस्य स्थिति सर्वोच्च स्वीक्रियते तस्यैव प्रभोः भूतले प्रादुर्भवः अवतार पदवाच्यः। अवतार विषये भगवता श्रीकृष्णेन स्वतः कथितम्। यथा—

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ।।
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्म संस्थापनार्थाय संभवामि युगे युगे ।।[40] इति

गीतोक्तवचनानुरूप मे शिवपुराणे पि दृष्टान्तं प्राप्यते। यथा—भगवतः शिवस्य अवताररूपाः शक्तयः शत्रूणां मारणार्थं, खलानां निग्रहणाय, ब्रह्मतेज विवर्द्धनाय च प्रादुर्भवन्ति। उक्तञ्च—

शत्रुमारणकार्यादौ तत्तच्छक्तिः परा मता ।
खलदण्डकरी नित्यं ब्रह्मतेजोविवर्द्धिनी ।।[41] इति

योगावताराः-

क्रमप्राप्तं सम्प्रति योगावतार विषये विवेचनमारभ्यते। अखिल लोकमंगलकारी भगवांच्छिवः प्रतिकलौ (कलियुगे) योगाचार्याणां स्वरूपेषु अवतारः गृह्णाति। प्रति अवतारेषु तस्य चत्वारो शिष्यापि भवन्ति, तच्छिष्या-प्रशिष्या पि जायन्ते। भगवतः शिवस्य योगाचार्य परम्पराषु अष्टाविंशतिः, संख्यान्निर्धायन्ते। यत्र सत्पुरुषाः दुष्टैः परिपीड्यन्ते तत्र तु साक्षात्

शिव एवावतरति। किन्तु योगावतारेषु शिवः निग्रहानुग्रह विनैव योगमार्गं विस्तारयति, जीवानां निःश्रेयसाय उपदिशति। प्रसंगे स्मिन् श्रीमद्‌भागवते अतीव रमणीयार्थप्रतिपादकः वर्णनं मिलति। यथा—

अव्ययः, अप्रमेयः, गुणहीनः, त्रिगुणात्मकः-भगवतः अवतराः मानवानां परमकल्याण-भूतः साक्षात् मोक्ष साधनाय एवा स्ति। उक्तञ्च—

नृणां निःश्रेयसार्थाय व्यक्तिर्भमवतो नृप ।
अव्ययस्याप्रमेयस्य निर्गुणस्या गुणात्मनः ।।[४२]

वस्तुतः अवताराणां मुख्योद्देश्यः जीवानां (सांसारिक वद्ध जीवानामिति) मोक्षप्रदानाय एव भवति। बद्ध जीवः न स्वयं तरति नापरान् तारयति। यथा—"सवयं बद्धः कथमपरान् तारयति।"

अतएव शुद्ध-बुद्ध चैतन्य-भुक्त प्रभुः वद्ध जीवानां बन्धनं विदीर्यतान् मुक्त करणे सर्वथा समर्थः प्रभवति। अवताराणां भौतिक क्लेशनिरसनं तु लघुतर अभिप्रायः। विशिष्टस्तु मुक्तकरणमेवा स्ति। श्रीमद्‌भागवते पि द्रष्टव्यम्। यथा—

मर्त्यावतारः खलु मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभौः।

एतदनुरूपमेव भगवतः शिवस्य योगावताराणां विषये शिवमहापुराणस्य "वायु संहितायां" उत्तरभागे ९ अध्याये तथा च "शतरुद्रसंहितायाः ४-५ प्रभृतिषु अध्यायेषु परम्परा निर्धारिता वर्तन्ते।

वायुसंहितानुसारं योगावताराणां क्रमनिर्देशः–

१. श्वेतः, २. सुतारः, ३. मदनः, ४. सुहोत्रः, ५. कंकः, ६. लोंगाक्षिः, ७. जैगीषव्यः, ८. दधिवाहनः, ९. ऋषभः, १०. उग्रः, ११. अत्रिः, १२ सुपालकः, १३. गौतमः, १४. वेदशिरः, १५. गोकर्णः, १६. गुहावासीः, १७. शिखण्डी, १८. जटामालीः, १९ अट्टहासः, २० दारुकः, २१. लाङ्गुलीः, २२ महाकाल, २३. शूलीः, २४. दण्डीः, २५. मुण्डीशः, २६. सहिष्णुः, २७ सोमशर्माः, २८. लकुलीश्वरश्चेति अष्टाविंशतिः।

एते वाराहकल्पे स्मिन् सप्तमस्यांतरे मनोः ।
अष्टाविंशति संख्याता योगाचार्या युगक्रमात् ।।[४३] इति

शतरुद्रसंहितोक्त क्रमनिर्देशः–

१. श्वेतः, २. सुतारः, ३. दमनः, ४. सुहोत्रः, ५. कंकः, ६. लोकाक्षिः, ७. जैगीषव्यः, ८. दधिवाहनः, ९. ऋषभः, १०. मुनिः, ११. तपः, १२. अत्रिः, १३. बलिः, १४. गौतमः, १५. वेंदशिराः, १६. गोकणः, १७. गुहावसीः, १८. शिखण्डी, १९. मालीः, २०. अट्टहासः, २१. दारुकः, २२. लाङ्गलीः, २३. श्वेतः, २४. शूलीः, २५. मुण्डीश्वरः, २६. सहिष्णुः, २७. सोमशर्माः, २८. लकुलीः। इत्येते योगावताराः।

शतरुद्रसंहितायाः पञ्चमाध्याये भगवतः शिवस्य योगावताराणां विशदं वर्णनं जातम्। द्वापरस्य दशमे भागे त्रिधामा नामकः व्यासः भविष्यति। तस्य वासस्थानं हिमवतः उत्तुङ्ग भृगुक्षेत्रं भविष्यति। तत्रैव भृगुबलबन्धु-नरमित्र-केतुशृङ्गाख्योचत्वारो मम पुत्रा भविष्यन्ति। पुनः एकादशे भागे "त्रिवृत्त" नाम्नः व्यासो भविष्यति, अहं च कलिंगदेशे गंगाद्वार समीपे "तप" नाम्नावतरिष्यामि। तथा—प्रतिकलौ योगिश्वराणां अवताराः भविष्यन्ति, ते सदैव योगमार्गप्रवर्तकः शैवः अविनाशी च भविष्यन्ति। ते सर्वे शिवस्य भक्ताः शिष्याः पाशुपतव्रत धारिणः, भस्मधारिणः, रुद्राक्षधारी, त्रिपुण्डधारिणश्च भविष्यन्ति। सर्वे धर्मपरायणाः वेदवेदाङ्ग वेद-वेदाङ्गपरज्ञाः, नित्यलिङ्गार्चने रताश्चा भविष्यन्ति।

"नमः शिवाय" इति मन्त्रस्य माहात्म्यम्

भारतीय उपासना पद्धतौ मन्त्राणां सर्वोपरि स्थानं विद्यते। प्रायः सर्वे यज्ञ-यागादयः मन्त्रद्वारैव पूर्णतामेति। मन्त्राणां महत्वं प्रयोगश्च न केवलं धार्मिककार्येष्वेव अपितु सम्पूर्ण जीवेन यत्र-तत्र-सर्वत्रैव तेषां प्रभुत्वमासीत्। मन्त्रजपमहात्म्य विषये शिवपुराणे स्पष्टनिर्देशो वर्तते यद् विशिष्टकार्य कारणवशात् विधिवत् शिवार्चनाभावे मात्र मन्त्रजापी एवं शिवभक्त-पदवीमारोहति। यथा—

त्रिपादं मन्त्रजाप्याच्च पूजया पूर्णभक्तिमान् ।
शिवलिङ्गं च भक्तं च पूज्य मोक्षं लभेन्नरः ।।[४४] इति

वस्तुतः शिवमहापुराणे द्वयोः मन्त्रयोः समं प्रतिपादितमस्ति। एकः सूक्ष्मः अपरः स्थूल इति। यथा—

सूक्ष्ममेकाक्षरं विद्यात् स्थूलं पञ्चाक्षरं विदुः ।
सूक्ष्ममव्यक्तपञ्चार्णं सुव्यक्ताणं तथेतरत् ।।[४५] इति

तयोः सूक्ष्म=ॐकार स्वरूप प्रणवः। स्थूलरूपेण "नमः शिवाय" इति पञ्चाक्षर मन्त्रस्यैव निर्देशो निर्दिष्टः।

ॐ नमः शिवाय" इति पञ्चाक्षर मन्त्रस्या पर नाम "प्रणव" इति वेदे, शैवागमे चोक्तम्। ॐ समन्वित अस्य षडक्षरेति संज्ञा व्यवहृता। मन्त्रो यं सर्वेषां शिवभक्ताना सर्वविध अर्थसाधकः, वेदानां सारतत्त्वः भक्तानां मोखदायी, शिवाज्ञया स्वतः सिद्धः सन्देहशून्यः तथा च शिवस्वरूप वाक्यो स्ति। अनेकसिद्धिमन्वित, विपश्चितां मनांसि निर्मलकरणे सर्वथा समर्थः, सुनिश्चिता र्थदायी परमेश्वरः शिवस्यार्थ युक्त वचनश्चास्ति। मन्त्रो यं "नमः शिवाय" मुखेन सुखपूर्वकं उच्चारणीयः। सर्वज्ञः सर्ववेत्ता भगवांच्छिवः विग्रहधारिणां मानवानां मनोरथसिद्धये ॐ नमः शिवाय" इति मन्त्रस्य प्रतिपादनं प्रतिपादितम्। अयमेव सर्वासां विद्यानां बीजः, अतिसूक्ष्मसत्वे पि महदर्थसंवलितश्चास्ति।

मन्त्रे स्मिन् त्रिगुणातीतः, सर्वज्ञः, सर्वकर्त्ता, द्युतिमान, सर्वव्यापी प्रभुः शिवः प्रतिष्ठितो स्ति। इति वेद-पुराण प्रसिद्धिः। ये ईशानादयो देवाः साक्षात् ब्रह्मस्वरूपिणः ते सर्वे सूक्ष्मरूपेण ॐ नमः शिवायेति मन्त्रे क्रमशस्थिताः सन्ति। किं बहुना पञ्चब्रह्मस्वरूप-धारी भगवान् शिवो पि वाच्यवाचक भावात् अस्मिन्नेव विराजितश्चास्ति। अप्रमेयत्वात् शिवोवाच्यः मन्त्रः वाचकश्च। शिवस्य मन्त्रस्य च वाच्यवाचकभावो यं अनादिकालत एव समागच्छति। ॐ नमः शिवाय इति षडक्षरमन्त्रः शिववाक्यं सम्पूर्णशिवज्ञानं परमपदो स्ति। शिवात्मको यं मन्त्रः विविधवाक्यः न तु अर्थवादः। तदुक्तं शिवपुराणे—

वाच्यः शिवो प्रमेयत्वान्मन्त्रस्तदवाचक स्मृतः ।
वाच्यवाचक भावो यमनादिः संस्थितस्तयोः ।।[४६] इति

अपि च—

विधिवाक्यमिदं शैवं नार्थवादं शिवात्मकम् ।[४७]

वेदोपनिषद् पुराणेषु मन्त्र बाहुल्ये पि सर्वज्ञ शिवमुखात् प्रणीतं ॐ नमः शिवाय इति मन्त्र सदृशं न कोप्यपरो मन्त्रः। सांगवेदशास्त्रं अस्मिन्नेव प्रतिष्ठितम्। सप्तकोटि मन्त्रैः बहुविध उपमन्त्रैश्च तुलनायाम् अयं षडक्षरमन्त्रः तथैव भिन्नो स्ति यथा सूत्राद् वृत्तिः। याः विद्याः वाये शिवज्ञानानि ते षडक्षरसूत्र भाष्यमस्ति।

ॐ नमः शिवाय इति मन्त्रे अभ्यस्ताः भक्ताः यथा सर्वाण्य धीतानि, सर्वाणि श्रुतानि, सर्वाणि कृतानि चेति मन्यते। पण्डिताः, मूर्खाः अधमाः अन्त्यजाश्च निष्ठावान् शिवभक्ताः अस्य मन्त्रस्य प्रभावात् पापपंजरान्मुक्ताः भवन्ति। शिवपुराणे शिवस्योक्तिं यत् ये भक्तप्रवराः सम्पूर्णजीवने सश्रद्धा कदाचिदपि षडक्षरमन्त्र द्वारा ममर्चयन्ति ते निष्पापतमोभूत्वा मम् स्थानं प्राप्नोति। किं बहुनोक्तोन ममसर्वेभक्ताः पञ्चाक्षरमन्त्राधिकारिणः सन्ति अत एव ते श्रेष्ठतमाः सन्ति।

उक्तं च शिवपुराणे—

किमत्र बहुनोक्तेन भक्ता सर्वे धिकारिणः ।
मम पञ्चाक्षरे मन्त्रे तस्माश्रेष्ठतरो हि सः ।।[४८] इति

अस्य मन्त्रस्वरूपविषये कथनीयम् यत् आदौ नमः पदवाच्यः तदन्ते शिवाय इति पदस्य प्रयोगो विधेतव्यम्। शिवपुराणानुसारि इयं पञ्चाक्षरी विद्या सर्वप्रथमं शिवमुखान्निर्गता, तस्यैव वाचिकाप्यस्ति यथा—

सैषा पञ्चाक्षरी विद्या सर्वश्रुति शिरोगता ।
सर्वजातस्य सर्वस्य बीजभूता सनातनी ।।
प्रथमंमन्मुखोद्गीर्णा साममैवास्ति वाचिका ।
तप्त चामीकरप्रख्या पीनोन्नत पयोधरा ।।[४९] इति

यद्यपि शिवः संहारदेवतारूपेण वर्णितः, श्मशानप्रियोदेवः तथापि कं संहरति ? इति विचरणीयम्। कल्पान्ते शिवः द्यावापृथिव्योरेव न संहरति अपितु तेषाबन्धनानि अपि संहरति। श्मशानभूमिः कुत्रा स्त्रि ? न तु सा स्थलीयत्र पार्थिवशरीराणि ज्वालयन्ते अपितु सा भक्तानां हृदयांसि यत्र मायायाः समस्त कर्मबन्धनानि प्रज्वाल्य भस्मी क्रियते सैव श्मशान भूमिः, यत्र शिवनृत्यति, एतेन नटराजः श्मशानवासीति कथ्यते। नटराज विग्रहेण सह पञ्चाक्षर मन्त्रस्य तादात्म्यं अनेन प्रकारेण प्रदर्शिता तस्य चरणेषु ''न'' नाभौ ''म'' स्कन्धदेशे ''शि'' मुखमण्डले ''व'' मस्तके ''य'' कारश्चास्ति।[५०]

पञ्चाक्षरमन्त्र-ध्यानविधिः प्राकारान्तरेणोच्यते—

भगवतः तत्त्वज्ञस्य शिवस्य डमरू (ढक्का) धारीहस्तात् ''श'' विवृत्तहस्तात् ''व'' उभयहस्तात् ''य'' बन्हिहस्तात् ''न'' अपस्मारपुरुषदलितपादात् ''म'' कारश्चास्ति। एवं पञ्चाक्षराणां वास्तविकमर्थ्यः क्रमशो ईश्वरः, शक्तिः, आत्मा, तिरोभावः, मलश्चेति शास्त्रान्तरेषु वर्णितमस्ति। यदि चेत् सुन्दरतम् पञ्चाक्षरणाम् धारयेत् तदा त्मा तत्रगमिष्यति यत्र न प्रकाशोनान्धकार इति।[५१]

पञ्चाक्षरमन्त्रानुष्ठानेनैव भगवती शिवा शिवंलब्धवती। पतिरूपेण शिवं प्राप्तुकामा तपश्चर्यायां लीना पार्वत्यै नारदोपदेशः। यथा—

इति श्रुत्वा वचस्तस्याः पार्वत्या मुनिसत्तमः ।
पञ्चाक्षरं शम्भुमन्त्रं विधिपूर्वमुपादिशः ।।
मन्त्रो यं सर्वमन्त्राणामधिराजश्च कामदः ।
भुक्तिमुक्तिप्रदो त्यन्तं शंकरस्य महप्रियः ।।[५२] इति

पञ्चाक्षरमन्त्रस्योत्पत्ति प्रणवादेव स्वीक्रियते। यथा—

अस्मात् पञ्चाक्षरं यज्ञे बोधकं सकलस्य तत् ।
अकारादि क्रमेणैव नकारादि यथा क्रमम् ।।[५३] इति

अर्थात् ''अ'' कारतः ''न'' उकारतः ''म'' मकारतः ''शि'' बिन्दुतः ''वा'' नादतश्च ''य'' वर्णानामुत्पत्तिः समादृताः।

इत्येवं शिवनामरूपात्मिकामणिः यस्य कण्ठे सदा विराजते स नीलकण्ठ शिवस्वरूपतामेति। अतएव शिवार्चनात्, नामामृतपानात् शिवनामाच्च ना परो धिको नाम। समुपस्थिते मृत्युकाले यस्य वाचि पंचाक्षरमन्त्र आपतति स सायुज्यं लभते, किन्तु इदृशं कर्म पुण्यकृतां लभन्ते। यः नमः शिवाय इति मन्त्रस्योच्चारणं करोति तस्य मुखदर्शनात् तीर्थदर्शनफलं प्राप्नोति। यस्य वाचि शिवनाम काये भस्मः, कण्ठे रुद्राक्षः वर्तन्ते तद्दर्शनात् पापानि भस्मीभवन्ति। अन्तेकाले शिवस्मर्ता यदि स ब्रह्मघ्नः, मद्यपः, तस्करः गुरुस्त्रीगामी, चा स्ति सो पि निष्पापतमो भूत्वा सायुयं लभते। यश्च ज्ञानवान् शिवनामरूप नमः शिवाय

इति मन्त्रस्य जपं करोति सदातस्य करतलगते मुक्तिरस्ति। ये मानवाः प्रसंगवशात् कौतुहलात् लोभात् भयात् वा अज्ञानात् अस्य मन्त्रस्य उच्चारणं करोति ते पि निष्पापतमा भवन्ति। कर्मन्यूनता पि पूर्णत्वं प्राप्नोति। उक्तञ्च—

यत्पादमद्मस्मरणाद्यच्छीनाम जपादपि ।
न्यूनं कर्म भवेत् पूर्णं तं वन्दे साम्बमीश्वरम् ।।[५४] इति

कदाचित् महादेवः भगवती पार्वतीं प्रति नमः शिवाय इति पञ्चाक्षर मन्त्र माहात्म्यं वर्णयति। हे देवि। वस्तुतः पञ्चाक्षर मन्त्रस्य महत्त्वं कोटिवर्षे ष्वपि न कर्तुं शक्यते, तथापि संक्षेपतः शृणु। उक्तञ्च—

पंचाक्षरस्य माहात्म्यं वर्षकोटिशतैरपि ।
अशक्यं विस्तराद्वक्तुं तस्मात् संक्षेपतः शृणु ।।[५५] इति
वेदे शिवागमे जातमुभयत्र षडक्षरः ।
यद्यपि शिवभक्तानामशेषार्थ प्रसाधकः । इति

यद्यपि पञ्चाक्षरमन्त्रः अल्पाक्षरः तथा बह्वर्थपरिपूरितः। वेदसारः, मुक्तिदः, असन्दिग्धः, अनेक सिद्धिः, सुखोच्चार्यः, सर्वकामपूरकः, सर्वासां विद्यानां बीजः मन्त्राणामादिमन्त्रः साक्षात् परमेश्वर वाक्य पञ्चाक्षर एवा स्ति। आदौ ॐकार संयोजनेन षडक्षर नाम्ना ज्ञायते। पञ्चाक्षरे वा मन्त्रे वाच्य-वाचक भावरूपेण शिवो प्रतिष्ठितः। अयं वाचयवाचकभावः अनादिसिद्धः अस्ति। शिववाक्य पञ्चाक्षरमन्त्र तस्य हृदयः, स गुह्याति गुह्यतमं साक्षात् मोक्ष साधनमस्ति। इत्येवं गुरुपदिष्ट पञ्चाक्षरमन्त्रस्य जपं करणीयम्। यतः समेषां यज्ञानां उत्तमः जपयशः। गीतायामपि उक्तं यथा—

यज्ञानां जपयज्ञो स्मि।[५६] इति

सर्वेषु च यज्ञेषु हिंसाभवति किन्तु जपयज्ञः सदा हिंसारहितः भवति। अतएव सम्पूर्णयज्ञ दान, व्रतानि च जपयज्ञानां षोडशांशाः भवन्ति। पञ्चाक्षर मन्त्र जपात् देवाः प्रसन्नोभूत्वा भुक्ति-मुक्ति दातारो भवन्ति। यज्ञ-राक्षस-भूत-प्रेतादयो पि भीतादूरे पलायितो जातः। अस्य मन्त्रस्य जपात् भक्तजनाः मृत्युमपि जयेयुः। मोक्षार्थी निष्कामभावेन अनुदिनं श्रद्धया जपेत्। एतेन ध्रुवमेव कल्याणं भविष्यति इति पुराणप्रसिद्धिः।

अपरं च भगवतः शिवस्य पञ्चाक्षरमन्त्रः प्राणिसमुदायानां अशुभनिवारणं करोति। पापकानां मनोरथानि पूरयति। पणवपूर्वकमन्त्र जपात् दान, तीर्थस्थान, व्रत-तप-गयाश्राद्ध-सहस्त्रगोदानादीनां फलं प्राप्नोति। ब्रह्महत्या जनित महापातकमपि अस्य मन्त्रस्य जपात् भस्मी भवति। शिवमन्त्र जपकर्ता-भक्त-शिव-योर्मध्ये किमपि भेदोनास्ति। अपितु उभौ समानौ, सदृशौ च कथ्यते उक्तञ्च—

पूजया शिव भक्तस्य शिवः प्रीततरो भवेत् ।
शिवस्य शिवभक्तस्य भेदोनास्ति शिवोहिसः ।।[५७] इति

अतः स्वात्मसमर्पण पूर्वकं भक्ति श्रद्धासमन्वित मनसा सदा शिवं प्रपूजयेत्। तथाहि शिवपुराणे—

अतः शिवप्रसादेन प्रकृत्यादि वशं भवेत् ।
शिवप्रसाद लाभार्थ शिवमेव प्रपूजयेत् ।।
निःस्पृहस्य च पूर्णस्य तस्य पूजाकथं भवेत् ।
शिवोद्देश कृतं कर्म प्रसादजनकं भवेत् ।।[५८] इति

मन्त्रजप विधिः

"ॐ नमः शिवाय" इति पञ्चाक्षर वा षडक्षर महामन्त्रस्य जपः प्रायः सर्वेषां भक्तानां परमकल्याणकारी विविच्यते। जपस्य विधिरुच्यते विधिविहीन जप्तो मन्त्र तथा न कल्याणकारी यथा सविधिः। विधिहीन जप्तमन्त्रेण अकल्याणमपि भवति। उक्तञ्च गीतायाम्—

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न शान्तिं न पुनः गतिम् ।।
तस्माच्छास्त्रं प्रमाणं ते कार्याकार्य व्यवस्थितौ ।
एवं ज्ञात्वाविधानेन कर्मकर्तु मिहार्हसि ।।[५९] इति

शिवमहापुराणानुसारं पञ्चविध मन्त्रस्य जपविधिः कथ्यते।

१. मानसजपः, २. उपांशुजपः, ३. वाचिकजपः, ४. सगर्भजपः, ५. संध्यान जपश्चेति।

आगमार्थवेत्ता विद्वान्सः मानसजपः उत्तमः, उपांशु मध्यमः वाचिक अधमश्चोक्तम्। तद्यथा—

उत्तमं मानसं जाप्यमुपांशुश्चैवमध्यमम् ।
अधमं वाचिकं प्राहुरागमार्थ विशारदाः ।।[६०] इति

१. मानसः—यस्मिन् जपविधौ अक्षरपक्तेः वर्णात् वर्णं पदात्पदम् शब्दार्थयोः मनसामात्र चिन्तनं भवति तत् मानसमुच्यते। उक्तञ्च—

धियायदक्षर श्रेण्या वर्णाद्वर्णं पदात्पदम् ।
शब्दार्थचिन्तनं भूयः कथ्यते मानसो जपः ।।[६१] इति

२. उपांशुः—यस्मिन् जप प्रक्रियायां मात्र जिव्हायाः परिस्पन्दनं भवति, वा मन्दस्परेण अक्षरोच्चारणं भवति यद् परश्रुतौ गते पि अर्थ प्रतीति न भवेत् तदुपांशु जपरुच्यते। यथा—

जिव्हामात्र परिस्पन्दादीषदुच्चारितो पि वा ।
अपरैरश्रुतः किचिच्छ्रुतो वो पांशुरुच्यते ।।[६२] इति

३. वाचिकः—यस्योच्चारणं उच्चनीचस्वरैः, स्पष्ट वा अस्पष्ट पदाक्षरैः क्रियते तद् वाचिक जंपः उच्यते।

उक्तञ्च शिवपुराणे—

यदुच्चनीचस्वरितैः स्पष्टास्पष्टपदाक्षरैः ।
मन्त्रमुच्चारयेद् वाचा वाचिको यं जपः स्मृतः ।।[६३] इति

४. सगर्भ—आदावन्ते प्राणायाम् पुरस्सरं कृतं जपम् सगर्भपदेनोच्यते। पञ्च, त्रय, वा एकः प्राणायामो कर्तव्यः। तद्यथा—

प्राणायाम् समायुक्तः सगर्भो जप उच्यते ।
आद्यन्तयोरगर्भो पिप्राणायामः प्रशस्यते ।।[६४] इति

५. सन्ध्यानः—सगर्भजपवदेव सम्यक्ध्यान युक्तो जपः सध्यानजपइति कथ्यते। स तु सगर्भात् सहस्रागुणमधिकं फलदायी महत्वपूर्णञ्चास्ति। यथा—

सगर्भादपि साहस्रं सन्ध्यानो जप उच्यते ।
एषु पञ्चविधेष्वेकः कर्तव्यः शक्तितो जपः ।।[६५] इति

वाचिक जपात् समं=बराबर एकगुना फलं भवति। उपांशुविधेः जपात् शतगुणाधिकं फलं भवति। मानस जपात् सहस्रगुणं फलम् भवति तदपि शतगुणाधिकं फलं सगर्भ जपात्। तस्मादपि सहस्रगुणाधिकं सन्धान जपात् फलं प्राप्नोति। उक्तञ्च शिवमहापुराणे—

वाचिकस्त्वेक एव स्यादुपांशुः शतमुच्यते ।
साहस्रं मानसः प्रोक्तः सगर्भस्तु शताधिकः ।।
सगर्भादपि साहस्रं सन्ध्यानो जप उच्यते ।।[६६] इति

जपगणना-माहात्म्यं च

ॐ नमः शिवाय इति मन्त्रस्य जपसंख्यायाः गणना अंगुल्या एकगुणमेव। रेखयागणनया अष्टगुणम्, पुत्रजीव (पतयुग) बीजमाला द्वारा गणनया जपस्यदशगुणाधिकं, शंखमनिकातः शतगुणं, मुंग द्वारा गणनया सहस्रगुणं, स्फटिकमणिलाया दशसहस्रगुणं मुक्तामालया लक्षगुणम्, पद्माक्षमालया दशलक्षगुणाधिकं, निर्मलसुवर्णमनिकातः कोटिगुणं, कुशग्रन्थ्या वा रुद्राक्षमालया जपकरणात् असंख्यगुणाधिकम् फल भवति। नात्र शङ्कायाः लेशावरम् विचारणीयम्। वेद-पुराण-शास्त्रसम्मत विचारमेतत्। तदुक्तञ्च शिवमहापुराणे महर्षिणा व्यासदेवेन—

अंगुल्या ज़पसंख्यानमेकमेव मुदाहृतम् ।
रेखया ष्ट गुणं विद्यात् पुत्रजीवैर्दशाधिकम् ।।
शतंस्याच्छंखमणिभिः प्रवातेस्तु सहस्रकम् ।
स्फाटिकैर्दश साहस्रं मौक्तिकैर्लक्षमुच्यते ।।

पद्माक्षैर्दशलक्षं तु सौवर्णैः कोटिरुच्यते ।
कुशग्रन्थ्या च रुद्राक्षैरनन्त गुणितं भवेत् ।।[६७] इति

त्रिंशत्रुद्राक्षनिर्मित मालया जपकरणात् धनाप्तिः। सप्तविंशतिका पुष्टिदात्री, पञ्चविंशतेः मुक्तिः, पञ्चदशात् अभिचारफलसिद्धिः। अष्टोत्तरशतसंख्याकमालया जपात् सर्वसिद्धिप्राप्नोति। अष्टोत्तरशतसंख्याकामाला अतिश्रेष्ठाः, शतसंख्याका उत्तमा। पञ्चाशत् संख्याका मध्यमाचतुः पञ्चाशत्संख्याकामाला मनोहारिणीश्रेष्ठा च कथिता माला ईदृशं रक्षणीयं यथा नापरो लक्ष्यते। उक्तञ्च—

त्रिंशदक्षैः कृतामाला धनदा जपकर्मणि ।
सप्तविंशति संख्यातैरक्षैः पुष्टिप्रदा भवेत् ।।
पञ्चविंशति संख्यातैः कृता मुक्तिं प्रयच्छति ।
अक्षैस्तु पञ्चदशभिरभिचार फल प्रदा ।
अष्टोत्तरशतं माला तत्र स्यादुत्तमोत्तमा ।
शत संख्योत्तमा माला पञ्चशद्भिस्तु मध्यमा ।।
चतुःपञ्चाशदक्षैस्तु हृच्छेष्टा हि प्रकीर्तिता ।
इत्येवं मालयाकुर्यात् जपं कस्मै न दर्शयेत् ।।[६८] इति

जपकर्मणि अंगुष्ठं मोक्षदायकम्, तर्जनी शत्रुनाशिका, मध्यमाधनदायी, अनामिका शान्तिदायी चाख्याता। तदुक्तम्—

अंगुष्ठं मोक्षदं विद्यात्तर्जनीं शत्रु नाशिनीम् ।
मध्यमा धनदाशान्तिं करोत्येषा ह्यनामिका ।।[६९] इति

पुनश्च जपकर्मणि-कनिष्ठिका दुःखनाशिका भवति। अंगुष्ठे विना कृतं जपं सर्वथा निष्फल भवेत्। उक्तं हि—

कनिष्ठिकाक्षरणी प्रोक्ता जपकर्मणि शोभना ।।[७०] इति
अंगुष्ठेन विना जप्यं कृतं तदफलं यतः ।।[७१] इति

जपार्थमस्थान विशेषाः

ॐ नमः शिवाय इति मन्त्रस्य जपविधौ स्थान विशेषानिर्धायन्ते। गृहे जप्तस्यमन्त्रस्य समानः एकगुणतं फलं भवति गोशालायाम् शतगुणितं, पुनीतवने वा उद्याने सहस्रगुणितं पावनाद्रौ दशसहस्रगुणितम्, नद्यास्तटे लक्षगुणितम्, देवालये कोटिगुणितम्, शिवसन्निधौ कृतस्य जपस्य अनन्तगुणाधिकं फलमुच्यते शिवपुराणे। तथाहि—

गृहे जपं समं विद्यात् गोष्ठे शतगुणं विदुः ।
पुण्यारण्ये तथा रामे सहस्रगुणमुच्यते ।

अयुतं पर्वते पुण्ये नद्यां लक्षमुदाहृतम् ।
कोटिं देवालये प्राहुरनन्तं ममसन्निधौ ।।[७१] इति

इत्येवं सूर्याग्निगुरुचन्द्रदीपजलब्राह्मणानां सम्मुखे जपं अति श्रेष्ठं कथ्यते। तेषा पुरतः पृष्ठं कृत्वा न जपेत्। तथा च शिरसि उष्णीशं धारयित्वा, कञ्चुकं धारयित्वा, नग्नो भूत्वा, कचान् विकीर्य, कण्ठे वस्त्रं परिवेष्ट्य, अशौच हस्त-पाद-शरीरादिना, व्यग्रतापूर्णमति जपं न कर्तव्यम् तत् सर्वं निष्फलं प्रतिपाद्यते। पूर्वाभिमुख कृतेन जपेन वशीकरणं भवेत्, दक्षिणाभिमुखः अभिचार कर्मणि प्रशस्यते। पश्चिममाभिमुखी जपः धनदायी भवति तथा च उत्तराभिमुखम् कृतं जपं शान्तिदायी मन्यते। तदुक्तम्—

तत्पूर्वाभिमुखं वश्यं दक्षिणं चाभिचारिकम् ।
पश्चिम धनदं विद्यादौतरं शान्तिदं भवेत् ।।[७२] इति

जपसमये क्रोध, मद निष्ठावान् जृम्भणादिकस्य सदैव परित्यागो विधीयते। श्वान्दर्शनं, नीचपुरुषाणां दर्शनञ्च परिवर्जयेत्। जाते सति आचमनं प्राणायामं च विधाय शिवाशिवयो मन्त्र-जपं करणीयम्। तद्यथा—

मदं क्रोधं क्षुतं त्रीणि निष्ठीवनविजृम्भणे ।
दर्शनं च श्वनीचानां वर्जयेत् जपकर्मणि ।।
आचमेत् सम्भवेतेषां स्मरेद्वा त्वया सह ।।[७३] इति

जपकाले दैवज्ञ (ज्योतिषी) दर्शनमपि निषिद्धम्। आसनविहीनः, सुप्त्वा, गच्छन्, उत्तिष्ठन् च जपं न कुर्यात्। रथ्यां मार्गे, अपवित्रस्थले, तिमिराच्छन्नेस्थाने पि जपनिषिद्ध एव। पादौ प्रसार्य, कुक्कुटासने उपविश्य, वाहने आरुह्य क्षट्वायामपि न जपेत्। शक्तौ चेत् उपर्युक्तनियमानां पालनं विधेयम्, अशक्तौ यथा रुचिः। किं बहुना यदि सदाचारयुक्तोभूत्वा श्रद्धया जपेत् चेत् अवश्यमेव मनेप्सितं फलं प्राप्नोति। उक्तञ्च शिवपुराणे—

किमत्र बहुनोक्तेन समासेन वचः शृणु ।
सदाचारी जपः शुद्धं ध्यायन्भद्रं समश्नुते ।।[७४] इति

मन्त्रमहिमा

"कदाचिद् शिवभक्तिभावनया समुत्सुकमनसा श्रीकृष्णः पञ्चाक्षरमन्त्रस्य माहात्म्यं श्रोतुकामः उपमन्युं प्रति प्रोवाच। तदुत्तरे स वोचत—हे देवाधिदेव ? वेदादिशास्त्रेषु प्रणवसहितं ॐ नमः शिवाय इति षडक्षरमन्त्रस्य महिमा बहुविध प्रोक्ता सन्ति। परं मन्त्रो यं शिवभक्तानां निखिलमभीष्टं पूरयति। स्वल्पाक्षर सत्त्वे पि वेदसारस्वरूपत्वात् अर्थसिद्ध-बाहुल्यमस्ति। अपि च मुक्तिदायी, सर्वासां सिद्धीनामधिष्ठानम्। मनोरंजकः परात्परतरम्, सर्वासां विद्यानां बीजम्, सर्वोत्तोमन्त्रः ॐ नमः शिवायेति विद्यते। सूक्ष्मसत्त्वे पि विस्तृत-

महिमावान् त्रिगुणात्परम्, शिवो पि वाच्य वाचक भावात् मन्त्रे स्मिन्नेव प्रतिष्ठितो विद्यते। अनेनैव मन्त्रेण भगवांच्छिवः लोकान् तारयति। सर्वदा विश्वसनीयो यं मन्त्रः, यो विश्वसति तस्य कल्याणं कथमपि न सम्भवति। समग्र शिव ज्ञान समन्वित अस्मिन्नेव मन्त्रे सर्वविद्यानां तत्त्वानि सन्निहितो स्ति। अन्य शास्त्राणामध्ययनस्य नास्त्यावश्यकता, नापरोमन्त्राणां जपमावश्यकं यस्य हृदये सदा ॐ नमः शिवाय इति विराजते।[७५]

भगवतीमुमां सम्बोधयन् साक्षात् शिवो पि कथयति—

अस्मिन् कलुषिते कलौ नानाविध आधिव्याधि समन्विते च युगे भक्तानां कल्याणकरणे मात्र मम पञ्चाक्षर मन्त्र एव पर्याप्तोस्ति। उक्तञ्च शिवपुराणे—

आश्रित्य परमां विद्यां हृदयां पञ्चाक्षरीं मम ।
भक्त्या च भावितात्मानो मुच्यन्ते कलिजानराः ।।[७६] इति

कायेन-मनसा-वासा नित्यं पापप्रकुर्वता पापिनो कृतघ्नो-निर्दयाश्च पुरुषाः नमः शिवाय इति मन्त्र प्रभावेणैव पावनाः संजाताः। आत्मानं संसार सागरात् अपि उद्धारयन्ति। पतिताः अति मुक्ततमाः भवन्ति। पुनश्च पार्वत्यापृष्टा यत् हे देवेश। पतितास्तु सदा अधर्मपरायणा एव भवन्ति तत्कथं ते पि मुक्ततमाः भवन्ति ? अस्य प्रश्नोत्तरे शिवेनोक्तम्-अधमकर्मकर्माणो पतिताः पञ्चाक्षरमन्त्र विना अन्यमन्त्रेः यदिमां पूजयन्ति तदापि ते न तरन्ति। जल-वायुभक्षिणो विविध व्रत-जपानुष्ठानिनो पि न पारयन्ते। अपितु श्रद्धा-भक्ति प्रेम्णा मामनुस्मरन्ति नमः शिवाय इति मन्त्रेण मामर्चयन्ति ते ध्वस्तापापाः मल्लोकं प्राप्नुवन्ति। अन्य मन्त्र-तप-यज्ञ-व्रत-नियमानां फलानि पञ्चाक्षरमन्त्रस्य तुलनायां कोट्यंशोपि न सन्ति।

अतएव सर्वतोभावेन शिवं प्रति स्वात्मसमर्पणं कृत्वा ॐ नमः शिवाय इति पञ्चाक्षर वा षडक्षर महामन्त्रस्यानुष्ठानं विधेयम्। एतेनैव महादेवोशिवः प्रीत्या सर्वार्थान् पूरयति। इति वेदोपनिषदादि पुराणेष्वपि निगदितानिसन्ति। उक्तञ्च—

न यस्य कालो न च बन्धमुक्ती,
न यः पुमान्न प्रकृतिर्न विश्वम् ।
विचित्ररूपाय शिवाय तस्मै,
नमः परस्मै परमेश्वराय ।।[७७]

अथ ''षडध्व'' वर्णनम्

अध्वानस्तत्वभवनकलावर्णपदमन्त्रकाः। यैरमी पुरुषाबद्धासंसरन्ति भवाद्भवम्[७८] इति। ''पाशः स्यादध्वनपञ्चकम्'' इति च तत्रैवाध्वपञ्चकस्य पाशत्वं प्रतिपाद्यते।

तत्त्वाध्वा च पदाध्वा च वर्णाध्वा भौवनात्मकः ।
मन्त्राध्वा च कलाध्वा च विशन्त्येकं परंशिवम् ।।[७९]

इति स्वायम्भुव वचने च तेषां परशिवे लयो वर्ण्यते।

मुक्तानां शिवताव्यक्ति कारणं विश्वमेव हि ।
शिवताव्यक्ति मार्गत्वात् ते सर्वे पि कलादयः ।।
अध्व शब्देन कथ्यन्ते ते सर्वे बन्धना अपि ।।[८०] इति

इति स्वच्छन्दतन्त्र वचने च तेषां अध्वशब्दवाच्यता निरुक्ता। तदेतेषां षडध्वानां व्याख्यानं पर्यन्तपञ्चाशिका विरूपाक्षपञ्चाशिका चिद्गगनचन्द्रिका-सौभाग्यहृदय-स्वच्छन्द विज्ञान भैरव प्रामाण्येन महाधमज्जरीपरिमलकारेण कृतम, अस्माभिश्च तत्र-तत्र तदाधारेण शिवपुराण शैववैष्णवागमप्रामाण्येन च तद् विवृत्तम्। तत्र वर्ण-पद-मन्त्राध्वानः शब्दात्मकाः।

कलातत्त्व-भुवनाध्वानो र्थात्मकाः। इति शब्दार्थ विभागेन ते व्याख्याताः। ("तन्त्रालोके". ६।१२ आन्हिकेषु। "तन्त्रसारे" पृ० ४५, ११२), च पुनरभिनवगुप्तो देशाध्वा-कालाध्वा चेति द्विविध विभाग मुखेन तानेतान् वितनोति। शिवमहापुराणे—

कलाश्चता निवृत्त्याद्याः पर्याप्ता इति निश्चयः ।
मन्त्राध्वा च पदाध्वा च वर्णाध्वा चेति शब्दतः ।।
भुवनाध्वा च तत्त्वाध्वा कलाध्वा चा र्थतः क्रमात् ।
अत्रान्योन्यं च सर्वेषां व्याप्यव्यापकतोच्यते ।।
मन्त्राः सर्वेः पदैर्व्याप्ता वाक्यभावात्पदानि च ।
वर्णैर्वर्ण समूहं हि पदमाहुर्विपश्चितः ।।[८१] इति

वर्णाध्वाः— सम्प्रति शब्दात्मकेषु षडध्वेषु क्रमशो निरुप्यते वर्णाध्वा इति।

एको नादात्मको वर्णः सर्ववर्णाविभागवान् ।
सो नस्तमित रूपत्वादनाहत इहोदितः ।।
स तु भैरव सद्भावो मातृसद्भाव एव सः ।
परा सैकाक्षरा देवो यत्र लीनं चराचरम् ।।[८२] इति

परवर्णस्वरूपं निर्वण्य "ह्रस्वार्णत्रयम्" इत्यादिना च—

हृद्येष प्राणरूपस्तु सकारो जीवनात्मकः ।
बिन्दुः प्रकाशोहार्णश्च पूरणात्मतया स्थितः ।।[८३]

इत्यन्तेन ग्रन्थेन परवर्णोदयं निर्वक्ति।

शिवो हकार इत्युक्तः सकारः शक्तिरव्यया ।

इति च हंसपारमेश्वरे। अस्यामेवावव्यवस्थायां—

अनुत्तरविसर्गात्मशिवशक्त्य द्वयात्मनि ।
परामर्शो निर्भरत्वादहमित्युच्यते विभोः ।।[८४] इति
हृद्यकारो द्वादशान्ते हकारस्तदिदं विदुः ।
अहमात्मकमद्वैतं यः प्रकाशात्मविश्रमः ।।[८५] इति

तथा च—"प्रकाशस्यात्मविश्रान्ति रहं भावो हि कीर्तितः" इति अनया दिशा हंरूपेण प्रकाशस्यात्मविश्रान्तिरनुभूयते।

ततः सूक्ष्मवर्णोदयप्रक्रियायां दिनरात्रिक्रमे त्रैयम्बकसन्तानगुरुपक्षः श्रीसन्तानगुरुपक्षयो विभिन्नानि मतानि उपन्यस्य सः—

एकाशीति मिमामर्धमात्राणामाह नो गुरुः ।
यद्वशाद् भगवानेकाशीतिकं मन्त्रमभ्यधात् ।।[८६] इति

अपि च "एकाशीति पदादेवी शक्तिः प्रोक्ताशिवात्मिकाः" इति वक्ति।

अत्र जयरथः—तेन कादीनां त्रयस्त्रिंशदर्धमात्राः, ह्रस्वानां दश, दीर्घाणां द्वात्रिंशत, प्लुतानां षडित्येकाशीतिरर्धमात्राणामिति।

तत एव परामर्शो यावत्येकः समाप्यते ।
तावत्तत्पदमुक्तं नो सुप्तिङ्गनियमयन्त्रितम् ।।[८८] इति

इत्यत्राभिनवगुप्तो पि सिद्धान्तशैवागमसंमतान्येकाशीति पदानि संकेतयति।

तदनन्तरं स क्षकारं व्याख्याय वर्णानां पञ्चाशत् संख्यां पूरयति। स्थूल वर्णोदय व्याख्यानावसरे स वर्णाष्टक वर्गनवकपक्षौ वर्णपञ्चाशिका-एकोनपञ्चाशिकापक्षौ च निर्दिश्य प्रकरणमेतत् उपसंहरति।

सप्तमे च चक्रोदयान्हिके तेन बीज-पिण्ड-पद-मालामन्त्राणां विद्यानां चोदयक्रमो-निर्दिष्टः।

एकाशीतिपदोदारशक्त्यामर्शात्मकस्ततः ।
विकल्पः शिवतादायी पूर्वमेव निरुपितः ।।[८९] इति

अत्र विकल्पपदेन मनसो स्थिरत्वं सूच्यते। शंकापर्यायतया तद् व्याख्यातुं शक्यते। शिवसूत्रविमर्शिनी घृतकालिकाक्रमे सुख-दुःखादि विज्ञानान्येव विकल्पपदेनोक्तानि। अविद्या-वृततया नानाविधविकल्पैः संकुल आत्माशिवात्मकं स्वात्मस्वरूपं नैव प्रत्यभिजानाति।

क्षुत्तृट्प्रभृतयो नुभावा मानसा विकल्पा भवन्ति, अन्यथा तत्पृष्ठभाविनो बुभुक्षेयमित्यादिकस्य विकल्पस्योदयोन भवेत्। सविकल्पकमानसप्रत्यक्ष विषयत्वे पि तेषां न कश्चित् दोषः, तस्य वस्त्वात्मकत्वेन प्रमाणत्वाभ्युपगमात्।

विकल्पोज्झितवीरा मानवा भावशुद्धया व्ययंशिवं पश्यन्ति, जीवन्मुक्ताश्च भवन्ति इति निशाचरे। एवं च विकल्प शिवतादायीत्यत्र शुद्धो विकल्पः शिवतादायीति योजनीयम्। तत्रापि एकाशीति पदानामुल्लेखो विद्यते, किन्तु वर्णैर्मन्त्राणामिव मन्त्रैः पदानां कथं नाम समुत्पत्तिर्भवतीति न दृश्यते प्रत्युत सूक्ष्मवर्णोदय प्रकरणे एकाशीति पदं मन्त्रमिव ब्रुवन मतङ्गशास्त्रं च प्रमाणयन् स पदानामेव मन्त्र जनकत्वं निर्दिशतीवेति क्रमस्यास्य निर्धारणे कारणानि मृग्यानि।

अस्माभिश्च तावतावर्णाध्वा विवेचिताः ततश्च अन्यत्रोपलब्धवर्णाध्वस्वरूपं वक्ष्ये—

"अथ ब्रह्मपरं शुद्धमादिवर्णत्वमागतम्" इति इत्यागमवचने वर्णस्यैव श्रेष्ठत्वं प्रतिपादितम्।

आगमभैरवे पि—

अबिन्दुं सविसर्गं च अकारं जपतो महान्।
उदेति देवि सहसा ज्ञानौघः पारमेश्वरः।।[१०] इति

तत्र मुख्यास्तावत् तिस्रः परमेश्वरस्य शक्तयः अनुत्तरः, इच्छा, उन्मेष इति। तदेव परामर्शत्रयम् अ इ उ इति। एतस्मादेव त्रितयात सर्वःशक्तिः प्रपञ्चश्चर्च्यते। अनुत्तर एव हि विश्रान्तिरानन्दः, इच्छायामेव विश्रान्ति रीशनम्, उन्मेष एव हि विश्रान्तिरुर्मियः क्रियाशक्तेः-प्रारम्भः। तदेव परामर्शत्रयम्। आ ई ऊ इति। अत्र च प्राच्यं परामर्शत्रयम् प्रकाशभागसारत्वं सूर्यात्मकम्, चरमं परामर्शत्रयं विश्रान्ति स्वभावाल्हाद प्राधान्यात् सोमात्मकम्।

यदात्विच्छायामीशने च कर्मानुप्रविशति यत्तदिष्यमाणमीश्यमाणमिति च उच्यते, मतदास्य द्वौ भेदौ। प्रकाशमात्रेण र श्रुतिः, विश्रान्त्या ल श्रुतिः, रत्नयो प्रकाशस्तम्भस्व-भावत्वात्। इष्यमाणं च न वाह्यवत् स्फुटतम्, स्फुटरूपत्वे तदेव निर्माणं स्यात्। न इच्छा ईशनं वा। अतो स्फुटत्वादेव श्रुतिमात्रं रत्नयोः न व्यजनवत् स्थितिः। तदेतद् वर्ण चतुष्टय-मुभयच्छायाधारित्वान्नपुंसकम्—ऋ ॠ ऌ ॡ इति।

तदित्थं व्यञ्जनात्मकं योनिरूपम्। तत्रानुत्तरात् क वर्गः श्रद्धायाः इच्छायाश्चवर्गः, सकर्मिकाया इच्छाया द्वौ ट वर्गस्तवर्गश्च। उन्मेशात् पवर्गः। शक्तिपञ्चकयोगात् पञ्चकत्वं। इच्छाया एव त्रिविधायाः य र लाः उन्मेषाद्वकारः। इच्छाया एव त्रिविधायाः शषसाः, विसर्गाद् हकारः, योनि संयोगजः क्षकारः। इत्येवमेष भगवाननुत्तर एव कुलेश्वरस्वरूपः। तस्य चैकैव लौकिकी विसर्ग शक्तिः मया नन्दरूपात् प्रभृति इयता बहिः सृष्टि पर्यन्तेन प्रस्पन्दतो वर्गादि-परामर्शा एव बहिस्तत्त्वरूपतां प्राप्ताः।

स चैष विसर्गस्त्रिधा-आणवश्चितविश्रान्तिरूपः। शाक्तश्चित्तसम्बोधलक्षणः। शाम्भ-वश्चित्तप्रलयरूप इति। एवं विसर्ग एव विश्वजनने भगवतः परमेश्वरः शिवस्यैव इच्छा रूपशक्तिः वर्णाध्वा पदेन विश्रमुत्पादयति, चरिकर्ति बभर्ति जर्हर्ति च शिवेच्छया इति पुराणप्रसिद्धिः। एवं विसर्ग हकारवद् वर्णान्तर्गतं विन्दुमपि वैशिष्ट्येन वर्णयति। तथाहि— अत्रानुत्तर शक्तिः सा स्वं वयुः प्रकट स्थितम्। कुर्वन्त्यपि ज्ञेयकलाकालुष्याद् बिन्दुरूपिणी।।[११]

इत्यादि ग्रन्थेन विन्दुस्वरूपं निर्वर्ण्य सोमसूर्याग्निरूपं धाम त्रयं पमाण-पमेय-पमातृरूपां त्रिपुटीं च प्रदर्श्य—

अत्र प्रकाशमात्रं यद् स्थिते धामत्रेय सति।
उक्तं विन्दुतया शास्त्रे शिवबिन्दुरसौ मतः।।[१२] इति

ककारादिसकारान्ताद् विसर्गात् पञ्चधा स च ।
बहिश्चान्तश्च हृदये नादे थ परमेपदे ।।
बिन्दुरात्मनि मूर्धान्तेहृदयाद व्यापको हि सः ।[१३] इति

इत्यत्र च स बिन्दोः पञ्चधात्वं निदर्शयति। सिद्धयोगीश्वरीमते च जयरथोद्धृते बिन्दोः पञ्चधात्वमेव व्याख्यायते। तद्यथा—

बाह्यात्मा तु भवेदेको ह्यन्तरात्मा द्वितीयकः ।
तृतीयो हृदयात्मा तु नादात्मा तु चतुर्थकः ।।
एवमेते महादेवे पञ्चमः परमात्मकः ।
बिन्दुः पञ्चविधो देवि हृत्कण्ठे च ललाटके ।।
नासान्ते च तथा चान्तेबिन्दुस्तेनैव व्यापकः ।।[१४] इति

एवं वर्णाध्वा विचारितः अन्ते च—

शब्दराशिः स एवोक्तो मातृका सा च कीर्तिता ।
क्षोभ्य क्षोभकतावेशान्मालिनीं तां प्रचक्षते ।।

इति तन्त्रालोक वचनमुद्धृत्य प्रकरणमेतद् उपसंह्रियते।

इतिशम्

"पदध्वा" निरूपणम्

एकादशीतिपदा देवी ह्यत्रान्तर्भावयिष्यते।[१५] इति
एकाशीतिमिमामर्धमात्राणामाह नो गुरुः।
यद्वशाद् भगवानेका शीतिकं रूपमभ्यधात्।।[१६] इति च

पदानां वर्णेष्वन्तर्भावं करोति भट्टाभिनवगुप्त इत्यनुक्त पदमेवोक्तं अन्यत्र च सः—

मन्त्राणां च पदानां च तेनोक्तं त्रिकशासने ।
अभिन्नमेव स्वं रूपं...................... ।।[१७]

इत्येवं मन्त्राणां पदानां चाभेदं वर्णयति। तद्विपरीत मभिनवगुप्तोद्धृतेन मतङ्गे न्येषु च शैवागमशासनेषु प्रणवव्योमव्यापि पभति एका शीतिपदानि पृथक् परिगण्यन्ते, वर्णेभ्यः पदानां, पदेभ्यश्च मन्त्राणां उत्पत्तिरङ्गीक्रियते। कुमारेण "अध्वपञ्चकं पाशः"[१८] इति तत्त्वप्रकाश पाठान्तरं व्याकुर्वता गुरुदेव पद्धतिमनुसृत्य षडध्वनां विस्तृतः परिचयः समुट्टङ्कितः।

गुरुदेवपद्धतिश्चेयमनन्तशयन संस्कृत ग्रन्थमालायामीशान शिव गुरुदेवपद्धति नाम्ना चतुर्षुभागेषु मुद्रिता। तत्र तृतीये भागे (पृ० १४९-१७०) षडध्वनिर्णयो नाम सप्तदशःपटलो वर्तते। एकाशीति पदानां नामान्यस्मिन् पटले च सन्ति। तान्त्रिमन्त्रपादात्मके द्वितीयभागे (पृ० १७२-७४) सन्ति। कुमारेण त्वेकाशीति पदानां नामान्यन्यस्मादेव कस्माच्चिद्ग्रन्थाद् गृहीतानि।

तेषु तेष्वागमेषु दीक्षाप्रकरणे षडध्वशोधनप्रकरणे पदानामेषां नामग्राहमुल्लेखो विद्यते। सर्वेषामेषामध्ययनानन्तरमेव पदानामेकाशीति संख्याकानां नामावली परिशुद्धापस्तोतुं शक्यते।

अपि च—

सर्वज्ञं च तमेवाहु बौंद्धानां परमं पदम् ।
गुणेष्वारहतानां च प्रधानां वेदवादिनाम् ।।
पौरुषं चैव सांख्यानां सुखदुःखादिवर्जितम् ।
षड्विंशकं च देवेशि योगशास्त्रे परं पदम् ।।[९९] इति

तथा च—

व्रते पाशुपते प्रोक्तमैश्वरं परमं पदम् ।
मौसुले कारुके चैव मायातत्वं प्रकीर्तितम् ।।
क्षेमेशो ब्रह्मणः स्वामी तेषां तत्परमं पदम् ।
तेजेशो वैमलानां च प्रमाणे च ध्रुवं पदम् ।।
जप भस्मक्रियानिष्ठास्ते ब्रजन्त्यैश्वरं पदम् ।
सर्वाध्वानो विनिष्क्रान्तं शैवानां परमं पदम् ।।[१००] इति

इति स्वच्छन्दतन्त्रवचने शास्त्राणां तारतम्येन सह पाशुपतानां भेदाः वर्णिताः सन्ति। अत्र "लाकुलं मौसुलं चैव द्विधातन्त्रं प्रकीर्तितम्" इति श्रीलकुलेश शिष्येण मुसुलेन्द्रेण कारोहर्णास्थलावतीर्णेन वा परेण मायातत्त्वगतखेमेश ब्रह्मणस्वाभि प्राप्तिहेंतु क्रियाबहुलाः स्वे स्वे शास्त्रे व्रतविशेषा उक्ताः। ये पि वैमलाख्या पाशुपतभेदाः तथा पञ्चार्थप्रमाणाष्टकोक्तोपासापराः परे, तेषामीश्वर तत्त्वगततेजेशधुवेशौ परं पदम्। इत्यत्र अभिनवगुप्तपादेन लाकुलं मतं स्मरति। तस्याधरत्वं च ख्यापयति। स च सर्वेषां अप्यागमानां प्रामाण्यमुररीकरोति। तत्र च हृदयाख्यं यत् प्रमाणमुक्तम्, तस्यान्तर्भूतानि यानि पुर-कल्प-कनक-शाला-निरुत्तर-विश्वप्रपञ्चाख्यानि षट्क्रियाप्रधानानि प्रमाणानि प्रोक्तयानप्रधानप्रमाणाष्टकविलक्षणानि हृदयाख्यात् प्रमाणाल्लकुलेशशिष्येण मुसुलेन्देणोद्धृत्य आरुरुक्षुणां प्रथमं पदशितानि।[१०१] इति शिवपुराणे पि—

मन्त्राः सर्वैः पदैर्व्याप्ता वाक्यभावात्पदानि च ।
वर्णैर्वर्ण समूहं हि पदमाहुर्विपश्चितः ।।
व्यापिकातः पराशक्तिरविभक्ता षडध्वनाम् ।
पर प्रकृतिभावस्य तत्सत्त्वाच्छिवतत्वतः ।।
शैवं तत्परमं धाम यत्प्राप्य षड्भिरध्वभिः ।
व्यापिका व्यापिकाशक्तिः पञ्चतत्वविशोधनात् ।।[१०२] इति

एवं शास्त्रकारैः पदध्व विषये विविधविध विवेचनम् विवेचिता यर्थारूपेणेति शम्।

''मन्त्राध्वा'' निरूपणम्

अथेदानीं मन्त्रस्वरूपविमर्शो विमृश्यते। ''मनन त्राणधर्माणो मन्त्राः इति ह्याम्नायः।'' ''मननात् त्राणधर्मा सौ मन्त्रो यं परिकीर्तितः'' इति संकेतपद्धतौ च। ''चित्तं मन्त्रः''[१०३] इति शिवसूत्रे तस्याध्यात्मिकं स्वरूपं वर्ण्यते। अत एव ''संविद्देव्येव मन्त्रः'' इति क्रमकेलौ प्रतिपादितम्। ''देव्येवमन्त्रः'' इति च भूतिराज्येन प्रोक्तम्। ''चिदग्निसंहारमरीचिमन्त्रः संविद्विकल्पान् ग्लपयन्नुदेति'' इति स्तोत्रभट्टारके।[१०४] तद्वदेव—

वर्णात्मको न मन्त्रो दशभुजदेहो न पञ्च वदनो पि ।
संकल्प पूर्व कोटो नादोल्लासो मवेन्मन्त्रः ।।[१०५]

इति राजभट्टारके। ''नास्ति नादात् परोमन्त्रः'' इति न य संगतौ। ''मन्त्रः पदार्थोदयसंरम्भात्मा परामर्शः''[१०६] इति महार्थ मंजरीपरिमले।

तद्विमर्शस्वभावा हि सा वाच्यामन्त्रदेवता ।
महासंवित्सासन्ना मननात् मन्त्र मुदीरयेत् ।।[१०७]

इति चागमशास्त्रे ''पमातृ भूमिगतामन्त्राः''[१०८] इति मतङ्गटीकायाम्। मान्त्रीं शक्तिं मनसि महती देवतेत्याद्रियन्ते'' इति च संविदुल्लासे मन्त्र माहात्म्ये महीयते।

यस्माद् देवो जगन्नाथः कृत्वामन्त्रमयीं तनुम् ।
मग्नानुद्धरते लोकान् .... ।।

इति जयाख्य संहिता वचने।

अग्निरूपा मन्त्राः मन्त्रा न मीमांस्या इति रौरवागमे।
सर्वे वर्णात्मकामन्त्राः इति तन्त्र सद्भावे।
मन्त्रा वर्णात्मकाः सर्वे इति सर्ववीरे।
ते मन्त्रा वर्णरूपेण स वाह्याभ्यन्तरोदिताः इति च संकर्षण सूत्रे।

पशुभावे स्थितामन्त्रा केवलं वर्णरूपिणः ।
सौषुम्णे ध्वन्युच्चरिताः पतित्वं प्राप्नुवन्ति ते ।।

इति हंसपारमेश्वरदिशा पशुभावे स्थिताः सन्तो पि सौषुम्णे ध्वन्युच्चरिताः पतित्वं प्राप्नुवन्ति इत्येवं व्याख्यापितं वर्तते। तन्त्रालोके चक्रोदयाह्निके मन्त्रस्वरूप विवेचनावसरे ''बीजपिण्डादिकं सर्वं संविदः स्पन्दतात्मताम्।'' विदधत् परसंवित्ता वुपाय इति वर्णितम्।

एकानुसन्धान वलाज्जाते मन्त्रोदये निशम् ।
तन्मन्त्र देवता यत्नात् तादाम्येन प्रसीदति ।।[१०९] इति

अत्राभिनवगुप्त पादेन-योगिनीकौल-सिद्धामत-विंशतिकत्रिकस्वच्छन्दतन्त्र-मालिनीतन्त्र प्रामाण्येन मन्त्रोदयं चक्रोदयं च व्याख्याय—

मन्त्र चक्रोदयज्ञस्तु विद्याचक्रोदयार्थवित् ।
क्षिप्रां सिद्धयेदिति प्रोक्तं श्रीमद्विंशतिकेत्रिके ।।[११०] इति

एवं हि मन्त्रा वीर्यवत्तमा भवन्ति। मन्त्रवीर्यं च संवितस्तोत्रे—"आदिमान्तिगृहीतवर्णराश्यात्मिकाहमिति या स्वतः प्रथा।" मन्त्रवीयं इत्येवं व्याख्यायतम्।

अपि च—

चक्रशूलाम्बुजादीनां प्राणिनां सरितां नृणाम् ।
यो निवेशस्तु वर्णानां तद्वीयं तत्र मन्त्रगम् ।।[१११] इति

अपरञ्च—

अर्थस्य पतिपत्तिर्या साह्या ग्राहकरूपिणी ।
सा एव मन्त्र शक्तिस्तु विवता मन्त्रसन्ततौ ।।[११२] इति

त्रिकसारे मन्त्रवीर्यमेव व्याख्यायते। मन्त्रवीर्ये हि प्रबुद्धे—

"किंकरस्वं च गच्छन्ति मन्त्रा मन्त्राधिपैःसर" इति त्रिकसारदिशा "दर्शयत्यात्मसद्भावमेवं मन्त्राहुतिं विना" इति वैहायसीपद्धत्या च मन्त्राः साधकस्य वशिनो भवन्ति। अत एव सिद्ध योगीश्वरीमते मन्त्रवीर्यगोपनमावश्यकमिसुदृढं प्रतिपाद्यते। मन्त्रवीर्यगुप्तार्थमेव रहस्यमन्त्रान् वहिर्नप्रकाशयेदिति ज्ञानोत्तरे—

स्वमन्त्ररक्षणं यत्नात् सर्वदाकारयेत् सुधः। इति

च सिद्धामते प्रोच्यते। एवं वीर्यबलोपेता मन्त्रास्तन्त्रालोके देव्यायामल प्रामाण्येन महामन्त्रा इति परिभाष्यन्ते। मन्त्रवीर्ये हि प्रबुद्धे सति "पृथक् मन्त्रः पृथक्मन्त्री न सिद्धयति कदाचन्"[११३] इति श्री कण्ठीसंहितापद्धत्या साधकमन्त्रयोर्भेदो विलुप्यते, गुरुदेवतामनृनामात्मनश्चैक्यं चकासते। मन्त्रा आदिमान्त्य विहीनाः सिद्धिदा न भवन्तीति सिद्ध योगिश्वरी मत श्रीकण्ठीसंहितादिषु प्रतिपादितं वर्तते। पुस्तकाधीतमन्त्राश्च निष्फला भवन्तीति सिद्धामत प्रामाण्येन तन्त्रालोके (पृ०सं० २६/२२-२४) विस्तार्यते। एवमेव—"उच्चार्यमाणा ये मन्त्रा न मन्त्रांश्चापि तान् विदुः" इति सर्वज्ञानोत्तर पद्धत्या केवलमुचचायमाणामन्त्रा न भवन्ति। ते हि—

पुण्ड्रेक्षोरिवमन्त्रस्य माधुर्ये हृदयस्पृशि ।
ऋजीषमानने तिष्ठत्यक्षरोच्चार लक्षणम् ।।[११४] इति

इति सविदुल्ल ससरण्यां ऋजीवकल्पा भवन्ति। मन्त्रा हि—

"मन्त्राः स्युर्भुवि पार्थिवाः। आप्ये आप्या यावदमी शिवे शिवमयाः" इति योगसंचरदिशा तेषु तेषु तत्त्वेषु भाव्यमानास्तन्मया भवन्तीति तेशां शिवत्वसम्पादनाय यत्नो विधेय इति।

तदेवं प्रभावस्य मन्त्रस्याराधनम्—"कुर्यान्मन्त्रात्मकं कायमष्टात्रिंशत्कलात्मकम्"[११५] इति किरणागमपद्धत्या साधकेन भूतशुद्ध्यादिपद्धत्या दिव्यमष्टात्रिंशतकलात्मकं देहं सम्पाद्य विधेयम्। त्रिक-कुलाक्रमयोगिमनत्रकदम्बक तन्त्रालोके सम्पूर्णे त्रिंशान्हिके त्रिशिरोमतत्रिकशासन-

सिद्धयोगीश्वरीमत-मालिनीमत-तन्त्रसद्भाव-देवीयञ्चशतिका-देव्यायामल-विष्वास मुकुटोत्तर श्रीसन्तानागम प्रामाण्यन लक्ष्मणगुप्त-भूतिराज-ओजराज-शम्भुनाथादिभिर्व्याख्यातम् एवमेव मन्त्रभूम्यां प्रवेश इत्यादयो विषयास्त्रिशिरोमतप्रामाण्येन तत्र विवृता:।[११६]

पौष्कर प्रदर्शिता मन्त्राणामुत्तमादयो भेदा: "चण्डमन्त्रास्तु मन्त्रन्ते हुंफडन्ता: सदामता:" इति हंसतन्त्रवर्णिताश्चण्डादयोमन्त्राश्चात्र संवहीतेषु वचनेषु समवलोकनीया:।

आनन्द प्रभृतेर्देवि मन्त्रमाराधयेत्तु य: ।
तस्यानन्दस्तु देवेशि मन्त्रेण सह जायते ।।[११७] इति

इत्यत्र स्वच्छन्दोद्योते नन्दिशिसाप्रामाण्येन ज्ञानव्याप्त्या प्राणव्याप्त्या च मन्त्राराधन-मुक्तम्।

मन्त्रजप:

तन्त्रालोके चक्रोदयप्रकरण एव—"कुर्यात् प्राणसमं जप्यम्"[११८] इति सिद्धयोगी-श्वरीमतप्रामाण्येन योगिनीकौलग्रन्थे च समुद्धृत्य जप विचार: प्रस्तुत:। एवमेव जप्ता मन्त्रा: सिद्धिदा भवन्तीति चोक्तम्। "मालामन्त्रेषु सर्वेषु मानसो जप उच्यते। उपांशु वा"[११९] इत्यत्र विवेके स्वच्छन्द प्रामाण्येन मानस: उपांशु:, शाब्द इति त्रिविधो जपो व्याख्यात:। "अधमस्तु जप: प्रोक्त: प्राणसंख्याविवर्जित:[१२०] इति चोक्तम्। शाब्दो जप एव निगद इति वाचिक इति च तत्र तत्रोच्यते।

पाञ्चरात्रीये लक्ष्मीतन्त्रेषु तु—

वाचिकं क्षुद्रकर्मार्थमुपांशु: सिद्धिकर्माणि ।
मानसो मोक्ष लक्ष्मीदो ध्यानात्मा सर्वसिद्धिकृत् ।।[१२१]

इत्येवं जपस्य चातुर्विध्य वर्ण्यते। शैव-वैष्णव-शाक्ता-गमेषु जपस्य योगाङ्गता चर्च्यते। अत्र विर्णितो ध्यानात्मा जपो योगाङ्गतयैवनेय:। अस्य विधिवत् विवरणं सात्वत-संहिताया उपोद्घाते "सात्वतीयोयोग:" इति प्रकरणे द्रष्टव्यम्।

द्वितीयभागसंगृहीतेषु पराख्य-पौष्कर-सिद्धिनाथपाद वचनेष्वपि त्रिविधोजपो निर्दिश्यते, तस्योत्तममध्यमाधम भेदांश्च प्रदर्श्यन्ते "जनिपालनधर्मेण जपेन"[१२२] इति सुभगोदयवासना वचने जपस्यनिरुक्ति: कृता। "एकस्य मन्त्रनाथस्य अन्तर्वाह्योदितस्य च। यदैक्यम् तं जपं विद्ध"[१२३] इति जयाख्या वचने तस्य स्वरूपं प्रदर्शितम्। 'शक्तौ नियोजयेन्मन्त्रं जपस्तु सफलीभवेत्"[१२४] इति तत्त्वरक्षाविधान वचने। "विषुवत्कं जपं कुर्यात्" इति वैहायसीवचने च तस्य विधानमुक्तम्।

योगिनीहृदयवरिवस्यारहस्यादिषु त्रैपुरतन्त्रेषु यथा—हृल्लेखायामवस्थाशून्यविषुवद्-भावनमुल्लेखानान्तरं जप स्वरूपं व्याख्यायते। तथैव स्वच्छन्दतन्त्रे प्रणवयदैकादशिकायां शून्य समारस्य विषुवदादिभावनमुखेनतदुपवर्णितम्। पदैकादशिका च—

अकाश्च उकारश्च मकारोबिन्दुरेव च ।
अर्धचन्द्रो निरोधी च नादो नादान्त एव च ।।
शक्तिश्च व्यापिनी चैव समनैकादशी स्मृता ।
उन्मना च ततो तीता तदतीतं निरामयम् ।।[१२५] इति

इत्येवं तत्र वर्णिता। अत्र हृदयादिनादान्तपरम्, हृदयाद्युन्मनान्तम् परं निष्कलमन्त्रमुच्चारयेदिति हि शैव क्रम इत्यादयोविषयाः प्रशान्तकालविषुवादिषु वैशिष्ट्यादीनि च तत्रैवागमग्रन्थेषु विशेषतो द्रष्टव्यमिति शम्।

अथेदानीं अर्थात्मकं कलाध्वानिरूप्यते

यद्यपि क्रम-काल-देशादयो पर्यायस्वे पि न केवलं क्रमवर्णनेन देशकालयोः वर्णनं भवेत्, अनादिव्यवहारे देशकालस्यैव चिरप्ररूढत्वात् "कल शब्दे" इति धातु चतुष्टयस्य पञ्चधायमर्थः "क्षेपो ज्ञानं च संख्यानं गतिर्नाद इति क्रमात्" इति।

कालति-कलते-कलयति-कलयते सर्वात्मनीति कर्तरि अच् प्रत्ययान्तः कलशब्दो निष्पद्यते। पुनः प्रज्ञादित्वादपि काल शब्दस्य निष्पत्तिः।

केचित्तु-के=स्व स्वरूपे सुखे आसमन्तात् लाति=आदत्ते गृह्णाति प्राणि समूहमिति कालः, परमेश्वरः। कले "शब्दादेव टापि कला शब्दो निष्पद्यते। सा च कला सृष्टेरारम्भकोपकरणम्। षडध्वसुवाच्याध्वनि प्रथमतत्त्वं कला एव। तस्यैव तत्त्वभुवनादीनाविर्भावः सा च कला मायातो जाता। कलया संसारबीजमुच्छूनं लब्ध्वा नामरूपात्मकं जगदुत्पद्यते। यतो सा मायातोत्पन्ना तः मायायामेव तस्या विकृतिर्न तु जीवे णौ कलातत्त्वमेव किञ्चित् कर्तृत्वदायि। कलयैव विद्या-राग-काल-नियति तत्त्वानि जायन्ते। तदेवं षड्त्रिंशततत्त्वेषु तत्त्वात्मकः कालः कलातत्त्वोपन्न इति नित्य कालाद् भिन्नः।

श्रुतौ च—

स विश्वकृत् विश्वविदात्म योनि-
र्सःकालकालो गुणीसर्व विद्यः ।
प्रधान क्षेत्रज्ञ पतिर्गुणेशः,
संसार मोक्षस्थितिबन्ध हेतुः ।। इति

पुनश्च—तन्त्रालोके (६।१२ आह्निके) तन्त्रसारे (पृ० ४५-११२) च अभिनवगुप्त महोदयेन देशाध्वा कालाध्वा चेति द्विविधविध विभागमुखेन तान् वितनोति।

यावान् समस्त एवायमध्वा प्राणे प्रतिष्ठितः ।
द्विधा च सो ध्वा क्रियया मूर्त्या च प्रविभज्यते ।।[१२६] इति

इत्येवं प्रथमं देशकालभेदेनाध्वा द्विधा विभज्यते। तत्र-क्रिययाकालाध्वा मूर्त्या-देशाध्वा भवति। यदुक्तमीश्वरप्रत्यभिज्ञायाम्—

मूर्तिवैचित्र्यतो देशक्रममाभासयत्यसौ ।
क्रियावैचित्र्यनिर्भासात् कालक्रममपीश्वरः ।।[१२७] इति

कारिकामिमां तन्त्रालोककार एवं विशदयति—

तत्र क्रियाभासनं यत् सो ध्वा कालाहू उच्यते ।
वर्ण मन्त्रपदाभिख्यमन्तर्भूतमिह त्रयम् ।।
यस्तुमूर्त्यव भासांइशः स देशाध्वा निगद्यते ।
कालातत्त्वपुराभिख्यमत्रास्ते ध्वत्रयं स्फुटम् ।।[१२८] इति

अपि च—

त्रिकद्वये पि प्रत्येकं स्थूलं सूक्ष्मं परं वपुः ।
यतो स्ति तेन सर्वो यमध्वा षड्विधमुच्यते ।।[१२९] इति

इत्यत्र कालाध्वनो देशाध्वनश्च स्थूल सूक्ष्म परत्वं निर्वर्ण्यते यथा—

अमूर्ता याः सर्वगत्वान्निष्क्रियायाश्च संविदः ।
मूर्तिक्रिया साधनं यत् स एवाध्वा महेशितुः ।।
अध्वाक्रमेण यातव्ये पदे संम्प्राप्तिकारणम् ।।[१३०] इति

इति च तत्राध्व पद निरुक्तिः प्रदर्शिताः।

अत्र—

पदानिमन्त्रारब्धानि मन्त्रा वर्णैक विग्रहाः ।
वणाः स्व निष्ठा इत्येषां स्थूलसूक्ष्मपरात्मता ।।[१३१]

इति वचनानुसारं पदमन्त्रवर्णानां स्थूलसूक्ष्मपरत्वम् व्याख्यातम्।

तत्र कालाध्वा स्पष्टं प्राणे प्रतिष्ठितः। अयं च कालस्तत्त्वमध्यस्थितात् कालाद्भिद्यते। तद्यथा—

एष कालोहि देवस्य विश्वाभासन कारिणी ।
क्रिया शक्तिः समस्तानां तत्त्वानां च परं वपुः ।।[१३२] इति

अत एवाग्रे महताप्रबन्धेन प्राणापानादिषु पञ्चसु प्राणेषु कालस्थितिं निर्वर्ण्य—

प्राणचारे त्र यो वर्णपदमन्त्रोदयः स्थितः ।
यत्नजो यत्नजःसूक्ष्मः परः स्थूलः स कथ्यते ।।[१३३] इति

इत्यादिना षष्ठे सप्तमे चान्हिके वर्णपदमन्त्राणामुदयः सभेदोपभेदो वर्णितो भिनवगुप्तेन।

षड्सु तत्त्वेषु वर्गशो यदनुगामि रूपं तत्कला, एकरूपकलना सहिष्णुत्वात्। तद्यथा पृथिव्यां निवृत्तिः निवर्तते यतस्तत्त्वसर्ग इति जलादिप्रधानान्ते वर्गे प्रतिष्ठा कारणतया

प्यायनपूरणकारित्वात्। पुमादिमायान्ते विद्या, वेद्यतिरोभावे संविदाधिक्यात्। शुद्धविद्यादिशक्यस्ते शान्ता, कञ्चुकतरङ्गोपशमात्। एतदेवाण्डचतुष्टयं पार्थिव-प्राकृत-मायीय-शाक्ताभिधम्। पृथिव्यादिशक्तीनामत्रावस्थानेन शक्तितत्त्वं यावत् परस्पर्शो विद्यते, स्पर्शस्य च सपतिघत्वमिति तावति युक्तमण्डत्वम्। शिव तत्त्वे शान्त्यतीता, तस्योपदेशाभावनार्चादौ कल्यमानत्वात्। स्वतन्त्रं तु परं तत्त्वम्, तत्रापि यदप्रमेयं तत्कलातीतम्।

एवं च निवृत्तिः प्रतिष्ठा, विद्या, शान्तिः, शान्त्यतीता चेति पञ्चकला भवन्ति। इमाः कलाः अत्र पठिता विद्याकला च तत्त्वान्तः पातिन्या कलया विद्यया च भिन्नाः सन्ति, विद्याहि विद्यातत्त्वं कलातत्त्वं चान्तर्भूते स्तः। एताभ्यो मुख्याभ्यः पञ्चकलाभ्यः सकलानां तत्त्वानां भुवनानां चोत्पत्तिर्भवति, तत्रैव च तानि विलीयन्ते। "कलास्ता बिन्दुवृत्तयः"[१३४] इति तु रत्नत्रये वर्ण्यते।

अपि च शैवरहस्ये—

मायाकालो नियतिः कला च विद्या भिलाषकत्पुरुषः ।
क्लृप्तानि सप्तथैवं शुद्धशुद्धानि तत्त्वानि ।।[१३५] इति

तत्र मायातत्त्वं पाशप्रकरणे प्रक्रान्ता मायैव। सेषा नानाविधशक्तिमयी माया प्रथमं कालतत्त्वं जनयति। तच्च भाविभवद् भूतभयं जगत् कलयतीति काल इत्युच्यते। शिवशक्तिकर्ममायात्मक चतुष्कजन्यकाल इति तत्र कुमारो भणति। तदनुमायातः कला निष्पद्यते। पशूनामणवं मलमेकस्मिन् प्रदेशे संकुचय्य तेषां कर्तृशक्तिं व्यक्तीकरोतीति सा कला प्रोच्यते। कालेन नित्यता च सहितेयं कला भूतत्त्वपर्यन्तं जगत् कलयति। ज्ञेयं कला भिव्यक्तकर्तृशक्तेः पुरुषस्य विषयानुभवार्थं विद्यातत्त्वं जनयति।[१३६] यथा—

तत्त्वैरेभिःकलितो भोक्तृत्वदशां यदा पशुर्नीतः ।
पुरुषाख्यतां तदा यं लभते तत्त्वेषु गणनां च ।।[१३७] इति

इत्थं षडध्वेषु कलाध्वा विवेचनमिति दिक्।

"तत्त्वाध्वा" निरूपणम्

पति-पशु-पाश-पद्धत्या पूर्वं तत्त्वानि विवेचितानि। अधुना षड्त्रिंशत् तत्त्वपद्धत्या तानि व्याख्यायन्ते।[१३८]

"यत्कतिपयकतिपयभेदानुगतं रूपं तत् तत्त्वम्" इति तल्लक्षणमुच्यते तन्त्रसारे—

स्वस्मिन् कार्ये थ धर्मौघे यद्वापि स्वसदृग्गुणे ।
आस्ते सामान्यकल्पेन तननात् व्याप्तृभावतः ।।
तत् तत्वं क्रमशः पृथिवी प्रधानं पुंशिवादयः ।।[१३९] इति

मतङ्गपारमेश्वरे च—

तत्त्वं यद् वस्तुरूपं स्यात् स्वधर्मप्रकटात्मकम् ।
तत्त्वं वस्तुपदं व्यक्तं स्फुटमाम्नाय दर्शनात् ।।
यदच्युतं स्वकाद् वृत्ताद् ततं चात्मवशं जगत् ।
तत मन्येन वा न स्यात् तत् तत्त्वं तत्वसन्ततौ ।।[१४०] इति

तत्र इत्थं तत्त्वलक्षणं वर्णितम्।

तत्वप्रकाशे पि—

आप्रलयं यत् तिष्ठति सर्वेषां भोगदायि भूतानाम् ।
तत् तत्त्वमिति प्रोक्तं न शरीर घटादि तत्त्वम् तः ।।[१४१] इति

परमार्थटीकायां योगराजेन—

"तन्यते सर्वं तन्वादि यत्र तत् तत्त्वम्, तननाद्वा तदाप्रलयं तस्य भाव इति वा तत्त्वम्"[१४२] इत्येवं तत्त्वपदस्य त्रिविधा व्युत्पत्तिः प्रदर्शिता। गुरुदेवाचार्येणापि—

ततत्वात् सन्ततत्वाच्च तत्त्वानीति ततो विदुः ।
ततत्त्वं देशतो व्याप्तिः सनतत्त्वं च कालतः ।।
लक्षादि योजनव्याप्ति तत्त्वमा प्रलयात् स्थितम् ।
अन्यथा घटकुम्भादिरपि तत्त्वं प्रसज्यते ।।[१४२]

इत्येवं तत्त्वलक्षणमुक्तम्—

परतत्त्वम्—

षट्त्रिंशत् तत्त्वात्मकं जगत्। अत्र च शिवतत्त्वमप्यन्तर्भूतं। तदतीतं परतत्त्वमित्यत्र प्रायः सर्वे-तन्त्रागमसम्प्रदायाः समानाभिप्राया दृश्यन्ते। तथाहि—

भारूपं परिपूर्णं स्वात्मनि विश्रान्तितोमहानन्दम् ।
इच्छा संवित्करणैर्निर्भरितमनन्तशक्ति परिपूर्णम् ।।
सर्व विकल्प विहीनं शुद्धं शान्तं लयोदयविहीनम् ।
यत् परतत्त्वं तस्मिन् विभाति षट्त्रिंशदात्मजगत् ।।[१४३]

इत्येवं परमार्थसारे परतत्त्वल्वरूपं वर्ण्यते।

तथा च— "अनाश्रितादि भूम्यन्ता भूमिका प्रतिपद्यते"[१४४] इति।

इत्येवं पर्यन्तपञ्चाशिकायाम् लिखितमस्ति।

तदीयस्पन्दविलासात्म षट्त्रिंशत्तत्त्वमयं जगत् ।।[१४५]

इति च शाम्भवीं दीपिकायाम् उच्यते।

तदिदं परतत्त्वं तत्त्वातीत मिति, शून्यमिति, अहमिति, परशिव इति, निरज्जन इति, भैरव इति च नामभिस्तत्र-तत्र प्रसिद्ध्यति।

तद्यथा— "मात्रार्धमात्रा परमम्" इति ज्ञानामृतरसायनवचने।

तत्त्वं यतो भवेत् यत् कारणमायूरकं च तत्त्वस्य ।
कथिता व्यवस्थितिर्यन्निखिलानामेव तत्त्वानाम् ।।[१४६] इति

इति तत्त्वप्रकाश वचने च तत्त्वातीतं परतत्त्वं वर्ण्यते।

स्वतन्त्रं परिपूर्णं च शिवाख्यं शून्यधामतत् ।
तत्त्वानि यत्र लीयन्ते यस्मात् समुदयन्ति च ।।[१४७]

इति विमर्शदीपिकायाम् उच्यते।

"निरालम्बो निरुत्साहः शून्यभूतः स्वयंशिवः" इति अनुत्तर भट्टारके।

"शिवतत्त्वं कथं शून्यम्—शिवः शून्य" इति किरणागमे।

"शून्य निर्भासः शिवः" इति वीरयामले

"अशून्यं शून्य कल्पं च शाम्भवं तत्त्वं" इति संविदुल्लासे।

"विश्वात्मा विश्वोत्तीर्ण चाहमिति तत्त्वं व्यातन्यते"
इति विमर्शदीपिकायाम्।

"तत्त्वातीतः परः शिवः" इति वातुलोत्तरे।

"शान्त्यतीतं परं तत्त्वम्" इति मतङ्गे।

"शान्त्यतीतः परः शिवः" इति स्वायभुववचने।

शिववस्तु परं तस्मान्मत्रातीतो निरञ्जनः ।
सर्वज्ञः सर्वगः शान्तः सर्वात्मा सर्वतोमुखः ।।[१४८] इति

"परातीतो निरंजनः" इति चिन्त्यागमे।

"जिज्ञासारहितं स्थानं यत्रदेवो निरंजनः"। इत्यनुत्तरभट्टारकम्।

"त्रियते चार्प्यते तेजस्तज्ज्योति र्भैरवात्मकम्" इति
इतिहासरहस्यौ।

"अद्वैतत्त्वात् सुरेशानि भैरवो गीयते भुवि" इति लक्ष्मी कोलार्णवे।

"क्रमकेलौ कुलेश्वरो मन्थान भैरवः" इति त्रिशिरोमते च।

तदिदं "परतत्त्वमनिर्देश्यः शिव" इति नन्दिशिखायाम्", भगवान् शस्तेति इति पञ्चरात्र श्रुतौ।

अतो विश्वात्मको नाथः स एव च महार्थात्माइति पादुकोदये।

"भगवान वासुदेव इति" जाबालिसूत्रेषु।

"विष्णु-शिव-बुद्धादि रूपतया भगवानेक एवेति" इति वामनसंहितायाम्।

"विष्णुरिति च" संकर्षणसूत्रेषु वर्ण्यते।

"रामश्च सकलविश्वावभासनक्रीडापरः परमात्मा"[१४९] इति तन्त्रालोके।

तदेतस्य परतत्त्वस्य सच्चिदानन्दघनस्वरूप वत्त्वम्—
"प्रकाशमाना भासैव यद्भूतिस्तत्सदेव हि" इति सिद्धसन्तान वचने।

याचित् सत्तैव सा प्रोक्ता सत्तैव चिदुच्यते ।
यत्र चित्सत्तयोर्व्याप्तिस्तत्रानन्दो विराजते ।।
यत्रानन्दो भवेद् भावे तत्र चित्सत्तयोः स्थितिः ।। इति

रसान्वयोक्त्या च प्रज्ञायते।

अस्मादेव परतत्त्वात् षट्त्रिंशत् तत्त्वात्मकस्य जगतः प्रादुर्भावो भवतीति तान्यत्र व्याख्यायन्ते। एतेषु पञ्चतत्त्वानि शुद्धानि, सप्त शुद्धाशुद्धानि शिष्टानि चाशुद्धनीति शास्त्रेषु वर्ण्यते। तदनुसारमेवात्र "व्युत्क्रमेणोपनेयो सौ शिवाय गमनं प्रति" इति स्वायम्भुवपद्धत्या तत्त्वसंग्रहे व्युत्क्रमेण=पृथिवीतः शिवान्तं यावत् तत्त्वानि=शिवादि पृथिव्यन्तानि तानि विनिर्दिश्यन्ते। इत्येवं षडध्वेशु तत्त्वाध्वा विधिवत् विवेचिता संजाता।

अथ "भुवनाध्वा" निरुप्यते

भवत्यस्मादिति भुवनमिति व्युत्पत्त्या भुवनशब्दो जगत् पर्यायः। शैवागमेषु २२४ संख्याकानि भुवनानि पठ्यन्ते। तानि च यथा यथं पृथिव्यादि शिवान्तेषु तत्त्वेषु स्थितानि। तेषां प्रमाणतन्त्रसारे संक्षेपेणैवं वर्तते। तत्र—

"पृथिवीतत्त्वं शतकोटि प्रविस्तीर्ण ब्रह्माण्डगोलकरूपम्। तस्यान्तः कालाग्निर्नरका पातालानि पृथिवी स्वर्गो यावद् ब्रह्मलोक इति। ब्रह्माण्डवाह्ये रुद्राणां शतम्। न च ब्रह्माण्डानां संख्या विद्यते। ततो धरातत्त्वाद् दशगुणं जलतत्त्वम्। तत उत्तरोत्तरं दशगुणमहङ्कारान्तम्। तद्यथा जलं तेजो वायुर्नभस्तन्मात्रपञ्चकाक्षैकादशगर्भो हङ्कारश्चेति। अहङ्काराच्छतगुणं-बुद्धि-तत्त्वम्। ततः सह स्त्रधाप्रकृतितत्त्वम्। एतावता प्रकृत्यण्डम्। तच्च ब्रह्माण्डवदसंख्यम् प्रकृतितत्त्वात् पुरुषतत्त्वं च दशसहस्त्रधा। पुरुषान्नियतिर्लक्षधा। नियतेरुत्तरोत्तरं दशलक्षधा कलातत्त्वान्तम्। तद्यथा—नियतिः, रागः, अशुद्धविद्या, कालः, कला चेति। कलातत्त्वाद् कोटिधामाया। एतावद् मायाण्डम्। मायातत्त्वात् शुद्धविद्या दशकोटिगुणिता। विद्यातत्त्वादीश्वर-तत्त्वं शतकोटिधा। ईश्वर तत्त्वात् सादाख्यं सहस्त्रकोटिधा। सादाख्याद् वृन्दगुणितं शक्ति-तत्त्वम्। इति शक्त्यण्डम्। सा शक्तिर्व्याप्य यतो विश्वमध्वानमन्तर्बहिरास्ते तस्माद् व्यापिनी। एवमेतान्युत्तरोत्तरमा-वरणतयावर्तमानानि तत्त्वान्युत्तरं व्यापकं पूर्व व्याप्यमिति स्थित्यावर्तन्ते।

यावदशेषशक्तितत्त्वानतो ध्वाशिवतत्त्वेन व्याप्यः। शिवतत्त्वं पुनरप्रमेयं सर्वाध्वोस्तीर्ण सर्वाध्वव्यापकं च।[१५०]

तत्र पृथिवीतत्त्वे वर्तमानानां १०८ भुवनानां नामानि गुरुदेवपद्धति प्रामाण्येन कुमारेण तत्त्वप्रकाशटीकायां परिगणितानि। अवशिष्टानां नामानि च सारणीमुखेन प्रदर्शितानि। शैव

सिद्धान्तागमेषु विस्तरेण भुवनविचारः प्रदर्श्यते। वर्तते च वैमत्यम्। स्वच्छन्दतन्त्रे दशमे च पटले, तन्त्रालोके चाष्टमान्हिके स्वच्छन्दोद्योततन्त्रालोक विवेकयोश्च नानाग्रन्थग्रन्थकार प्रामाण्येन भुवनाध्वा विचारितः इति दिक्।

अथ षडध्व शुद्धिः

"षड्विधः स्ववपुः शुद्धौ शुद्धिं सो ध्वा धिगच्छति।"[१५१] इत्येवं प्रकरणमिदमारभ्यते तन्त्रालोके। तत्र का नामेयं शुद्धिरिति जिज्ञासायाम्—

शोधनं बहुथा तत्तद् भोगप्राप्त्येकतानता ।
तदाधिपत्यं तत्त्यागस्तच्छिषात्मत्ववेदनम् ।।
तल्लीनता तन्निरासः सर्वं चैतत् क्रमाक्रमात् ।।[१५२] इति

इत्येवं शुद्धिपदं तत्र व्याख्यातम्। स्वच्छन्दतन्त्र प्रमाण्येन विवेककारेण समुपस्थापितस्तस्यार्थस्तत्रैव द्रष्टव्यः। अत्र सिद्धान्तवामदक्षिणसिद्धानामकमालिन्यादिषु वर्णितानां मन्त्राणां शोधकत्वमध्वनां शोध्यत्वं चोपपाद्य सर्वत्र शिवाभेदे जागरूके पि स्वातन्त्र्याच्छोध्य-शोधक भावो यं प्रतिबिम्बस्वरूपेण परमेश्वरे प्रतिभासते, न तु वाह्यतयास्य काचिद्वास्तविकी स्थितिरिति समाधीयते। एवं च सवो यमध्वा संविदाश्यानघन इति विभावनमेव तच्छोधनमिति ज्ञेयम्।

सर्वो मध्वा यथा संविदि संस्थितस्तथैव तद् द्वारा न्तः शून्यधीप्राणनाडी चक्रानुचक्रेषु बहिश्च लिङ्गमूर्तिबन्हिस्थण्डिलादिषु समस्त व्यस्तरूपेण क्रमाक्रमरूपेण समवतिष्ठत इति तत्रैव वर्ण्यते। तथा च—

अध्वासमस्त एवायं चिन्मात्रे सम्प्रतिष्ठितः ।
यत्तत्र नहि विश्रान्तं तन्नभः कुसुमायते ।।
संविद् द्वारेण तत्सृष्टे शून्ये धियिमरुत्सु च ।
नाडी चक्रानुचक्रेषु बहिर्देहे ध्व संस्थितिः ।।[१५३] इति

आ संविद् तत्त्वमा बाह्यं चैव सो यमध्वा व्यवस्थितः, स तत्र तत्रोचितं स्वं रूपं स्वातन्त्रेण भासयति। एवं च साधकेन विश्वाध्वसम्पूर्णं देशकालमयस्पन्दात्मकं स्वशीरं विलोकनीयम्। एवमेव घट-पटलिङ्ग-स्थण्डिलादिष्वपि सर्वत्र तन्मयता भावनीया। इदं विभावनमेवात्र षडध्व विलापनं, षडध्वशुद्धिरित्युच्यते। तथाहि—

ज्ञात्वा समस्तमध्वानं तदीयेषु विलापयेत् ।
तान् देहप्राणधी चक्रे पूर्ववद् गालयेद् क्रमात् ।।[१५४] इति

अपि च—

तत्समस्तं स्वसंवित्तौ सा संविद् भरितात्मिका ।
उपास्यमाना संसारसागर प्रलयानलः ।।[१५५] इति

तथा च—

संविदेकात्मतानीत भूतभाव पुरादिकः ।
अव्यवच्छिन्न संवित्तिर्भैरवः परमेश्वरः ।।
श्रीदेव्यायामले प्राक्तं षट् त्रिंशत् तत्त्वसुन्दरम् ।
अध्वानां षड्विधं ध्यायन् सद्यः शिवमयोभवेत् ।।[१५६] इति

तन्त्रालोक प्रदर्शितः शोध्यशोधकभावः स्वच्छन्दद्योते श्रीक्षेमराजेनेवं विवृतः— "परमेश्वरः चिदानन्दघनः स्वतन्त्रभट्टारक उन्मनाख्यया स्वस्वातन्त्र्यशक्त्या शून्यादिक्षित्यन्तमनन्तं वाच्यवाचकरूपं स्वभित्तौ स्वानधिकमप्यधिकमिव युगपदवभासयति। तत्र वाचकं ग्राहकभागावस्थितं परसूक्ष्मस्थूलभेदेन वर्णमन्त्रपदात्मकं त्रिधा। वाच्यमपि ग्राह्यभागाभिनिविष्टं कला तत्त्व भुवनात्मकम्। वर्णास्यभेदविमर्शसाराः किंचितस्थैल्येन भेदाभेदविमर्शनात्मकमन्त्ररूप तामाश्रित्य, ततो पिस्थौल्येन भेदविमर्शावगमकतया भान्ति। एवं वाच्यरूपा परमेश्वरी कलाख्या शक्तिरुत्तरोत्तर वैशिष्ट्येन तत्त्वभुवनात्मतां गृह्णाति। वस्तुतश्चेयमक्रमैव पारमेश्वरी शक्तिः स्फुरति। तत्रापि च स्वातन्त्र्यात् दर्पणनगरवत् क्रममप्यादर्शयति। क्रमे पि च पूर्वं पूर्वमुत्तरत्र व्यापकतया स्थितं मृदा इव घटादौ उत्तरमुत्तरं तु पूर्वत्रशक्त्यात्मना स्थितं वृक्ष इव स्वबीज इति सर्वं सर्वात्मकमेव।।"[१५७] अतएव पञ्चतत्त्वदीक्षायामनाश्रिततत्वपर्यन्ता भूतव्याप्तिः प्रदर्श्यते।

एवं चैकैको पि प्रमाताभावो वा वस्तुतः षडध्वस्फाररूपपारमेश शक्तिमया दिहान्तपरामर्शसाराहन्ताविश्रान्तिसतत्त्वः परमैरवरूप एव। तथात्वा परिज्ञानातु तन्मायाशक्तिकृतादपूर्णमन्यः, शब्दराशिकलाविलुप्तविभवत्वात् वर्णादिभिः कलादिभिश्च तात्वक स्वरूपेणास्फुरद्भिः प्रत्ययोद्भवक्रमेण देहादौ ग्राहिता हं भावो विषयमात्रासु ग्राहितभोक्तृताभिमानश्च खेचर्यादिचक्रचतुष्टयस्य भोग्यतां प्राप्तो बद्धः पशुः सम्पन्नः। तस्य पशुभावशमनाय पारमेश्वरी अनुग्राहिका शक्तिः शिवाभिन्नाचार्यहृदये पारमार्थिकेन स्वरूपेण स्फुरन्ती शिष्यस्य सर्वमध्वानम्। संकोचकत्वप्रशमनेनासंकुचितस्वभावशक्तिसारतया स्फारयन्ती शोधयति दीक्षा ज्ञानादि योगेन। अतएवामाचार्यस्फारसारा मन्त्रादयः शोधकाः पश्चात्माभिनिविष्टाशोध्या इति। इति शोध्यशोधकभावे पि न काचिदनुपपत्तिरिति।

सिद्धान्तागमसम्मता षडध्वप्रक्रिया महेश्वरानन्देनैवं प्रदर्शिता—"अध्वानो हि षडित्यागमेषु प्रसिद्धम्। ते च वर्णा-पदानि मन्त्राः-कलाः-तत्त्वानि-भुवनानीत्याख्यायन्ते। तत्र वर्णाः पञ्चाशत् लोकप्रसिद्धाः। पदान्यानन्त्ये पि व्योमव्याप्यादिमन्त्रमर्यादपैकाशीतिः। मन्त्राश्च तद्वदानन्त्ये पि ब्रह्मपञ्चकमङ्गषटकं चेति संकोच दृष्ट्या एकादश। कलानिवृत्यादयः पञ्च। तत्त्वानि षट्त्रिंशत। भुवनानि च कालाग्निरुद्रादीन्यनाश्रितान्तानि चतुर्विशत्यधिकम्शतद्वयं एतदखिलमपि कलापञ्चकेन क्रोडीक्रियन्ते। तथाहि—

निवृत्तौकलायां क्षकार एकोवर्णः, अष्टाविंशतिपदानि। हृदयसद्योजातौ मन्त्रौ, पृथिवीतत्त्वमेकम्, कालाग्निरुद्रादीनि भद्रकाल्यन्तान्यष्टोत्तरशतं भुवनानि। प्रतिष्ठायां हादयष्टान्तावर्णास्त्रयोविंशतिः, एकविंशतिः पदानि, शिरोवामदेवौमन्त्रौ आप्तत्वादीनि प्रकृत्यन्तानि त्रयोविंशतितत्त्वानि, अमरदेशादीनि श्रीकण्ठान्तानि च पञ्चाशत् भुवनानि। विद्यायां जादिघान्ताः सप्तवर्णाः, विंशतिः पदानि, शिखा घोरश्चेति मन्त्रद्वयम्। पुरुष प्रभृतिनि मायापर्यान्ता सप्ततत्त्वानि, भीमादीन्यङ्गुष्ठमात्रान्तानि च सप्तविंशतिर्भुवनानि। शान्तौ तु गरवकास्त्रयो वर्णाः, पदान्येकादश, कवचतत्पुरुषौ मन्त्रौ, शुद्धविद्येश्वरसदाशिवास्त्रीणि तत्त्वानि। वामादिसदाशिवान्तमष्टादशभुवनानि। शान्त्यतीतायां च वर्णाः षोडशस्वराः, पदमेकम्। ईशानो नेत्रमस्त्रमिति मन्त्रत्रयम्, शिवस्तत्त्वमेकं यः शक्तिस्वभाव इत्यांम्नायते, निवृत्यादीन्यनाश्रितान्तानि पञ्चदश भुवनानीति। एतच्च सिद्धान्तादितन्त्रेषु अत्यन्तं वितत्योपपयादि तमिति''[१५८] त्त्रैव द्रष्टव्यम्। पाञ्चरात्रसंमता षडध्वशोधन प्रक्रिया सात्वतसंहिताया उपोद्घाते चापि वर्तते। तद्यथा—''तदेतस्मिन् अध्वषटके भुवनाध्यः पदाध्वनि स्थितस्य सुषुप्त्यादिपदत्रिकस्य च हेयत्वम्, तुर्यपदस्य मन्त्राध्वादीनां चतुर्णा चोपादेयत्वं ज्ञेयम्। अत्रापि व्यपेक्षाभेदेन हेयता उपादेयता च प्रवर्तते। मुमुक्षो शुद्धाः सन्तो नपेक्षायामुपेया अपि हेयपक्षान्तर्गता भवन्ति।[१५९]

''अध्वपञ्चकं पाशः'' इति पाठान्तरं व्याकुर्वता कुमारेण तत्त्वप्रकाश तात्पर्यदीपिका-कारेण कालाध्वन उपादेयत्वमन्येषां च हेयत्वं महेश्वरानन्दोक्त पद्धत्या व्यावर्णितम्।

''षडध्वानां शब्दार्थो भयात्मकत्वं व्याकुर्वदृभिश्च भुवनाध्वनस्तत्त्वाध्वनि, तत्त्वाध्वनश्च कलाध्वनि लयो भाव्यते। एवमेव मन्त्राध्वनः पदाध्वनि, पदाध्वनश्च वर्णाध्वनिलयो भवति, तदनुकेचन वर्णानां पथापथं पञ्चकलासु।''[१६०]

अन्ये च अर्थरत्नावलीकारादय—''कलानां वर्णेध्वन्तर्भावं प्रदर्शयन्ति। वर्णपारम्य-वादिनांमते अनुत्तरस्याकारस्य कलायारभ्यवादिनां मते च शान्त्यतीतायाः कलायाः परशिवेलयो भाव्यते''[१६१] इति दिक्।

''शिवपुराणस्येहलोक-परलोक साधनक्षमता''

स्वरूपविवेचनम्ः— शिवपुराणस्योमासंहितायां लिखितमस्ति यद् यस्य पुराणस्य पूर्वोत्तरखण्डे भगवतः शिवस्य पावित्रं चरित्रं विविधैः प्रकारैः वर्णितमस्ति तत् पुराणं पुराणमर्मज्ञा विद्वान्सः चतुर्थं शिवमहापुराणम् कथयन्ति—

उक्तं च— **यत्र पूर्वोत्तरे खण्डे शिवस्य चरितं बहु ।**
शैवमेतत् पुराणं हि पुराणज्ञा वदन्ति च ।।[१६२] इति

वस्तुतः शिवपुराणं हि सप्तसु संहितासु विभक्तमस्ति।

यथा— १. विद्येश्वर संहिता २. रुद्रसंहिता

३. शतरुद्रसंहिता ४. कोटिरुद्रसंहिता
५. उमासंहिता ६. कैलाससंहिता
७. वायवीयसंहिता च।

तत्रापि द्वितीयायां रुद्रसंहितायां (क) सृष्टिखण्ड (ख) सतीखण्ड (ग) पार्वतीखण्ड (घ) कुमारखण्ड (ङ) युद्धखण्ड। इत्येवं पञ्चखण्डानि सन्ति।

सप्तम्यां वायवीयसंहितायाम् अपि द्वौ भागौ स्तः पूर्वाद्धमुत्तरार्द्धञ्चेति। सप्तसु संहितासु क्रमशः अध्यायसंख्या निर्धारिता: सन्ति। तद्यथा—

१.	विद्येश्वर संहितायाम्	-	२५	अध्याया:
२.	रुद्रसंहिताया: सृष्टिखण्डे	-	२०	अध्याया:
	रुद्रसंहिताया: सतीखण्डे	-	४३	अध्याया:
	रुद्रसंहिताया: पार्वतीखण्डे	-	५४	अध्याया:
	रुद्रसंहिताया: कुमारखण्डे	-	२०	अध्याया:
	रुद्रसंहिताया: युद्धखण्डे	-	५९	अध्याया:
	सम्मिलित	-	१९७	अध्याया:
३.	शतरुद्रसंहितायाम्	-	४२	अध्याया:
४.	कोटिरुद्रसंहितायाम्	-	४३	अध्याया:
५.	उमासंहितायाम्	-	५१	अध्याया:
६.	कैलाससंहितायाम्	-	२१	अध्याया:
७.	वायवीयसंहिताया: पूर्वाद्धे	-	३५	अध्याया:
	वायवीयसंहिताया: उत्तरार्द्धे	-	४१	अध्याया:

एवम् सङ्कलनया ४५७ अध्याया: सन्ति।

शिवपुराणस्य वायवीयसंहिताया: पूर्वार्द्धे द्वादशसंहितात्मकस्य अपरस्यैकस्य शिवपुराणस्यापि संकेतो विद्यते। यत्र लक्ष संख्या का:श्लोकानां विवेचनमस्ति। तद्यथा—

तत्र शैवं तुरीयं यच्छावं सर्वार्थसाधकम्।
ग्रन्थो लक्ष प्रमाणं यद् व्यस्तं द्वादशसंहितम्।।
विद्येश्वरं तथा रौद्रं वैनायकमनुत्तमम्।
ओमं मातृपुराणं तु रूद्रैकादशकं तथा।।
कैलास शतरुद्रं च कोटिरुद्राख्यमेव च।
सहस्रकोटि रुद्राख्यं वायवीयमतः परम्।।
धर्म संज्ञां पुराणं चेत्येवं द्वादशसंहिता।।[१६३] इति

विभाजनम्—

१. विद्येश्वरसंहिता २. रुद्रसंहिता ३. विनायकसंहिता ४. उमासंहिता ५. मातृसंहिता

६. पुराणसंहिता ७. एकादशरुद्रसंहिता ८. कैलाससंहिता ९. शतरुद्रसंहिता १०. कोटिरुद्र-संहिता ११. सहस्रकोटिरुद्रसंहिता १२. वायवीय संहिताश्चेति।

किन्तु साम्प्रतं द्वादशसंहितात्मकं शिवपुराणं नोपलभ्यते, परं भगवता व्यासदेवेन तदेव संक्षिप्तीकृत्य सप्तसंहितात्मकं चतुर्विंशति सहस्रश्लोकं ४५७ अध्यायात्मकं चतुर्थं शिवपुराणं तृपलभ्यत एव। तदुक्तं—

व्यासेन तत्तु संक्षिप्तं चतुर्विंशत्सहस्रकम् ।
शैवं तत्र पुराणं वै चतुर्थ सप्तसंहितम् ।।[१६४] इति

शिवपुराणे सर्वाभीष्टफलप्रदायकानां देवानां देवीनाञ्च लीलामय्यो गाथाः गीताः सन्ति। तपः पूतान्तः करणानामृषीणां मुनीनाञ्चाख्यानोपाख्यानानि प्रोक्तानि। प्रख्यातकीर्तीनां प्रजापालका नाम् धार्मिकाणामुदारात्मनां पुण्यश्लोकानां राज्ञां समुज्जवलानि जीवनचरितानि च वर्णितानि सन्ति। एवं च तत्र इतिहासः, काव्यं कला, राजनीतिः, अध्यात्मज्ञानं, व्यवहारज्ञानं, सर्वविधाविद्याश्च वर्णिताः वर्तन्ते। शिवपुराणद्वारा सामान्यजनानारभ्यउच्चतमान् यावत् सर्वेषां जनानां भक्त्यानुसारि सर्वविधलाभो भवितुमर्हति। शिवपुराणे वर्णितं तत्त्वज्ञानं सातिशयं सुगमञ्चास्ते। ओज-माधुर्यप्रासादगुणाश्च सर्वत्र परिपूर्णा स्ति। बहुशः पठितेष्वपि पुराणग्रन्थेषु (शिवपुराण) पाठकानां पुनः पुनः पुराणपाठे भिरुचिवर्द्धत एव न तेषां चित्ते कदाचिदपि तत्रारुचिर्जायते।

किञ्च-चिन्ताशीलैः पाठकैरेतन्निर्विवादम् मन्यते यत् अन्यपुराणानां एकवारं, द्विवारं बाबहुशोध्ययनेन पुनस्तान् पठितुं पाठकानां चित्तं विरसं जायते। किन्तु न ज्ञायते शिवपुराणे कीदृगलौकिकत्वं निहितमस्ति यद् यावद्बारं अस्य पाठो विधीयते, तावदेवाधिक तरमस्य माधुर्यमेघमानं पाठकानां मनांसि मोहयत्येव। पर सहस्रवर्षे भ्यो पि कालेभ्यो जना पुराणपाठं प्रकुर्वते, एकव्यक्तिरपि बहुवारं पुराणमधीते, शृणोति च परं तेषां हृदये नृतनत्वं अनुदिनं वर्द्धते एव। सदा पल्लविता कल्पलतेव प्राचीना पिपुराणग्रन्थमाला नवीनेवानुभूयते। सनातन धर्मस्य श्रुतिः स्मृतिः पुराणमिति त्रीणि प्रमाणिकानि शास्त्राणि समाम्नायन्ते।

यदि बालवृन्दं शिवपुराणं पठेत्, तदातस्य सौजन्यवृद्धिपुरः सरं भाविजीवनस्य-पुण्यमये मार्गे नूनं प्रवृत्तिप्रसरेत्। यदि युवानो वृद्धा वा पुराणस्य स्वाध्यायं विदधीत् तदा तेषां कर्तव्यनिष्ठा विवर्द्धेत। पुराणपाठ प्रभवात् स्त्रीणां हृदयेषु गृहिणीधर्मस्योदयोभवेत्, पातिव्रत्य धर्मस्य च मूलं दृढ़मुपजायते।

अपि च—प्राचीना अर्वाचीना वा सामाजिक विज्ञानस्य सर्वे मूलसिद्धान्ताः शिवपुराणे स गौरवं गुम्फिता विद्यन्ते। आदर्शसमाजव्यवस्थाया विवेचनं पुराणसाहित्यादन्यत्र दुर्लभमस्ति। सर्वज्ञानमयानां वेदानां भाष्यमयत्वात् पुराणस्य आध्यात्मिकैः ज्ञानै परिपूर्णमस्ति।

त्रिकात्मदर्शिभिः महर्षिभिः सांसारिक दुःखान्यवलोक्य मुक्तिरेव मानवजीवनस्य

अन्तिमं लक्ष्यं निर्धारितम्। यतो हि मुक्तिं विना नात्यन्तिकः सुखलाभो भवितुमर्हति। सर्वे प्राणिनः सुखार्थमेव प्रयतमाना दरीदृश्यते, न कदाचित्, दुःखार्थ केषांचिद् भवति कुत्रापि प्रवृत्तिः।

अतो भारतीया निःसर्गतो निःर्गतो निःश्रेयसमेवान्तिमं लक्ष्यमभिप्रेत्य कस्मिन्नपिकर्मणि प्रवर्तन्ते। एष शिवपुराण परिशीलनस्य महनीयो महिमा वगन्तव्यः।

तस्मादिह संसारे सुखं मे शाश्वतं स्यात् दुःखं च न कदाचन माभूदिति वुद्धया दुःखं हातुं सुखं चोपलब्धुं ससतमभिलषति प्राणिमात्रम्। न हि को पि विवेकी स्वल्पसुखमीहते, अपि तु सर्वो पि प्राणी उत्तरोत्तरमधिकमेवा वान्च्छन्ति। सुखान्वेषणे शती-सहस्रच्छति, सहस्री लक्षं, लक्षी च कोटियति भवितुमभिलषति स हि राज्यमभिलषति, राजा च साम्राज्यमभि-प्रैति, सम्राटचैन्द्रपदवीमहीते। इन्द्रो पि ब्राह्मं पदं, ब्रह्मापि विष्णुपदं, सो पि शिवपदमभि-षष्तीति तृष्णाया उत्तरोत्तरवर्द्धनात् कामनारहितस्य पुंसः सुखान्वेषणबुद्धेरन्तं भवितुं नार्हति। तथा चाह योगीश्वरो राजा भर्तृहरिः—

निःस्वोवष्टि शतं शतीदशशतं लक्षं सहस्राधिपः ।
लक्षेशः क्षितिपालतां क्षितिपतिश्चक्रेशतां वाच्छति ।
चक्रेशः पुनरिन्द्रतां सुरपतिः ब्राह्मं पदं याचते ।
ब्रह्मा विष्णुपदं हरिः शिवपदं तृष्णावधिं कोगतः ।।[१६६]

यदि भक्तिश्रद्धासमन्वित निष्ठापूर्वकं शिवपुराणस्य सेवनम्, शिवार्चनं भविष्यति चेत् उपर्युक्त वचनानि सत्यानि भविष्यन्ति।

अष्टादशभेदैर्विभक्तेषु पुराणेषु श्रीमताव्यासदेवेन पुराण लक्षण निर्देशपूर्वकं सर्ग-प्रतिसर्ग-वंश-वंशानुचरित-मन्वन्तरवर्णनम्, अवतार तत्त्वस्य समीक्षा, भक्तिरहस्य मीमांसा, इहलौकिक-पारलौकिक सुख-साधनविवेचनम्, प्राणिमात्रस्य कल्याणकामनाय विविधाभ्युदयस्य मार्गप्रदर्शनम्, आदर्शमानव चरित्र चित्रणम्, सर्वधर्मरहस्य संकीर्त्तनम्, वर्णाश्रमधर्म प्रतिपादनम्, विभिन्नप्रकारकोपासनाप्रदर्शनपूर्वकं परमात्मप्राप्त्युपायोद्बोधनम्, सर्वदर्शनसिद्धान्तनिरूपणम्, संसारसागरसन्तरणोपायजातं विवेचितमस्ति। किं बहुना सर्वोपयोगिनो धर्मार्थकाममोक्षादयो विविधाज्ञातव्याविषया विशेषतः शिवपुराणे विवेचिता सन्ति। ये सर्वथा इहलौकिकपारलौकिक साधनानि सन्ति। शिवपुराणे श्रद्धाजुषां पुंसां पुराणरहस्य स्फुटावगतये पुराणस्थानर्धरत्न जिग्राह यिषया प्राणवतप्रियस्य सर्वाभ्यः हितस्य सर्वैः धार्मिकशिरोमणिभिः सर्वथा समादृतस्य सर्वदर्शनसिद्धान्तसम्बलितस्य सर्वोपासना, सर्वसम्प्रदायविरोधिनो त्यलौकिकविभावगुम्फितस्य पूज्यपादे न त्रिकालदर्शिना महर्षिणाव्यासदेवेन प्रणीतस्य एतस्य शिवपुराणस्य भाषातु एवं मञ्जुलतरा प्रासादगुणगुम्फिता भावमयी, हृदयाग्राहिणी मधुरमयी च विद्यते यथा वाला अपि स्वल्पेनैव प्रयासेन तदध्ययनात् तद्रहस्यमर्मज्ञा भवितुमर्हन्ति। अतः सरलतया भाषा सौष्ठवेन च अनयासासेन बोधगम्यानां पुराणमनुशीलनमस्ति नितान्तमावश्यकम्।

अपि च—शिवपुराणे वेदवत् भाषात्रयं भावत्रयं गुणाधिकारत्रयं च विद्यते। यथा

वेदार्थरहस्य विज्ञाने काठिन्यं तथैव पुराणार्थ रहस्यावबोधने पि तद्वेदनीयम्। पुराणे यत्र केवलं समाधिगम्यविषयाणामेव वर्णनम् विद्यते सैव समाधिभाषेति। यथा—आत्मस्वरूप विवेचनम्, ब्रह्म-प्रकृतिस्वरूपवर्णनम्, दुर्ज्ञेयकर्मरहस्य प्रतिपादनम्, समाधिभाषातु सर्वत्रैवोपलभ्यते, नास्ति तत्र वैमत्यम् तथा च वर्णनपद्धत्या समाधिगम्यं विषयं लौकिकरीत्या विव्रियते सा हि लौकिकीभाषा प्रतिपाद्यते। यथा—ब्रह्म-प्रकृति (शिवा-शिव) रूपयो: शिव-पार्वत्यो: विवाहवर्णनम्, अनाद्यन्तचिन्मय-शिवलिङ्गवर्णनम्, रासलीलारहस्य वर्णनम् च।

यत्र च-समाधिगम्यविषयाणां परिपुष्टये अनेककल्पसंघटितानां घटनावलीनां समाधिबलेन संस्मृत्य विस्तरसो वर्णनं क्रियते सा भाषा परकीया इति निगद्यते। अस्या भाषात्रयपद्धते: स्वरूपावगतिं विना यथा वेदार्थरहस्य ज्ञानं दुस्तरं तथा पौराणिकार्थ परिचयो पि दुर्गम एव।

अतएव भारतीया धार्मिक विचाराणामवगतये शिवपुराणमेव समाश्रयन्ति, श्रद्धधते, तदनुकूलं च कर्तुं मनसा, वाचा कर्मणा प्रयतन्ते। भारतीय जनताया: कल्याणार्थ पुराणवचनादि द्वारा धार्मिक समाजिकसांस्कृतिक कार्याणां प्रवृत्तौ पर्याप्तं प्रेरणमवाप्यते।

शिवुराणान्तर्गतानां तीर्थव्रत-दान मन्त्र जपादीनां माहात्म्यमेको न्यो विषयो स्ति। प्रत्येकस्य माहात्म्यस्य प्रामाणिकता सिद्धये एकैकमुपाख्यानं सम्बद्धमस्ति। व्रत जप-माहात्म्यानि पुराणस्य अभीष्टां विचारधारामेव पोषयन्ति। विशेषत: शिवपुराणे तान्येवोपाख्यानानि प्रस्तुवन्ति यानि तीर्थ-व्रत-जप-पूजनादि पुर: सरम शिवसम्बद्धानिसन्ति। तानि सर्वाणि प्राणिमात्रस्य लौकिकं पारलौकिकञ्चाभीष्टं पूरयन्ति।

शिवाज्ञारूप शिवपुराणम्

शिवपुराणे योगबलेन त्रिकालदर्शिना महर्षिणा व्यासदेवेन आदर्शमानवचरित्रचित्रणं, सर्वधर्मरहस्य कीर्तनम्, वर्णाश्रम व्यवस्थाप्रतिपादनं, सर्वदर्शनरहस्य समर्थनम्, कर्तव्य-पदप्रदर्शनं, असत्पथ निवृत्तिमार्गसूचनम्, ज्ञानस्य-भक्ते: कर्मणश्च निरूपणं अवतारस्य विवेचनम् च महताकौशलेन विहितमस्ति। किं बहुना पुराणे सर्वोपयोगिनो ज्ञातव्या विषया यथास्थानं निवेशिता: सन्ति। अतएव पुराणम् भारतीय संस्कृते: हृदयमेवेति कथने नास्ति कश्चिदपि अतिशयोक्तिलेश:। अतो हिन्दुजातौ प्राणवत् प्रियस्य सर्वाभ्यो हितस्य, वेदवदादरणीयस्य, सवै:, धार्मिकशिरोमणिभि: सर्वथा समादृतस्य सम्प्रदायविरोधेन सर्वदर्शनसिद्धान्त सर्वोपासनारहस्य समर्थनशीलस्य, अलौकिकभावगुम्फितस्य भगवत: शिवस्य आज्ञास्वरूप शिवपुराणस्याध्ययनेन कर्तव्यनिष्ठावर्द्धते। अतएव सर्वथादरणीय: न हेयम्। तदुक्तम्—

पुराणं मानवोधर्म: साङ्गोवेदश्चिकित्सितम् ।
आज्ञा सिद्धानि सर्वाणि न हन्तव्यानि हेतुभि: ।।[१६६] इति

शिवपुराणस्य भाषा प्रसादुणगुम्फिता भावमयी, अतिसरला, मञ्जुला च वर्तते। येनाल्पज्ञा अपि स्वल्पप्रयासेनैव तदध्ययनतः पुराणमर्मज्ञाभवितुमर्हन्ति, हिन्दुधर्मस्य समुन्नतिं कर्तुं प्रभवन्ति, मानव जन्मनः प्रधानलक्ष्यभूतां भगवत्प्राप्तिञ्च कर्तुं शक्नुवन्ति।

शिवपुराणे न केवलमाचारव्यवहार दैनिकक्रियामात्रस्योल्लेखो स्ति, अपितु मानव-जीवनोपयोगीनां विविधानां भावनानां पूर्ण विवेचनं विद्यते अतः पुराणाध्ययनं विना यथार्थ-ज्ञानं मानवीय जिज्ञासायाः पूर्तिश्च न सम्भवति ?

मुक्तिः—शिवपुराणे मुक्तिविषयिकावर्गीकरणप्रसङ्गे पञ्चविधमुक्तेर्नामोल्लेखः प्रदर्शितः। उक्तञ्च—

सारूप्या चैव सालोक्या सान्निध्या च तथा परा ।
सायुज्या च चतुर्थी सा व्रतेनानेन या भवेत् ।।
कैवल्याख्यापञ्चमी च दुर्लभार्सर्वथा नृणाम् ।
तल्लक्षणं प्रवक्ष्यामि श्रूयतामृषि सत्तमाः ।।[१६७] इति

१. सारुप्यमुक्तिः—परमात्मनः शिवस्य महाप्रसादात् बुद्धिः यंशे संजाता। सा तु प्रकृतेः कार्यमस्ति। बुद्धिवशवर्तित्वात् इयं सार्ष्टिपदेनाप्यभिहिता। तदुक्तम्—

महाप्रसादलाभे च बुद्धिश्चापि वशाभवेत् ।
बुद्धिस्तु कार्य प्रकृतेस्तत्सार्ष्टिरिति कथ्यते ।।[१६८] इति

२. सालोक्य मुक्तिः—यदा भगवतः शिवस्य कृपया कर्मजनित पार्थिवविग्रहः स्ववशे-भवति, तदा स जीवात्मा शिवलोकेवासो धिकारी भवति इयमेव सालोक्यमुक्तिः। यथा—

प्रसादात् परमेशस्य कर्मदेहो यदावशः ।
तदा वै शिवलोके तु वासः सालोक्य मुच्यते ।।[१६९] इति

३. सान्निध्य मुक्तिः—यदा शिवकृपातः पञ्चतन्मात्राणि स्ववशेस्थितानि भवन्ति तदा एव जीवात्मा परमात्मनः सान्निध्यं प्राप्नोति। एतस्मिन्काले तस्य क्रिया-आयुधानि च शिवसादृश्यानि भवन्ति। इयमेव सान्निध्यपदेनोच्यते। तद्यथा—

सामीप्य याति साम्बस्य तन्मात्रे च वंशगते ।
तदा तु शिव सायुज्यमायुधाद्यैः क्रियादिभिः ।।[१७०] इति

४. सायुज्यमुक्तिः—यदा भगवतः शिवस्य अनुग्रहात् प्रकृतिरपि वशवर्तिनी संजाता, शिवस्य मानसिक ऐश्वर्य विनायत्नेन लभ्यते तेन जीवात्मा मुक्तो भूत्वा परमात्मनि विराजते। सा मुक्तिः सायुज्यपदेनोच्चारिता। तदुक्तं शिवपुराणे—

पुनर्महाप्रसादेन प्रकृतिर्वशमेष्यति ।
शिवस्यमानसैश्वर्यं तदा यत्नं भविष्यति ।
तत्सायुज्यमिति प्राहुर्वेदागमपरायणाः ।।[१७१] इति

५. कैवल्यमुक्तिः—सर्वथा असामान्य इयं मुक्तिः सुदुर्लभा च। शिवज्ञानोदये अर्थात् आत्मा साक्षात् शिव एवास्ति इति ज्ञाने जाते परब्रह्मणः शिवस्य प्राप्तिःसंजाता, आत्मनः परमात्मनोरैक्यं अनुभूयते। इयं कैवल्य मुक्तिः। उक्तञ्च शिवपुराणे—

मायातीतं परात्मानं द्वन्द्वातीतं विमत्सरम् ।
तत्प्राप्तिश्च भवेदत्र शिवज्ञानोदयाद् ध्रुवम् ।।[१७२] इति

"ननु शिवपुराणस्य मुक्तिप्रयोजकत्वं कथमिति चेत्, अत्रोच्यते। ऋतम्भरप्रज्ञया कृतसर्वतत्त्वसाक्षात्काराः लब्धयथार्थ ज्ञानाहि भारतीय समाजनियमप्रवर्तका मनु-व्यास-वाल्मीकि प्रभृतयो महामुनयः समाजोपकाराय निरंतरं प्रयतमाना आसन्। यथा यथा समाजेभ्यः अनाचारा, अत्याचारा, दुराचाराः पापचाराश्च दूरीभवितमर्हन्ति तथा तथा चे सततं चेष्टन्ते स्म। यथा वा दुर्वृत्तैः सबलै सुवृत्ता दुर्बलानाभिभूयेरन् पापचारिभिः सत्कर्मचारिणो न पराभूयेरन् समाजे किमप्यपूर्वं स्वर्गसुखमुपस्थितं स्यात् मानवजन्म सार्थकं सम्भवेत्, सततञ्च सत्कर्मसु लोकानां स्पृहा समुपजायेत, तथा नियमान व्यवस्थापयन्तः जगतीतले स्मिन् आयं सनातनधर्ममक्षुण्णं परिचालयितुकामा निष्कामा महामनसः पूज्यतमास्ते त्र भूतले विरहन्ति स्म।[१७३] इति

इदमसत्कर्म एतदाचरणेन गाढ्तममसुखमुत्पद्यते सद्यः, येन पृथिवीमिमां परिहाय लोकान्तर गमने पि नास्ति निस्तारः। तत्र प्राक्तनेन दुष्कर्मणा प्राप्तं नरकमपि सर्वविधदुःख-दायकमुपस्थितं भयति, तदा मनसि एवं विधाभावना यत् यदिकदाचित् भूयो मानवजन्मलभेयं तदा न पुनः पापलेशमपि समुपार्जयेयम्, येनेदानीमीदृशं कठोरतरं दुःसहं दुःखमनुभूयत इति।

एतच्च विवरणं पुराणप्रणेता भगवान् वेदव्यासः सरसेन सरलेन सुगमेन, समीचीनेन शब्दोपन्यासेन संयोजयामास। शिवपुराणे उपन्यासमुखेनोपस्थापितं पूर्ववर्तिनां जनानां वृत्तं पठन्तो विश्ववर्तिनो जीवा असत्कर्मणो विपन्निवर्तकतां सत्कर्मणश्च सुखादिसम्पादकतां ज्ञात्वा शुभकर्मणि प्रवर्तन्ते, असत्कमेभ्यश्च प्रतिनिवृत्य सुखमयं जीवनं विधायान्ते विलसन्ति निरन्तरं मानव जन्मनो मुख्येलक्ष्ये परमानन्दे परमात्मनि।

कलि-काल ग्रस्तानां मानवानां इह लौकिक-पारलौकिक कश्चार्थसिद्धये शिवमुखान्निःसृत शिवपुराणं सर्वथापर्याप्तमेव। उक्तञ्च—

कालव्यालमंहात्रास विध्वंसकरमुत्तमम् ।
शैवं पुराणं परमं शिवेनोक्तं पुरामुने ।।
सनत्कुमारस्य मुने रूपदेशात्परादरात् ।
व्यासेनोक्तं तु संक्षेपात्कलिजानां हिताय च ।।[१७४] इति

भगवताव्यासदेवेन सनत्कुमारोपदेशात् प्राणिमात्रस्य हिताय शिवस्वरूप शिवपुराणं प्रोच्यते। यत्सेवनात् लौकिक-पारलौकिक मनोरथसिद्धिर्भवति। तदुक्तम्—

एतच्छिवपुराणं हि परमं शास्त्रमुत्तमम् ।
शिवरूपं क्षितौज्ञेयम् सेवनीयं च सर्वथा ।।[१७५] इति

शिवपुराणस्य पठनात्, श्रवणात्, सेवनाच्च राजसूयअश्वमेधादीना यज्ञानां, अग्निष्टोम यज्ञानाञ्च सर्वाणिफलानि श्विकृपातः अनायासे प्राप्नुवन्ति। सहैव भक्ताः पृथिव्यां विपुलान्भोगान् भुक्त्वा शिवलोकमपि प्राप्नुवन्ति। तथोक्तञ्च शिवपुराणे—

पुराणश्रवणाच्छम्भो र्निष्पापो जायते नरः ।
भुक्त्वा भोगान्सुविपुलाच्छिवलोकमवाप्नुयात् ।।
राजसूयने यत्पुण्यं अग्निष्टोम शतेन च ।
तत्पुण्यं लभते शम्भोः कथा श्रवणमात्रतः ।।[१७६] इति

शिवपुराणं हि—जनसाधारणानामशिवं शमयितुं शिवमाहात्म्यप्रतिपादकस्य शिवपुराणस्य पठन-पाठन-श्रवण, मननैः, विविधताप सन्ताप्तानां प्राणिनां स्वान्ते शान्तिरूप- जायते। अतएव बहवो मनीषिणः सांसारिकप्रपञ्चपहाय गादभक्तिपुरः सरम् शिवाराधनपरायण ऐहलौकिकं-पारलौकिकञ्च अभीष्टंलभमाना अहर्निशं भगवतो निटिलेक्षणस्य गुणगणान् गायमाना लोककल्याणं कुर्वन्ति। इतिशम्।

सन्दर्भ

१. षड्दर्शन संग्रह कालविवेचने।। १-२
२.
३. का०मा०उपो०
४. म०भा०शा०प० २३८।१९
५. चिद्गगनचन्द्रिकायां पृ० २०७।३० श्लोकः।
६. पा०सू० ४।३।१२०
७. शिव०पु०वा०सं० ७।१।१-२ श्लोकौ
८. वही, ७।२।२।२३ श्लोकौ।
९. श्वेताश्वरोपनिषदि ६।८
१०. शिव०पु० ७।१।७।६
११. वही, ७।१।७।६
१२. वही, ७।१।७।२१-२२-२३-२४ श्लोकाः।

१३. श्रीमद्भागवते २।५।२१-२२-२३ श्लोकाः।
१४. विष्णुपुराण ७।२।३२-३३-३५, ३६ श्लोकाः।
१५. कूर्मपुराणे १२।१२
१६. वही, १२।१७
१७. वही, १२।२४
१८. वही, १२।२७
१९. शिव०पु० ७।१।१७।२६ श्लोकः।
२०. मतङ्गप्रणीत योगसाधनायां
२१. योगबीजे - १।२४
२२. पा०यो०सू० २।२८
२३. वही, २।२९
२४. ब्रह्मपु० २७।१५
२५. अग्निपुराण ३७९।२५
२६. योगकल्पद्रुमे - ७
२७. श्री०भा०पु० ११।२०।६-७-८
२८. शि०पु० ७।२।१०।३३
२९. वही, ७।२।३७।६
३०. वही, ७।२।३७।८
३१. वही, ७।२।३७।९
३२. वही, ७।२।३७।१०
३३. वही, ७।२।३७।११
३४. वही, ५।५१।८
३५. वही, ७।२।३७।१४-१५
३६. वही,
३७. वही, ७।२।३७।१६
३८. पा०सू० ३।३।१२०
३९. शि०पु० ७।२।८।४३ श्लोकः।
४०. वही, ७।२।८।४४,४५,४६,४७,४८,४९ श्लोकः।
४१. गीता ४।३-४ श्लोकौ।
४२. शि०पु० ३।१७।१६
४३. श्री०भा०पु० १०।२९।१४

४४. शि०पु० ७।२।९।६
४५. वही, १।१६।११६
४६. वही, १।१७।९
४७. वही, ७।२।१२।१०
४८. वही, ७।२।१२।२१
४९. वही, ७।२।१३।३९-४०
५०. तमिलपदग्रन्थ (उणमार्हविलक्कम्) ३३-३५ पद।
५१. वही, ३३-३५ पद
५२. सिद्धान्तदीपिका पृ० १३
५३. शि०पु० रू०सं०पा० खण्डे २१।३३-३६ श्लोकौ।
५४. शि०पु० १।८।२१
५५. शि०पु० कै०सं० ९।५६
५६. वही, ७।२।१२।२-३
५७. गीतायाम् - १
५८. शि०पु० १।१७।१३१
५९. वही, १।१८।१३-१४
६०. श्रीमद्भगवद्गीतायाम्।
६१. शि०पु० ७।२।१४।२४
६२. वही, ७।२।१४।२८
६३. वही, ७।२।१४।२७
६४. वही, ७।२।१४।२६
६५. वही, ७।२।१४।३०
६६. वही, ७।२।१४।३३
६७. वही, ७।२।१४।२९-३३-१/२
६८. वही, ७।२।१४।३४,३५,३६ श्लोकाः।
६९. वही, ७।२।१४।३७।३८, ४०, ४१
७०. वही, ७।२।१४।३९
७१. वही, ७।२।१४।४२
७२. वही, ७।२।१४।४३
७३. वही, ७।२।१४।४३-४४-४५
७४. वही, ७।२।१४।४६-४७

७५. वही, ७।२।१४।४९-५०
७६. वही, ७।२।१४।५४
७७. वही, ७।२।१२ अध्यायसारः।
७८. वही, ७।२।१३।४
७९. वही, ७।१।१७।२६
८०. कुमारदेव विरचिते तत्त्वप्रकाशे श्लोक ५ (व्याख्याने)
८१. स्वायम्भुवोक्त क्रियापादे पृ०सं० १७९
८२. महार्थमञ्जरीपरिमले पृ०सं० ७०
८३. शि०पु०वा०सं०, १।२९।११-१२-१३ श्लोकाः।
८४. तन्त्रालोकः ६।२१७-२१८
८५. वही, ६।२२३
८६. वही, ३।२०३
८७. वही, ६।२३८
८८. वही, ६।८८
८९. वही, श्रीमातङ्गेः ६।२२६ (त०लो०)
९०. तन्त्रालोकः ६।२२९
९१. वही, ७।३७
९२. विज्ञानभैरवः २।११५
९३. वही ३।११०
९४. शिवोपाध्यायविरचिते श्लोकव्याख्यायां भूमिकायाम्, पृ० २१०
९५. तन्त्रा० ३।२२२।२२३
९६. वही, ३।२३२
९७. वही, ३।१९७
९८. वही, ६।२२६
९९. वही, ११।४७
१००. तत्त्वप्रकाश श्लोक - ५
१०१. स्वच्छन्दतन्त्रे ११।६९-७० श्लोकौ।
१०२. वही, ११।७१-७२-७४ श्लोकौ।
१०३. वही, ११।११३४-३५ श्लोकयोः व्याख्या।
१०४. शिवपुराणे ७।१।२९।१३।१।२१ श्लोकाः।
१०५. शिवसूत्रे ३।१

१०६. स्तोत्रभट्टारके पृ० ११३
१०७. राजभट्टारके ३।११९
१०८. महार्थमंजरी, पृ० ९३
१०९. कुलागमे पृ० ४११
११०. आर०एन० भट्टविरचितमतंगटीकायां भाग-२, पृ० ८३
१११. तन्त्रा०चक्रोदयान्हिके ७।२-५ श्लोकौ
११२. तन्त्रा० ७।५६
११३. त्रिकहृदये ९-५८
११४. त्रिकसारे, पृ० ८६
११५. श्रीकण्ठीसंहितायाम् मन्त्र जपप्रस्तावे पृ० ८
११६. तन्त्रा० संविदुल्लाससख्यां २३।३२
११७. शैरवागमे भा १ पृ० १८०
११८. किरणागमपद्धत्यां (६।८६।१३६ पृष्ठे)
११९. स्वच्छन्दतन्त्रे ७।१३२।१३३
१२०. तन्त्रा० ७।४०
१२१. वही, ७।४५
१२२. स्वच्छन्दतन्त्रे पृ० ४०
१२३. लक्ष्मीतन्त्रे ३९।३५
१२४. सात्वतीययोग: श्लोक सं० ५६
१२५. जपाख्यावचने १४।५९
१२६. तत्त्वरक्षाविधाने ३४
१२७. स्वच्छन्दतन्त्रेप्रणवपदैकादशिकाया ४।२५५-२५६ श्लोकौं
१२८. तन्त्रा० ६।२१
१२९. ईश्वरप्रत्यभिज्ञायां २।१।५ कारिका।
१३०. तन्त्रा० ६।२४-३५
१३१. वही, ६।३६
१३२. वही, ६।२९-३०
१३३. विज्ञानभैरव ४।९५
१३४. तन्त्रा० ६।३८
१३५. वही, ६।२१६
१३६. वही, ६।२१६

१३७. रत्नत्रये-लुप्तागमसंग्रहे ८५ श्लोकः।
१३८. लुप्तागम संग्रहे ४१ श्लोकः।
१३९. वही, ४८ श्लोकः।
१४०. वही, पृ० ६९
१४१. तन्त्रसारे ९।४-५
१४२. मतङ्गपारमेश्वरे ५।३-४
१४३. तत्त्वप्रकाशे ७३ श्लोकः।
१४४. लुप्तागमसंग्रहे, पृ० ३१
१४५. गुरुदेवाचार्यः
१४६. परमार्थसारे १०-११ श्लोकौ।
१४७. पर्यन्तपञ्चाशिका - ६ श्लोकः
१४८. शाम्भवीदीपिकायां पृ० ८४
१४९. तत्त्वप्रकाशे - ७४ श्लोकः।
१५०. त्रिकसारे ११।१४
१५१. तन्त्रालोके - १-८६
१५२. तन्त्रसारे, पृ० ६४-६५
१५३. तन्त्रालोके - १।८३
१५४. वही, ११।८५-८६
१५५. वही, ८।२-४
१५६. वही, ८।७
१५७. वही, ८।८
१५८. वही, ८।१५-१७
१५९. स्वच्छन्दद्योते- ४।९७
१६०. महेश्वरानन्दकृत "सिद्धान्तागमे", पृ० ६९
१६१. सात्वतसंहितायाम्, पृ० ६९
१६२. स्वच्छन्दतन्त्रे, पृ० १९९
१६३. अर्थरत्नावल्यां, पृ० २०८
१६४. शि०पु०उमा०ख०अ० ४४।१२५ श्लोकः।
१६५. शि०पु० ७।१।४५-५०-५३ श्लोकाः।
१६६. वही, ७।१।१।५८ श्लोकाः।
१६७. भर्तृहरि वै० शतके।

१६८. म०भा० अनु०प० २७।३५
१६९. शि०पु० ४।१।३-७
१७०. वही, १।१८।२०-२१
१७१. वही, १।१८-१९
१७२. वही, १।१८।१९-२०
१७३. वही, १।१८।२१-२३
१७४. वही, ४।४१।१५-१६
१७५. पुराणपर्यालोचने पृ० ३८-३९
१७६. शि०पु० माहा० १।८-९
१७७. वही, १।१२
१७८. वही, १।१५-१६

लेखकस्य परिचयः

नाम - **डॉ शत्रुघ्न नाथ तिवारी**

पिता - श्री पं. जटाशंकर नाथ तिवारी

निवास स्थानम्- गोपालपुरम्

पत्रालयः - घाँटी

जनपद - देवरिया (उत्तर प्रदेश)

जन्मकाल - तीन फरवरी सन् उन्नीस सौ चौवन (३-२-१९५४)

शिक्षा- हाई स्कूल- शहीद मधुबन करामद इण्टर कालेज, खोटीबारी, देवरिया (उत्तर प्रदेश)

इण्टर - शहीद मधुबन करामद इण्टर, कालेज, खोटीबारी, देवरिया

बी. ए.-महारानी लाल कुंवारीस्नात्तकोत्तर महाविद्यालय, बलरामपुर, गोण्डा

एम. ए.-महारानी लाल कुँवारीस्नात्तकोत्तर महाविद्यालय, बलरामपुर, गोण्डा

बी. एड.-महारानी लाल कुँवारीस्नात्तकोत्तर महाविद्यालय, बलरामपुर, गोण्डा

पी. एच-डी. सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी (उ.प्र.).

अध्यापन : उपाचार्यः वैजनाथ पाण्डेय आर्य संस्कृत महाविद्यालयः, सीवानस्थः.

बुक सेन्टर

यनका गली, अस्सी

वाराणसी-५ (उ. प्र.)

ISBN 81-903635-1-4